

प्रायोगिकसंस्करणम्

# संस्कृतवाङ्मयेतिहासः

उत्तरमध्यमा द्वितीयवर्षम्

( कक्षा- 12 )

महर्षि-पतञ्जलि-संस्कृत-संस्थानम्,

भोपालम्

# संस्कृतवाङ्मयेतिहासः

## उत्तरमध्यमा द्वितीयवर्षम् ( कक्षा- 12 )

## द्वितीयं प्रश्नपत्रम्

कूट संख्या (802)

**प्रकाशकः**

**महर्षि-पतञ्जलि-संस्कृत-संस्थानम्, भोपालम्**

● प्रकाशनवर्षम् – 2019

**सर्वाधिकार सुरक्षित**

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भाग को छापना तथा इलेक्ट्रॉनिकी, मशीनी, फोटो प्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुनः प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रसारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशक की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार के व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।

## संस्कृतपाठ्यपुस्तकलेखनसमन्वय–मार्गदर्शन–समितिः

| | |
|---|---|
| 1. श्री लोकेशजाटवः, संचालकः, राज्य शिक्षाकेन्द्रम्, भोपालम् | अध्यक्षः |
| 2. डॉ. भागीरथकुमरावतः, सदस्य, म.प्र.पा.पु. स्थायी समिति | सदस्यः |
| 3. डॉ. रघुवीरप्रसादगोस्वामी, सदस्य, म.प्र.पा.पु. स्थायी समिति | सदस्यः |
| 4. डॉ. अशोक पारीकः, नियंत्रक, पाठ्यक्रमः, राज्य शिक्षाकेन्द्रम् | सदस्यः |
| 5. डॉ. एस.ए.एच रिजवी, नियंत्रकः, भाषा राज्यशिक्षाकेन्द्रम् | सदस्यः |
| 6. डॉ. प्रशांतडोलसः, उपनिदेशकः, महर्षिपतंजलिसंस्कृतसंस्थानम् | सदस्यः |
| 7. डॉ. बृजेशसक्सेना, समन्वयकः (पाठ्यक्रमः) राज्यशिक्षाकेन्द्रम् | सदस्यः |
| 8. डॉ. मीता गुप्ता, समन्यवयकः (भाषा) राज्यशिक्षाकेन्द्रम् | सदस्यः |
| 9. डॉ. सत्यजीतपाण्डेयः, महर्षिपतंजलिसंस्कृतसंस्थानम् | सदस्यः |
| 10. डॉ. अशोककुमारव्यासः, राज्यशिक्षाकेन्द्रम् | सदस्यः |
| 11. डॉ. लोकेशखरे, राज्यशिक्षाकेन्द्रम् | सदस्यः |
| 12. डॉ. पी.आर. तिवारी, निदेशकः, महर्षिपतंजलिसंस्कृतसंस्थानम् | सदस्यः सचिवः |

**समन्वयकाः –**

1. डॉ. सत्यजीतपाण्डेयः, महर्षिपतंजलिसंस्कृतसंस्थानम्, भोपालम्
2. डॉ. अशोककुमार व्यासः, राज्यशिक्षाकेन्द्रम्, भोपालम्
3. रेशमा लाला, महर्षिपतंजलिसंस्कृतसंस्थानम्, भोपालम्

**लेखकगणाः –**

1. रघुवीरप्रसादगोस्वामी, रामानन्दसंस्कृतमहाविद्यालय, भोपालम्
2. डॉ. शीतांशुत्रिपाठी, राष्ट्रीयसंस्कृतसंस्थानम्, भोपालम्
3. पुरुषोत्तमतिवारी, शास. उ.मा.वि., सांईखेड़ा
4. मनोजकुमारद्विवेदी, शास. उत्कृष्ट उ.मा.वि., उज्जयिनी

## म.प्र.–पाठ्यपुस्तक–स्थायी–समितिः

| | |
|---|---|
| डॉ. गोविन्दशर्मा, ग्वालियरम् | अध्यक्षः |
| डॉ. भागीरथकुमरावतः, भोपालम् | सदस्यः |
| डॉ. गिरीश–अग्निहोत्री, जबलपुरम् | सदस्यः |
| श्री अनिलचतुर्वेदी, इन्दौरम् | सदस्यः |
| डॉ. सुभाषगुप्ता, इन्दौरम् | सदस्यः |
| डॉ. मुकेशतिवारी, शहडोलम् | सदस्यः |
| डॉ. चन्द्रदेव–अष्ठाना, ग्वालियरम् | सदस्यः |
| डॉ. नाथूरामराठौरः, दमोहम् | सदस्यः |
| डॉ. रघुवीरगोस्वामी, भोपालम् | सदस्यः |
| डॉ. पूजा उपाध्याय, उज्जैनम् | सदस्यः |
| डॉ. गोविन्द रामानी, हरदा | सदस्यः |
| आयुक्तः, राज्यशिक्षाकेन्द्रम्, भोपालम् | सदस्यः सचिवः |
| आयुक्तः, लोकशिक्षणसंचालनालयः, भोपालम् | सदस्यः |
| सचिवः, माध्यमिकशिक्षामण्डलम्, भोपाल | सदस्यः |
| प्रबंधसंचालकः, म.प्र.पाठ्य पुस्तक निगम, भोपाल | सदस्यः |
| प्रतिनिधिः, राष्ट्रीयशैक्षिकअनुसंधान एवं प्रशिक्षण परिषद् नईदिल्ली | सदस्यः |

# प्राक्कथन

भारतीयसन्दर्भे संस्कृतस्य महत्त्वं सर्वोपरि विद्यते। इयं भाषा न केवलं सर्वप्राचीना अपितु संस्कृतेः संवाहिका भाषा वर्तते। समग्रम् अपि भारतीयं ज्ञान-विज्ञानं संस्कृते एक निहितमस्ति। संस्कृतस्य विश्वजनीनं सर्वकालिकं महत्त्वं विज्ञाय पाठ्यक्रमे संस्कृतस्य नियोजनं सुनिश्चितं वर्तते। पाठ्यक्रमे न केवलं वाङ्मयस्य अपितु तत्र निहितानां जीवमूल्यानां, मानवीयादर्शनां, उदात्तभावानां शिक्षणम् अपि लक्ष्यमेकं विद्यते।

प्रस्तुतपाठ्यपुस्तके प्रकृतमुद्देश्यम् आश्रित्य पाठानां समुचितः सन्निवेशः कृतो विद्यते। अत्र नातिविस्तरेण समग्रस्यापि वाङ्मयस्य संस्कृतवैभस्य, विधानां, प्रवृत्तीनां, तत्त्वानां, रचनाकाराणां परिचयः अत्र प्रदत्तः। एतस्य पाठ्यपुस्तकस्य अध्यनेन न केवलं भारतीयसंस्कृतेः परिचयः अपितु संस्कृतभाषोपनिबद्धस्य वाङ्मयस्य अपि परिचयो भविष्यति। अधोलिखितानि पाठ्यपुस्तकस्य उद्देश्यानि संस्थानेन प्रकल्पितानि- तद्यथा-

(1) संस्कृतभाषायाः तत्साहित्यस्य च अध्ययनाय प्रोत्साहनम्।

(2) सोद्देश्यसंस्कृतशिक्षायाः पारम्परिकाध्ययनं वर्तमानशिक्षाप्रणाल्या सह योजनां प्राचीनार्वाचीनपद्धत्योर्मध्ये समन्वयस्थापनम्।

(3) 'प्रायोज्य-प्रणाली-विज्ञानम्' इत्यनेन अधिकृत्य नावाचारेण संस्कृतशिक्षायाः सञ्चालनम्।

(4) संस्कृतवाङ्मये निहितज्ञानस्य व्यावहारिकरूपेण छात्राणां सम्मुखे प्रस्तुतीकरणम्।

(5) संस्कृते विद्यमानायाः भारतीयसंस्कृतेः ज्ञानम्।

(6) संस्कृतवाङ्मये निहितानां मानवीयजीवनमूल्यानाम् अवगमनम्।

(7) संस्कृतवाङ्मये अन्तर्निहितस्य ज्ञानविज्ञानस्य भारतस्यातीतगौरवस्य च युगानुकूलसन्दर्भे प्रस्तुतिः।

इतोऽपि पाठ्यपुस्तकमाध्यमेन अस्माकं देशस्य सांस्कृतिपरम्पराणां निदर्शनं प्रजातान्त्रिकराजव्यवस्थायाः ऐतिहासिकं प्रतिफलनं, साहित्यिकप्रवृत्तीनां ज्ञानम् राष्ट्रियाः चिन्ताः चिन्तनञ्च अत्र समाहितं वर्तते। प्रस्तुतपाठ्यपुस्तकनिर्माणे संस्कृतशिक्षायाः लक्ष्येषु तथ्यात्मकराष्ट्रस्तरीयाः सर्वमान्य-व्यापक-शैक्षणिक-पाठ्यक्रमस्य निर्धारितोद्देश्यानां स्वीकृतसिद्धान्ताः सहायकाः अभवन्।

आशासे यत् इदं पाठ्यपुस्तकं संस्कृतविद्यालयानां कृते निर्धारितं 'सा विद्या या विमुक्तये' इत्यस्य ध्येयवाक्यस्य प्रतिपूर्तिं करिष्यति तथा च उपर्युक्तानाम् उद्देश्यानां पूर्तिरपि सफलया करिष्यति इति।

निदेशकः
महर्षि-पतञ्जलि-संस्कृत-संस्थानम्,
भोपालम्

# संस्कृतवाङ्मयेतिहासः
## (802)



विषय– संस्कृतवाङ्मयेतिहासः (802) पूर्णांक – 100, समय – 3.00 घण्टे

| पाठ्यक्रमानुसार इकाईयां | इकाई पर आवंटित अंक | वस्तुनिष्ठ प्रश्न | अंकवार प्रश्नों की संख्या | | | | | | कुल प्रश्न |
|---|---|---|---|---|---|---|---|---|---|
| | | 1 अंक | 2 | 3 | 4 | 5 | 6 | 10 अंक | |
| संस्कृतवाङ्मये वैदिकसाहित्यपरिचयः<br>(क) वैदिक साहित्य– (वेद–ब्राह्मणग्रन्थाः<br>(ख) आरण्यक – उपनिषद्– वेदागङ्गाः | 10 | 5 | – | – | – | 1 | – | | 2 |
| लौकिक साहित्य परिचयः –<br>(पुराण– रामायण – महाभारतम्) | 10 | | 5 | – | – | – | – | | 5 |
| काव्य परिचय :– एवं कविपरिचयः<br>पाठ्यपुस्तकाधारितं गद्य काव्यम् | 10 | 5 | – | – | – | 1 | – | | 2 |
| पद्य काव्यम् | 10 | 5 | – | – | – | 1 | – | | 2 |
| खण्डकाव्य (गीति काव्य) | 10 | 5 | – | – | – | 1 | – | | 2 |
| नाटक परिचयाः | 10 | – | 5 | – | – | – | – | | 5 |
| कथा साहित्यपरिचयः –<br>(हितोपदेश – पञ्चतन्त्र – लोककथा) | 10 | | 5 | – | – | – | – | | 5 |
| ऐतिहासिक काव्य एवं चम्पूकाव्य परिचयः | 10 | 10 | | – | – | – | – | | 2 |
| (क) मध्यप्रदेशस्य साहित्यं एवं साहित्यकाराणां परिचयः<br>(ख) वैदिकसाहित्ये – आरण्यक – उपनिषद् – वेदागङ्गपरिचयः | 10 | | 5 | – | – | – | – | | 5 |
| संस्कृतवाङ्मये प्रसिद्धनिबन्धाः एवं कविपरिचयः।<br>कालिदास – भवभूति–मासः भर्तृहरिः भारविः<br>बाणभट्टः– संस्कृतभाषा, दीपावलिः अस्माकं<br>संस्कृत विद्यालयः, | 10 | – | – | – | – | – | – | 1 | 1 |
| **योग** | **100** | **6** | **20** | | | **4** | | **1** | **31** |

# अनुक्रमणिका


| स.क्रं. | विवरणम् | पृष्ठ |
|---|---|---|
| प्रथमः अध्यायः | वैदिकसाहित्यपरिचयः | 01 |
| द्वितीयः अध्यायः | वेदाङ्गानि | 15 |
| तृतीयः अध्यायः | काव्यपरिचयः | 23 |
| चतुर्थः अध्यायः | लौकिकसाहित्यपरिचयः | 38 |
| पंचमः अध्यायः | प्रमुखाः कवयः | 52 |
| षष्ठः अध्यायः | गीतिकाव्यम् | 77 |
| सप्तमः अध्यायः | लोककथा परम्परा | 81 |
| अष्टमः अध्यायः | संस्कृत नाट्यकाराः | 85 |
| नवमः अध्यायः | निबन्धाः | 104 |

## प्रथमः अध्यायः

# वैदिक-साहित्य-परिचयः

(वेदोऽखिलोधर्ममूलम्) वेदाः भारतीयपरम्परायां ज्ञानस्य मूलमिति स्वीकृताः। वेदशब्दः ज्ञानस्य पर्यायः। वेदेभ्यः एव सर्वशास्त्राणां प्रक्रिया समारब्धा। ब्राह्मण-आरण्यक-उपनिषद्ग्रन्थाः वेदानां तत्त्वनिरूपकाः वर्तन्ते। ये विषयाः वेदेषु सूक्ष्मरूपेण संकेतिताः तेषां विस्तरः एतेषु वर्तते। वैदिकवाङ्मये वेदैः साकं ब्राह्मण-आरण्य-उपनिषदाम् अपि गणना भवति।

**ब्राह्मणग्रन्थानां परिचय : संवादविधा**

द्वौ छात्रौ परस्परं विवदमानौ। शिक्षकस्य प्रवेशः। छात्राः उत्थाय अभिवादनं कुर्वन्ति। आसन्दे उपविश्य।

आचार्यः - राकेश! किमर्थं विवादः?

राकेश - आचार्य! रमेशः वदति ब्राह्मणशब्दः जातिपरकः, अहं वदामि ब्राह्मणशब्दः ग्रन्थपरकः इति किं साधु आचार्य?

आचार्यः - उभयमपि साधु, ब्राह्मणशब्दः जातिपरकः अपि, ग्रन्थपरकः अपि वर्तते।

रमेश- आचार्य! जातिवाचकब्राह्मणशब्देन वयं परिचिताः, किन्तु ग्रन्थवाचकब्राह्मणशब्दस्य ज्ञानं नास्ति, अतः अद्य ब्राह्मणग्रन्थानां विषये ज्ञातुम् इच्छामः।

आचार्यः- अस्तु, अद्य ब्राह्मणग्रन्थान् अधिकृत्य बोधयामि। वैदिकवाङ्मयस्य अङ्गभूताः सन्ति ब्राह्मणग्रन्थाः। वेदानां संहितानन्तरं द्वितीयं बृहत्साहित्यं ब्राह्मणग्रन्थानाम् अस्ति। ब्राह्मणशब्दस्य जात्यर्थे प्रयोगः पुंल्लिङ्गे, तथा ग्रन्थार्थे ब्राह्मण शब्दस्य प्रयोगः नपुंसकलिङ्गे भवति। व्याख्यानात्मकग्रन्थानां नाम ब्राह्मणमस्ति।

मेधा - आचार्य! ब्राह्मणग्रन्थानां किं महत्त्वं वर्तते?

आचार्यः - मेधे! ब्राह्मणग्रन्थेषु यज्ञानाम् अनुष्ठानकाले, यज्ञावसरे प्रयुज्यमानस्य संहिताभागस्य विधि विधानानां संकलनं सुरक्षितम् अस्ति। ब्राह्मणसाहित्यम् अतीवव्यापकं विशालं चास्ति।

मनीषा- आचार्य! ब्राह्मणानां प्रतिपाद्यः विषयः कः?

आचार्यः- मनीषे! यद्यपि ब्राह्मणग्रन्थेषु नानाविधानां यज्ञानां विविधानुष्ठानानाम्, आख्यानानां, कर्ममीमांसादिविविधशास्त्राणां, नैककथानां विवेचनं प्राप्यते। तथापि एतेषां प्रतिपाद्यः विषयः त्रिषु भागेषु विभक्तः वर्तते तेषु विधिः, अर्थवादः, उपनिषद् चेति।

महेशः- आचार्य! कृपया विध्यादिप्रतिपाद्यविषयाणां सविस्तरं निरूपणं कुर्वन्तु।

आचार्यः- साधु वत्स! क्रमशः वदामि। प्रतिपाद्यविषयेषु प्रथमः विधिः अस्ति। विधिविषये यज्ञसम्बद्धाः कर्मकलापाः, दिशानिर्देशाः निर्दिश्यन्ते। यज्ञः श्रेष्ठकर्मरूपेण निरुपितः अस्ति। अस्य उद्घोषः विधिमार्गस्य प्राणः। वेदमन्त्राणां विश्लेषणं, व्याख्यानं तथा वैदिकपदानां व्याख्यात्मकं चिन्तनं ब्राह्मणानां विधिभागस्य मुख्यः विषयः अस्ति।

दिनेशः - आचार्य! अर्थवादस्य कः अभिप्रायः?

आचार्यः - वत्स! अर्थवादे निन्दायाः प्रशंसायाश्च द्वयोः एव निवेशो वर्तते। यथा यज्ञादिषु माषभक्षणं निन्द्यं तथा स्तोत्रपाठः प्रशंसनीयः। किं त्याज्यं, किं ग्राह्यं यज्ञादिषु तद् अर्थवादे वर्तते।

कविता-आचार्य! उपनिषदि किं वर्णितम् अस्ति?

कविते! - उपनिषत्सु आध्यात्मिकानां, दार्शनिकविचाराणां च समावेशः अस्ति। विद्या.अविद्ययोः ईश्वर-जीवयोः, माया-जगतोः विषये विचाराः प्रस्तुताः सन्ति। मनुष्याणां जरामरणयोः, बन्धमोक्षयोः विषयाः अपि वर्णिताः सन्ति।

सतीशः - आचार्य! मन्त्र-ब्राह्मणयोः कः भेदः?

आचार्यः - वत्स! मन्त्रभागस्य कर्मकाण्डे विनियोगो भवति, ब्राह्मणभागस्तु मन्त्राणां विनियोगस्य विधिं निर्दिशति। वेदशब्दः मूलतः वैदिकसंहितानाम् एव वाचकः, न तु ब्राह्मणग्रन्थानाम्- वैदिकसाहित्ये-ब्राह्मण-आरण्यक-उपनिषदां समावेशो भवति। तत्त्वतः मन्त्र-ब्राह्मणयोः भावभेदः रचनाभेदः प्रक्रियाभेदः विषयभेदश्च वर्तते।

विवेकः - आचार्य! कति सन्ति ब्राह्मणग्रन्थाः? किम् एतेषां रचना वेदानुसारं वर्तते वा पृथक्तया, कृपया बोधयन्तु।

आचार्यः - साधु प्रश्नः, वत्स! ब्राह्मणग्रन्थाः वेदानां संहितानुसारं वर्गीकृताः सन्ति। प्रत्येकमपि वेदस्य पृथक्-पृथक् ब्राह्मणग्रन्थः वर्तते। यथा-

ऋग्वेदस्य - द्वे ब्राह्मणे, ऐतरेयब्राह्मणम्, शांखायनं वा कौषीतकिब्राह्मणम्।

शुक्लयजुर्वेदस्य - शतपथब्राह्मणम्।

कृष्णयजुर्वेदस्य - तैत्तिरीयब्राह्मणम्।

सामवेदस्य - नवब्राह्मणग्रन्थाः सन्ति-ताण्ड्यब्राह्मणम्, षड्विंशब्राह्मणम्, सामविधानम्, आर्षेयब्राह्मणम्, दैवतब्राह्मणम्, उपनिषद्, संहितोपनिषद्, वंशब्राह्मणम्, जैमिनीयब्राह्मणम् इति। अथर्ववेदस्य-गोपथब्राह्मणम्। एवं प्रकारेण चतुर्दशब्राह्मणग्रन्थाः उपलभ्यन्ते।

गणेशः - आचार्य! तेषां ब्राह्मणानां विस्तृतं परिचयं कारयतु।

आचार्य :- आम् वत्स! पूर्व ऋग्वेदीयब्राह्मणयोः परिचयं कारयामि।

ऋग्वेदस्य प्रथमं ब्राह्मणम् ऐतरेयब्राह्मणमस्ति। ऐतरेये चत्वारिंशत्-अध्यायाः, अष्टौ पञ्चिकाः सन्ति। ऐतरेये होतृनामकस्य ऋत्विजः क्रियाकलापानां वर्णनमस्ति। अस्मिन्नेव प्रसिद्धस्य सोमयागस्य वर्णनं विद्यते। अग्निष्टोम-गवामयन-द्वादशाह-अग्निहोत्रादीनाम् अपि वर्णनमस्ति। अत्रैव राज्याभिषेकस्य, कुलपुरोहितस्यापि निरूपणमस्ति। ''चरैवेति-चरैवेति'' गाथाकारणेन विख्यातं ''शुनः शेपाख्यानम्'' अपि अस्मिन्नेव विद्यते। अस्मिन्नेव सोमाहरणकथा वर्णिताऽस्ति।

अस्य रचयिता ''महिदास ऐतरेयः'' कथ्यते। ऐतरेये ब्राह्मणे सायणाचार्येण भाष्यं लिखितम्। अस्मिन् एकादश प्रयाजदेवाः, एकादश अनुयाजदेवाः तथा च एकादश उपायदेवाः सन्ति।

ऋग्वेदस्य द्वितीये शांखायनब्राह्मणे त्रिंशत्-अध्यायाः सन्ति। 26 खण्डाः सन्ति। अत्रापि सोमयागः एव प्रधानविषयः।

हेमन्तः - आचार्य! यजुर्वेदीयब्राह्मणानां विषयवस्तुविषये ज्ञातुमिच्छामि!

आचार्यः - वत्स! यजुर्वेदस्यैकमेव ब्राह्मणं शतपथब्राह्मणम् इति। ब्राह्मणग्रन्थेषु अयं ग्रन्थः सर्वाधिकः विपुलकायः महत्त्वभूतः यज्ञीयविधीनां सर्वोत्तमः प्रतिपादकः अस्ति। इदं ब्राह्मणं द्विविधिं-माध्यन्दिनशाखीयम् काण्वशाखीयम् च।

माध्यन्दिनशाखीये ब्राह्मणे चतुर्दशकाण्डानि, शतम् अध्यायाः, अष्टषष्टिः प्रपाठकाः, 438 ब्राह्मणानि, 7624 कण्डिकाः सन्ति। इदं वाजसनेय ब्राह्मणम् अपि कथ्यते। अपरे काण्वशाखीये ब्राह्मणेऽपि 17 काण्डानि, 104 अध्यायाः, 425 ब्राह्मणानि, 6006 कण्डिकाः सन्ति। अत्र प्रपाठकोपखण्डः नास्ति।

सुरेशः - आचार्य! शतपथब्राह्मणस्य कर्ता कः अस्ति? अत्र के के महत्वपूर्णाः विषयाः वर्णिताः?

आचार्यः - वत्स! शतपथब्राह्मणस्य रचयिता महर्षियाज्ञवल्क्यः, एतस्मिन् ब्राह्मणे दर्श, पौर्णमास-अग्निहोत्र-चातुर्मास्य-वाजपेय-राजसूय-अश्वमेध-पुरुषमेध-अग्निरहस्य-सर्वमेधादिविषयाः विस्तरेण वर्णिताः सन्ति। अत्रैव पुरुरवा-उर्वशीकथा, दुष्यन्तपुत्रभरतस्य कथा, मत्स्यावतारकथा जलप्लावनम् महर्षिमनोः कथा प्रभृतिप्रसिद्धाः विषयाः वर्णिताः सन्ति। अत्रैव वाक्-सोमयोः आयानमपि वर्तते।

एतस्मिन् ब्राह्मणे 8 वसवः, 11 रुद्राः, 12 आदित्याः, आकाशः, पृथ्वी इत्येते त्रयस्त्रिंशद् (33) देवताः निरुपिताः सन्ति।

अपर्णा - आचार्य! कृष्णयजुर्वेदस्य एकमेव ब्राह्मणं तैत्तिरीयब्राह्मणमिति ज्ञातम्। तत्र के विषयाः सन्ति?

आचार्यः - अपर्णे! अत्र काण्डत्रयमेव। प्रथमे काण्डे अग्न्याधान-वाजपेय-सोम-राजसूयादियागविषयाः सन्ति। द्वितीये काण्डे सौत्रामणि बृहस्पतिसव वैश्यसवादि विषयाः, तृतीये च काण्डे नक्षत्रेष्टिवर्णनं वर्तते। कृष्णयजुर्वेदे मैत्रायणी ब्राह्मणे रात्रेः उत्पत्तिकथाऽपि वर्तते।

जगदीशः - आचार्य! सामवेदस्य नवब्राह्मणग्रन्थाः श्रीमता सूचिताः। एतेषां संक्षिप्तपरिचयं कारयन्तु।

आचार्यः - जगदीश! सामवेदस्य तिस्रः शाखाः सन्ति कौथुमशाखा - राणायनीय शाखाए जैमिनीय शाखा च। तदनुसारमेव ब्राह्मणग्रन्थाः विभक्ताः सन्ति। क्रमशः विषयनिरूपणं करोमि-श्रूयताम्।

सामवेदस्य प्रथमं ब्राह्मणं ताण्ड्यब्राह्मणम्। ताण्ड्यं पंचविंशब्राह्मणं, प्रौढब्राह्मणमपि कथ्यते। अयं विशालकायः ग्रन्थः। एतं महाब्राह्मणमित्यपि कथ्यते। अस्य कर्ता सामवेदीयः आचार्यः ताण्डिः। जैमिनीयब्राह्मणे ताण्ड्यम् इति। अस्मिन् 25 अध्यायाः सन्ति। पञ्चपञ्चाध्यायानां पञ्चपञ्चिकाः अत्र सन्ति। अस्मिन् मुख्यः प्रतिपाद्यविषयः सोमयागः। ज्योतिष्टोमतः आरभ्य सहस्रवर्षात्मकानां सोमयागानां वर्णनमत्रैव विद्यते। आहत्य 178 सोमयागानां वर्णमत्र विद्यते।

रमेशः - सामवेदस्य अन्येषामपि ब्राह्मणानां विषये पाठयन्तु आचार्य!

आचार्यः - अस्तु, षड्विंश ब्राह्मणे 26 अध्यायाः सन्ति। सायणभाष्यानुसारं इदं ताण्ड्यस्यैव परिशिष्टभागः। एतस्यादौ पञ्चाध्यायेषु यज्ञविषयः अन्तिमेऽध्याये भूकम्प-अतिवृष्टि-अकाल-अनिष्ट-कुस्वप्न-

अपशकुन-उत्पातादीनां शमनार्थम् उपायाः सन्ति। इदम् ''अद्भुतब्राह्मणमपि'' कथ्यते। अस्मिन् यज्ञीयविधानप्रसंगे 26 आख्यायिकाः सन्ति। इन्द्र-अहल्याख्यानम् अति-प्रसिद्धमेव।

सामविधानब्राह्मणम्-अस्मिन् त्रयः प्रपाठकाः पंचविंशतिः अनुवाकाः सन्ति। प्रथमे प्रपाठके प्रजापतेः सृष्टेरुत्पत्तिः, सामप्रशंसा, सामस्वराणां देवताः, यज्ञः, अतिकृच्छव्रतानि, स्वाध्यायः, पापानां प्रायश्चित्तस्वरूपम् इत्यादिविषयाः सन्ति।

द्वितीये तृतीये प्रपाठके च काम्यकर्माणि, रोगनिवृत्तिः क्षेत्रप्रयोगाः राज्याभिषेकः, अभिचारशान्तिः युद्धविजयम्, सामसम्प्रदायप्रवर्तकानां वर्णनमस्ति।

आर्षेयब्राह्मणम्-एस्मिन् त्रयः प्रपाठकाः 82 खण्डेषु विभक्ताः। सामगानस्य वैज्ञानिक-अध्ययनस्य कृते विशेषपयोगि। अत्र सामगानं ग्रामगेयम्, अरण्यगेयम् इति द्विविधम्।

**दैवतब्राह्मणम्** -

इदं सूत्रशैल्या लिखितं वर्तते। अस्य चत्वारः खण्डाः। अस्मिन् सामगानस्य देवतानां वर्णनमस्ति। अग्नि-इन्द्र-प्रजापति-सोम-वरुण-त्वष्टा-अंगिरस्-पूषन्-सरस्वती-इन्द्राग्नीप्रभृतिसम्बद्धानां सामगानानाम् उल्लेखोऽस्ति। चतुर्थे खण्डे गायत्रीसामस्य आधाररूपायाः गायत्र्याः अंगानां देवरूपता निरुपिता अस्ति। भाषाशास्त्रदृष्ट्या अस्य निर्वचनखण्डः महत्त्वपूर्णः।

आचार्यः - वत्स! सामवेदस्य षष्ठब्राह्मणम् उपनिषद्ब्राह्मण्। एतस्यापरं नाम ''छान्दोग्यब्राह्मणम्'' वर्तते। अस्मिन् 10 प्रपाठकाः सन्ति। अस्य भेदद्वयम् 'मन्त्रब्राह्मणम्' छान्दोग्योपनिषत् चेति।

आदेः प्रपाठकद्वये मन्त्रपर्व वर्णितम्। प्रत्येकं प्रपाठकस्य 8-8 खण्डाः। अत्र मन्त्राणां संख्या 268 अस्ति। छान्दोग्येपनिषद् कौथुमशाखासम्बद्धा। अत्र 8 प्रपाठकाः। शंकराचार्येण एतस्य भाष्यं कृतम्। अस्मिन् नैकानि प्रसिद्धानि आख्यानानि सन्ति, तेषु दाल्भ्य-प्रवाहणसंवादः सत्यकामकथा, अश्वपतेः आख्यानम्, रैक्वाख्यानम्, उषस्तिकथा, उद्दालकश्वेतकेतुसंवादः, सनत्कुमारनारदसंवादः प्रमुखाः सन्ति।

**संहितोपनिषद् ब्राह्मणम्** -

एतद् शास्त्रीयगायनदृशा महत्त्वभूतम्। सामगानस्य वैज्ञानिकं स्वरूपमत्र वर्णितमस्ति। एतस्य पंचखण्डाः सूत्रेषु विभक्ताः। प्रथमे खण्डे त्रिधा गानसंहितानां निरूपणम् द्वितीये तृतीये च सामगानस्य शास्त्रीयविवेचनम्।

**जैमिनीयब्राह्मणम्**-

जैमिनीशाखायाः ब्राह्मणत्रयम्। जैमिनीयब्राह्मणम् जैमिनीयार्षेयब्राह्मणम् जैमिनीयोपनिषद्ब्राह्मणम्।

जैमिनीयब्राह्मणे काण्डत्रयम्। काण्डाश्च खण्डेषु विभक्ताः सन्ति। प्रथमखण्डे 364, द्वितीयखण्डे 442, तृतीयखण्डे 386 मन्त्राः सन्ति। विषयानुसारं प्रथमे काण्डे नित्य-काम्यभेदात् द्विधाग्निहोत्रस्वरूपम् वर्णितमस्ति। द्वितीये काण्डे एकाहत द्वादशाहपर्यन्तं यागानां वर्णनमस्ति। तृतीये च भौगोलिकविषयाः, सामानाञ्च भौतिकलाभोपायाः निर्दिष्टाः सन्ति।

**जैमिनीयार्षेयब्राह्मणम्** -

एतस्मिन् ऋषि-देवता-छन्दसां विवरणं लभ्यते। इदं कौथुमशाखायाः ब्राह्मणम्।

**जैमिनीयोपनिषद्ब्राह्मणम्**-

एतस्यापरं नाम ''तवल्कार उपनिषद्ब्राह्मणम्'' इत्यप्यस्ति। इदं चतुर्षु अध्यायेषु विभक्तम्। अत्रैका

ज्ञानपरम्परा प्रदर्शिता। तदनुसारं ब्राह्मणः प्रजापतिः, प्रजापतेः परमेष्ठी, परमेष्ठिनः सविता, सवितुः अग्निः, अग्नेः इन्द्रः, इन्द्रात् कश्यपः पवित्रं ज्ञानमाप्तवानिति।

पूजा-आचार्य! अथर्ववेदीयब्राह्मणे किं किं वर्णितमस्ति, तस्य स्वरूपं किमस्ति इत्यपि ज्ञातव्यम् कृपया उपदिशन्तु।

आचार्यः - पूजे! अथर्ववेदस्यैकम् एव ब्राह्मणम् गोपथब्राह्मणमिति। एतद् पैप्पलादशाखासम्बद्धम्। एतस्य कर्ता गोपथऋषिः वर्तते। अस्मिन् पूर्वोत्तरेति भागद्वयम्। अस्मिन् एकादश प्रपाठकाः सन्ति। गोपथशब्देन एकादशेन्द्रियाणां ग्रहणं भवति।

अत्र प्रथमे प्रपाठके सृष्टेरुत्पतिः प्रणयोपनिषद् गायत्री-उपनिषद् इति वर्तते। द्वितीये ब्रह्मचारिणः कर्त्तव्यानि, यज्ञीयतत्त्वानि। तृतीये यज्ञविवेचनं ब्राह्मणः महत्त्वं, अग्निहोत्राग्निष्टोमयोः रहस्यात्मकव्याख्या, चतुर्थे गवामयनम् सत्रयागमीमांसा, आध्यात्मिकचिन्तनम्, पंचमे संवत्सरसत्रम् अश्वमेधः ऋत्विजां कर्तव्यानि।

उत्तरभागेऽपि प्रथमे दशपूर्णमासयागः चातुर्मास्यादयः - द्वितीये सोमयागः प्रायश्चित्तम्, तृतीये

वषट्कारः एकाहयज्ञः चतुर्थे तृतीयसवनम्, षोडशीयागः, पञ्चमे अतिरात्रम् वाजपेयः अहीनयज्ञः, षष्ठे च षडहयज्ञः कुन्तापसूक्तादयः वर्णिताः सन्ति।

(सर्वे छात्राः उत्थाय)

आचार्य! अद्य वयं ब्राह्मणग्रन्थानां विषये विस्तरेण ज्ञातवन्तः। एत-एव वैदिकतत्त्वानां रहस्योद्घाटकाः भवन्ति। अस्माकं वैदिकं वाङ्मयं विशालं वर्तते। वेदमन्त्राणां सम्यक् बोधाय ब्राह्मणग्रन्थाः आवश्यकाः। एतेषु न केवलं वेदानां यज्ञीयं स्वरूपं विद्यते, अपितु आध्यात्मिकं, आधिदैविकम्, वैज्ञानिकं च ज्ञानं सुरक्षितं वर्तते।

## आरण्यकवाङ्मयम्

फलके 'तत्त्वमसि' अहं 'ब्रह्मास्मि' इति वाक्यद्वयं लिखित्वा एकः छात्रः आगच्छति। एतयोः महावाक्ययोः आधारः कः? इति जिज्ञासायां छात्राः सन्ति, तदैव शिक्षकस्य प्रवेशः। सर्वे उत्थाय अभिवादनं कुर्वन्ति।

आचार्यः - भोः छात्राः। अद्य किं पठनीयम्?

सुरेशः - आचार्य! सतीशः अद्य कुतश्चित् श्रुत्वा ''तत्त्वमसि'' एवं ''अहं ब्रह्मास्मि'' इति वाक्यद्वयम् फलके लिखितवानस्ति। अद्य एतयोः विषये बोधयन्तु। एतयोः कः अर्थः?

आचार्य :- साधु वत्स। इदं वाक्यद्वयं वेदान्तदर्शनस्य महावाक्यम् इति। ''तत्त्वमसि'' इत्यस्य अर्थोऽस्ति तद् ब्रह्म एव जीवरूपम् इति। इयम् अनुभूतेः साधनायाः पराकाष्ठा, वेदान्तदर्शनस्य चरमनिष्कर्षः।

वन्दनाः - आचार्य। एतयोः महावाक्ययोः आधारः कः?

आचार्यः - वन्दने! शांखायन आरण्यकग्रन्थे एतयोः महावाक्ययोः प्रयोगः सर्वप्रथममम् अभवत्।

सुधीरः - आचार्य! आरण्यकग्रन्थाः के, कतिविधिाः किञ्च तेषां स्वरूपं महत्त्वं कृपया शिक्षयन्तु।

आचार्यः - वत्स! आरण्यकग्रन्थानाम् उद्भवः ब्राह्मणग्रन्थानाम् अनन्तरम् अभवत्। ब्राह्मणग्रन्थेषु यज्ञीयाः विषयाः अधिकाः सन्ति, आरण्यकेषु अध्यात्मपरकाः विषयाः सन्ति। आरण्यकेषु यज्ञानां गूढरहस्यं

ब्रह्मविद्यायाः प्रतिपादनञ्च वर्तते। महाभारतानुसारम्, आरण्यकग्रन्थाः वेदानां सारभागाः। वेदानां ब्राह्मणग्रन्थानां दार्शनिकसंकेतानां विशदीकरणम् आरण्यकेषु दृश्यते। आरण्यकेषु भौतिकवादाद् अध्यात्मं प्रति तत्त्वनिरूपणं विद्यते।

मयङ्कः - आचार्य! आरण्यकशब्दस्य अर्थः कः?

आचार्यः - अरण्ये भवम् आरण्यकम् इति। वने क्रियमाणस्य अध्ययनाध्यापनस्य चिन्तनस्य, मननस्य, शास्त्रीयनिरूपणस्य, अध्यात्मिकविषयस्य स्वरूपम् आरण्यकेषु प्रतिफलितं जातम्।

रघुवीरः - आचार्य! किं यथा ब्राह्मणग्रन्थाः वेदविशेषेण सम्बद्धाः सन्ति, किन्तथैव आरण्यकान्यपि वेदसम्बद्धानि सन्ति?

आचार्यः - आम्! आरण्यकग्रन्थाः अपि वेदेभ्यः सम्बद्धाः। ब्राह्मणग्रन्थानाम् अन्तिमभागाः एते ग्रन्थाः। सामान्यतया यैः महर्षिभिः ब्राह्मणग्रन्थाः लिखिताः तैरेव आरण्यकग्रन्थाः अपि लिखिताः।

प्रणवः - आचार्य! वेदानुसारम् आरण्यकानां परिचयं ज्ञातुमिच्छामः, कृपया बोधयन्तु

आचार्यः - साधु वत्स! अहं क्रमशः आरण्यकानां परिचयं कारयामि। सम्प्रति षड् आरण्यकानि एव लभ्यन्ते। तेषां वेदानुसारं क्रमः निम्नानुसारं दीयते-

**ऋग्वेदस्यारण्यकम्**- ऋग्वेदसम्बद्धम् आरण्यकम्। ऐतरेयम् शांखायनम् इति। ऐतरेयारण्यकस्य रचयिता महिदासः ऐतरेयः अस्ति। शांखायनारण्यकस्य प्रवक्ता गुणशांखायनः वर्तते।

**शुक्लयजुर्वेदस्यारण्यकम्**- बृहदारण्यकमस्य शुक्लयजुर्वेदस्यारण्यकम्, इदं माध्यन्दिनशाखायां, काण्वशाखायां च प्राप्यते। एतस्यारण्यकस्य प्रवचनकर्ता महर्षिः याज्ञवल्क्यः अस्ति।

**कृष्णयजुर्वेदस्यारण्यकम्**- कृष्णयजुर्वेदस्य तैत्तिरीय काठकशाखयोः एकमेव आरण्यकम् तैत्तिरीयम् आरण्यकम्। मैत्रायणीशाखायाः मैत्रायणीयम् आरण्यकम् इदं मैत्रायणीय-उपनिषद् अपि कथ्यते। तैत्तिरीयमैत्रायणीयारण्यकयोः कर्ता ऋषिःकठः वर्तते।

**सामवेदस्यारण्यकम्**- सामवेदस्य जैमिनिशाखायाः आरण्यकं ''तवल्लकार-आरण्यकम्'' इदं 'जैमिनीय-उपनिषद् ब्राह्मणम्' अपि निगद्यते। एतस्यारण्यकस्य प्रवक्ता महर्षिः जैमिनिः अस्ति।

**अथर्ववेदस्यारण्यकम्** :- अथर्ववेदस्य पृथक्तया आरण्यकं नास्ति। गोपथब्राह्मणस्य ब्रह्मविद्यापरकाः केचन अंशाः एव आरण्यकपदेन वक्तुं शक्याः।

अपरेन्दुः - आचार्य! वेदानुसारम् आरण्यकानां परिचयः अस्माभिः प्राप्तः। इदानीं कृपया आरण्यकानां वर्ण्यविषयस्वरूपं ज्ञातुमिच्छामः।

आचार्यः - साधु, सम्प्रति क्रमादेव आरण्यकानां वर्ण्यविषयस्वरूपं प्रस्तौमि। तद्यथा -

**ऐतरेयआरण्यकम्** - ऐतरेयमारण्यकन्तु ऐतरेयब्राह्मणस्य परिशिष्टभागः। एतस्य विषयाः पञ्च आरण्यकम् अथवा प्रपाठक इति नाम्ना अभिहिताः। ते च पुनः अध्यायेषु विभक्ताः। प्रथमे महाव्रतस्य वर्णनम् अस्ति। अस्मिन् प्रयोज्यमन्त्राणाम् आध्यात्मिकव्याख्या वर्तते। द्वितीये निष्कैवल्यम्, प्राणविद्या, पुरुषस्य च विवेचनम् अस्ति। तृतीये संहिता-पदपाठ-क्रमपाठ-स्वर-व्यञ्जनानां स्वरूपविवेचनं वर्तते। इदं संहितोपनिषद् इत्यपि कथ्यते। चतुर्थे: महानाम्नी ऋचाणां संकलनं विद्यते। प्राणविद्यायाः स्वरूपम्, आत्मस्वरूपवर्णनम् स्त्रियाणां महत्त्वम्, भाषाविज्ञानम्, आचारसंहिता एते विषयाः अस्मिन्नेव आरण्यके निर्दिष्टाः वर्तन्ते।

**शांखायनम् आरण्यकम्** -

इदं ऋग्वेदीयमारण्यकम्। अस्मिन् 15 अध्याया: सन्ति प्रथमे द्वितीये चाध्याये महाव्रतस्य वर्णनम्

तृतीयत: षडाध्यायपर्यन्त: भाग: ''कौषीतकि उपनिषद्'' कथ्यते। सप्तमत: अष्टमाध्यायपर्यन्तं ''संहितोपनिषद्'' इति वर्तते।

नवमे प्राणतत्त्वस्य वर्णनम्, दशे आध्यात्मिकम् अग्निहोत्रम्, एकादशे मृत्युनिराकरणाय विशेषयागविध ानम्, द्वादशे समृद्धयर्थं बिल्वफलात् मणिनिर्माणविधि:, त्रयोदशे शरीरशुद्धि: तपस्या, श्रद्धा, दम: इत्येतेषां आवश्यकतानिरूपणम् चतुर्दशे ''अहं ब्रह्मास्मि'' महावाक्यविमर्श: वेदार्थज्ञानम् पञ्चदशे आचार्याणां वंशपरम्परा वर्णितास्ति।

**बृहदारण्यकम्**- इदं शुक्लयजुर्वेदीयमारण्यकम्। इदं शतपथब्राह्मण: अन्तिमे चतुर्दशे काण्डे प्रोल्लिखितम् अस्ति। आरण्यकस्यापेक्षया इदं उपनिषद्रूपेण प्रसिद्धम्। अस्मिन् आत्मतत्त्वस्य निरूपणं विद्यते।

तैत्तिरीयारण्यकम् - इदं कृष्णयजुर्वेदस्य तैत्तिरीयशाखाया: आरण्यकम् अस्ति। अस्मिन् 10 प्रपाठका: सन्ति। प्रपाठकानाम् उपविभागा: अनुवाका: वर्तन्ते। प्रपाठकानां प्रथमपदाधारेण नामानि निश्चितानि सन्ति। तानि-भद्र-सहवै-चिति-युञ्जते-देववै-परे-शिक्षा-ब्रह्मविद्या-भृगु-नारायणीयानि। एतस्य द्वितीये प्रपाठके स्वाध्याय: पञ्चमहायागा: च वर्णिता:।

प्रथमे प्रपाठके अग्ने: उपासना, इष्टिकाचयनम् तृतीये चातुर्होत्रचिते: निरूपणम्, चतुर्थे प्रवर्ग्यहोम:, पञ्चमे यज्ञीयविषया:, षष्ठे पितृमेधसम्बद्धमन्त्राणां संकलनम्, सप्तमत: नवं पर्यन्तं तैत्तिरीयोपनिषद्, दशमे महानारायणीयोपनिषद् च वर्तते।

**मैत्रायणीयारण्यकम्**- इदं कृष्णयजुर्वेदस्य मैत्रायणीयशाखाया: आरण्यकम्। इदं मैत्रायणीयोपनिषद् इति नाम्नापि प्रसिद्धम्। अस्मिन् सप्तप्रपाठका: सन्ति। प्रपाठकाश्च खण्डेषु विभक्ता: सन्ति। एतस्य प्रथमे प्रपाठके ब्रह्मयज्ञ:, राजाबृहद्रथस्य वैराग्यम्, द्वितीये शाकान्येन ब्रह्मविद्याया: उपदेश:, तृतीये जीवात्मन: स्वरूपर्णनम्, कर्मफलम्, पुनर्जन्मवर्णनम्, चतुर्थे ब्रह्मसायुज्यप्राप्ते: उपाया:, पञ्चमे कौत्सायनी स्तुति:, ब्रह्मण: नानारूपस्थिति:, षष्ठे आत्मयज्ञस्य वर्णनं षडंगयोग: शब्दब्रह्मनिरूपणम्, सप्तमे च आत्मस्वरूपविवेचनं वर्तते।

**तवल्कार-आरण्यकम्** -

इदं सामवेदस्य जैमिनीशाखाया: आरण्यकमस्ति। इदं जैमिनीयोपनिषद्नाम्ना अपि प्रसिद्धम्। एतस्मिन्

चत्वार: अध्याया:, अध्यायाश्च अनुवाक खण्डयो: विभक्ता: सन्ति।

अत्र प्रथमेऽध्याये ''ऊँ-गायत्री'' इत्यनयो: महत्त्वम्, द्वितीये सृष्टिप्रक्रिया, तृतीये अतिमानवीयशक्तिप्राप्ते: उपाया:, चतुर्थे प्राचीनधार्मिकमान्यता:, पञ्चमे सामगानतत्त्वस्य व्याख्या, षष्ठे प्राचीनाभाषा, प्राचीनं व्याकरणम्, प्राचीना शब्दावली, सप्तमे च देवशास्त्रीयानि ऐतिहासिकानि तथ्यानि वर्णितानि सन्ति।

छात्रा - धन्यवाद: आचार्य! अद्य वयम् आरण्यकवाङ्मयविषये सविस्तरं ज्ञातवन्त:। इदमपि ज्ञातम् अस्माभि: यद् आध्यात्मिकविषयाणाम् आरम्भ: आरण्यकेभ्य: व्यवस्थितरूपेण संजात:। एतेषां ज्ञानेन वेदानां तत्त्वबोध: सहज: भवति।

## उपनिषदः

(कक्षायां छात्राः विवेकानन्दजयन्त्याः सज्जतां कुर्वन्तः सन्ति। एकः छात्रः विवेकानन्दस्य ध्येयवाक्यं फलके लिखति ''उत्तिष्ठत् जाग्रत प्राप्य वरान् निबोधत'' इति। तदैव आचार्यः प्रविशति। छात्रः फलकं दर्शयन् आचार्यं पृच्छति।)

प्रतीकः - आचार्य! एतद् विवेकानन्दस्वामिनः ध्येयवाक्यम् अस्ति, एतस्यार्थं ज्ञातुम् इच्छामि।

आचार्यः - प्रतीक! एतस्य तात्पर्यम् अस्ति सर्वदा जागरूकः भूत्वा प्रबुद्धः सन् श्रेष्ठजनान् पृष्ट्वा लक्ष्यप्राप्तिं यावत् परिश्रमः करणीयः इति।

अपराजिता - आचार्य! इयं सूक्तिः कस्मिन् ग्रन्थे लिखिता वर्तते?

आचार्यः - अपराजिते। सूक्तिरियं कठोपनिषदि लिखिता वर्तते।

अशोकः - आचार्य! किम् उपनिषदः अपि वेदसम्बद्धाः सन्ति?

आचार्यः - आम्। यथा ब्राह्मणग्रन्थाः आरण्यकग्रन्थाः वेदेभ्यः सम्बद्धाः सन्ति तथैव उपनिषदः अपि सन्ति।

सत्यजितः - आचार्य! 'उपनिषद्' शब्दस्य निरुक्तिः कथं भवति?

आचार्यः - वत्स! 'उपनिषद्' शब्दस्य अर्थः अस्ति तत्त्वज्ञानाय गुरोः समीपे सविनयम् उपवेशनम्। शङ्कराचार्येण उपनिषदः अर्थः ''ब्रह्मविद्या'' इति कृतः। तदनुसारम् अविद्यानाशः, ब्रह्मप्राप्तिः दुःखनिरोधः एते त्रयः अर्थाः भवन्ति।

पुरुषोत्तमः - आचार्य! 'उपनिषद्' शब्दे कः धातुः कः उपसर्गः? कः प्रत्ययः?

आचार्यः - वत्स! 'उपनिषद्' शब्दे उप नि इत्युपसर्गौ, सद् (षद्लृ) धातुः, क्विप् प्रत्ययः अस्ति।

पुष्पराजः - आचार्य! उपनिषदः कति सन्ति?

आचार्यः - वत्स! उपनिषदां संख्याविषये मतैक्यं नास्ति। एतासां संख्या 108तः 200 पर्यन्तम् इति कथ्यते।

परन्तु श्रीमदाद्यशङ्कराचार्यैः दश उपनिषत्सु पाण्डित्यपूर्णं भाष्यं लिखितम्। मुक्तिकोपनिषदि ''दशोपनिषदं पठ'' इति निर्देशेन, दश एवं उपनिषदः प्रामाणिकाः विद्वद्भिः अनुमोदिताश्च।

उर्वि - आचार्य! कानि तेषां दशोपनिषदां नामानि?

आचार्य :- ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः। ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा।

परन्तु एतदतिरिच्य श्वेताश्वर-कौषीतकि-मैत्रायणीयोपनिषदः अपि शांकरभाष्ये उद्धृताः। अतः एतासां योजनेन उपनिषदां त्रयोदशसंख्या भवति।

प्रशस्तः - आचार्य! एतासाम् उपनिषदां संक्षिप्तरूपेण परिचयं ज्ञातुमिच्छामि।

आचार्यः - वत्स! क्रमशः एतासां विषयानुसारं परिचयं कारयामि। जानन्तु एतासु प्रथमा उपनिषद् ईशोपनिषद् वर्तते।

**ईशोपनिषद्** -

इयमुपनिषद् सर्वोनिषदां सारभूतास्ति। अस्यां वर्णितसिद्धान्तानाम् एव विशदीकरणम् अन्यासु जातमिति।

एषोपनिषद् मूलरूपेण यजुर्वेदस्य चत्वारिंशततमः अध्यायः अस्ति। अस्याम् अष्टादशमन्त्राः सन्ति।

''ईशावास्यमिदं सर्वं यत् किं च जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्।।'' (ईश-1)

''विद्ययाऽमृतमश्नुते।'' (ईश-11)

''अग्ने नय सुपथा राये अस्मान्।'' (ईश-18)

इत्यादयः अस्याः प्रसिद्धाः सूक्तयः सन्ति।

रामकृष्णः - आचार्य! ''विद्ययाऽमृतमश्नुते'' इति तु नैकासु शिक्षणसंस्थासु ध्येयवाक्यरूपेण स्वीकृतं विद्यते। अस्माकं विद्यालयेऽपि एतदेव लिखितं वर्तते।

आचार्यः - साधूक्तम्। इदं वाक्यं बहुत्र स्वीकृतं वर्तते। अस्यां त्यागभावेन संसारस्योपभोगः, ईश्वरस्य व्याप्तिः, कर्ममार्गात् भौतिकसुखं, ज्ञानमार्गात् मोक्षः इत्यादयः विषयाः वर्तन्ते।

आचार्यः - इदानीम् अवशिष्टानाम् उपनिषदां परिचयं कारयामि।

**केन-उपनिषद्**

एषा ''तवल्कारोपनिषद्'' इति नाम्नापि प्रसिद्धा। अस्यां चत्वारः खण्डाः सन्ति। आदेः खण्डद्वयं पद्यात्मकं, शेषभागः गद्यात्मकः। एतस्याः सम्बन्धः सामवेदाद् अस्ति।

प्रथमे खण्डे निर्गुणब्रह्मणः स्वरूपं, द्वितीयखण्डे ब्रह्मणः अवर्णनीयत्वम् अनिर्वचनीयत्वं प्रतिपादितम् अस्ति। तृतीये चतुर्थे च ब्रह्मणा देवानां परीक्षा, ब्रह्मणः शक्त्या एव इन्द्रादिषु देवेषु शक्तिः ब्रह्मप्राप्तये जपतपादिनियमाः वर्तन्ते।

**कठ-उपनिषद् -**

इयं कृष्णयजुर्वेदस्य कठशाखायाः सम्बद्धा। अस्यां द्वौ अध्यायौ, प्रत्येकम् अध्याये खण्डत्रयम्। अस्यां काव्यात्मकमनोरमशैल्या गूढदार्शनिकतत्त्वानां विवेचनं विद्यते। अस्यामेव सुप्रसिद्धः यम-नचिकेतासंवादः वर्णितः अस्ति।

''न जायते म्रियते वा विपश्चित्'' (1.2.18)

''अणोरणीयान् महतो महीयान्'' (1.2.20)

''नायमात्मा प्रवचनेन लभ्यः'' (1.2.22)

''उत्तिष्ठत् जाग्रत प्राप्य वरान् निबोधत'' (1.3.14)

एतस्याः लोकप्रसिद्धाः सूक्तयः सन्ति।

**प्रश्न-उपनिषद् -**

इयम् अथर्ववेदसम्बद्धा उपनिषद् वर्तते। अस्यां ब्रह्मविद्याज्ञानाय षण्णां ऋषीणां षड्प्रश्नाः सन्ति। महर्षिः

पिप्पलादः उत्तराणि अयच्छत्। अस्यां प्राणेभ्यः सृष्टेरुत्पत्तिः वर्णितास्ति।

तपस्या-ब्रह्मचर्य-श्रद्धा-विद्यासाधनैः एव आत्मतत्त्वस्य ज्ञानं भवतीति अत्र निर्णीतम्।

**मुण्डक-उपनिषद्** -

एषोपनिषद् अपि अथर्ववेदसम्बद्धा वर्तते। अस्याः निर्माणं मुण्डितैः सन्यासिभिः अभवत्। अस्यां त्रयः मुण्डकसंज्ञकाः अध्यायाः सन्ति। तदपि प्रत्येकं खण्डद्वये विभक्तम्। अस्यामुपनिषदि ब्रह्मा ज्येष्ठपुत्राय अथर्वणे ब्रह्मविद्याम् उपदिष्टवान्। परा-अपराविद्या, सृष्टेरुत्पत्तिः, कर्मकाण्डस्य हीनता, सत्यस्य विजयः, सत्येन तपसा च ब्रह्मप्राप्तिः इत्येते विषयाः अस्यां वर्तन्ते।

सत्यमेव जयते नानृतम्' (3.1.6) इयं विश्वप्रसिद्धा सूक्तिः अस्यामेव वर्तते।

**माण्डूक्य - उपनिषद्** -

इयं लघुकाया उपनिषद् यस्यां द्वादश वाक्यानि सन्ति, एतस्याः भावगाम्भीर्य महत्त्वपूर्णम् अस्ति।

अस्यामुक्तं यत् संसारः, वर्तमान-भूत-भविष्यत् कालस्वरूपं सर्वमेव ओंकारादेव उत्पन्नम्। आत्मा चतुष्पात्, चतुर्थावस्था तुरीयावस्था, इयं च अवर्णनीया अस्ति।

**तैत्तिरीय उपनिषद्**- कृष्णयजुर्वेदसम्बद्धेयम् उपनिषद्। तैत्तिरीय-आरण्यकस्य एव सप्तमतः नवमपर्यन्तगाः त्रयः प्रपाठकाः ''तैत्तिरीयोपनिषद्'' नाम्ना ज्ञायन्ते। प्रपाठकानां नामानि अपि परिवर्तितानि सन्ति संहितोपनिषद्-शिक्षावल्ली, वारुणी-उपनिषद् ब्रह्मानन्दवल्ली तथा अन्तिमः भृगुवल्ली इति।

शिक्षावल्यां प्राचीनं शिक्षाशास्त्रम् भाषाविज्ञानम् वर्ण-स्वर-मात्रा-बलादीनां निरूपणम्, ब्रह्मणः व्याख्या, दीक्षान्तोपदेशः एते विषयाः सन्ति।

**ब्रह्मानन्दवल्ली**- अन्न-प्राण-मनस्-विज्ञान-आनन्दमयेति पञ्चकोशानां वर्णनम् अन्नस्य स्वरूपम् च वर्तते।

**ऐतरेय-उपनिषद्**-

ऋग्वेदसम्बद्धेयम् उपनिषद् ऐतरेयब्राह्मणस्यैव अंशभूता। अस्यां त्रयः अध्यायाः सन्ति। अस्यां परमात्मनः ईक्षणात्सृष्टिः, प्रथमं जलसृष्टिः, द्वितीये पुनर्जन्मसिद्धान्तस्य प्रतिपादनम्, तृतीये प्रज्ञानब्रह्मणः वर्णनम् अस्ति।

**छान्दोग्य-उपनिषद्**- इयं सामवेदीयोपनिषद्। अस्याम् अष्टप्रपाठकाः सन्ति। प्राचीनतया, प्रौढतया, ब्रह्मज्ञानप्रतिपादनरीत्या, प्रमेयबहुलतया चेयम् अतिमहत्त्वपूर्णा।

अस्यां प्रथमे ऋक्-सामयोर्युग्मम् वाङ्-मनस्-प्राणानाम् उपासना, द्वितीये पञ्चविधसामोपासना त्रयीविद्या, तृतीये सूर्योपासना, गायत्रीमहत्त्वम्, चतुर्थे रैक्वेण अध्यात्मशिक्षोपदेशाः सत्यकामजाबालकथा, पंचमे प्राणश्रेष्ठता, सृष्ट्युत्पत्तिविषयकाः दार्शनिकसिद्धान्ताः, षष्ठे आरुणिश्वेतकेतोः संवादे द्वैतवादोपदेशः, सप्तमे सनत्कुमारस्य नारदायोपदेशः, अष्टमे इन्द्रविरोचनाभ्यां प्रजापतिना आत्मज्ञानस्य उपदेशः, आत्मप्राप्तेः व्यावहारिकाः उपायाः सन्ति।

''सर्व खल्विदं ब्रह्म''। (3.14.1)

''तत् त्वमसि''। (6.8.7)

इति महावाक्यद्वयम् अस्यामुपनिषदि वर्तते।

**बृहदारण्यक-उपनिषद्**-

इयं शतपथब्राह्मणस्य चतुर्दशकाण्डस्य अन्तिमभागरूपा शुक्लयजुर्वेदसम्बद्धा च वर्तते। इयम् विशाला

तत्त्वज्ञाननिरूपणात् प्रमुखास्ति। अस्याः विवेचनं गभीरम् उदात्तं प्रामाणिकमिति विद्वान्सः मन्यन्ते। अस्यां षडध्यायाः, ते च उपखण्डेषु विभक्ताः सन्ति।

अत्र प्रथमे यज्ञीयाश्वस्य परमपुरुषरूपेण वर्णनं, मृत्योः विकरालरूपं, जगतः उत्पत्तिः, प्राणस्य श्रेष्ठता, द्वितीये गार्ग्यकाशिराजयोः संवादः, ब्रह्मणः मूर्तामूर्तरूपभेदः कात्यायनी-मैत्रैयी-कथा, याज्ञवल्क्येन मैत्रेय्याः कृते ब्रह्मविद्योपदेशः पञ्चमे प्रजापतेः देव-मनुष्य-असुरेभ्यः उपदेशः षष्ठे च

ऋषिप्रवाहणजाबालि-श्वेतकेतोः दार्शनिकसंवादः पंचाग्निमीमांसा, उपनिषदीयऋषीणां वंशपरम्परा च वर्णितास्ति।

''द द द'' इत्युपदेशः (बृ 5.2.1)

''आत्मा अरे वा द्रष्टव्यः श्रोतव्यो मन्तव्यो निधिध्यासितव्यो - (4.5.6)

''असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्माऽमृतं गमय। (1.3.28)

इत्यादि प्रसिद्धाः सूक्तयः अस्यामेवोपनिषदि सन्ति।

**श्वेताश्वतर-उपनिषद्-**

अस्यां षडध्यायाः सन्ति। इयं महत्त्वभूतोपनिषद् वर्तते। अस्यां सांख्य-योग-वेदान्त-सिद्धान्तानां प्रतिपादनं वर्तते। गीतायामस्याः महत्प्रभावः वर्तते। क्षर-अक्षर-प्रधानादितत्त्वानि इत एव गृहीतानि।

अत्र प्रथमे हंस-त्रैतवाद-माया-क्षर-अक्षर-सत्य-तपः-प्रभृतिभिः आत्मदर्शनमिति निरूपितम् वर्तते।

ब्रह्मणः अर्थे हंसपदस्य प्रयोगः अत्रैवास्ति। द्वितीये योगविधयः ब्रह्मतत्त्ववर्णनम्, तृतीये रुद्रविश्वरूपम् जीवस्वरूपम् आत्मस्वरूपम् चतुर्थे एकेश्वरवादः, त्रैतवादः, प्रकृतिः, माया-मायी, शिवस्वरूपप्रकृतिविषयाः सन्ति। पंचमे क्षर-अक्षर-कपिलऋषि जीवात्मस्वरूपम् वर्णितम् अस्ति। षष्ठे च ब्रह्मणः नामानि, हंसस्य, जीवप्रकृत्योः स्वरूपम् ईश्वरस्य नियन्तृरूपं, गुरुभक्तिश्च वर्तते।

**कौषीतकि-उपनिषद् -**

इयं शांखायनारण्यकस्य भागः। अस्यां चत्वारः अध्यायाः। प्रथमे देवयानं पितृयानम्, द्वितीये प्राणस्य ब्रह्मत्वम्, तृतीये प्राणप्रज्ञयोः महत्त्वम्, चतुर्थे च काशिराज-अजातशत्रु-बालाकि-इत्यनयोः दार्शनिकसंवादः वर्णितो वर्तते।

(सर्वे छात्राः उत्थाय - धन्यवादाः आचार्य! अद्य वयम् उपनिषदां विषये ज्ञातवन्तः। उपनिषदः भारतीयदर्शनपरम्परायाः प्राणभूताः वर्तन्ते। अध्यात्मविषयाणाम् आधारभूताः वर्तन्ते। एतासाम् सर्वैरेव अध्ययनं करणीयमिति।)

## अभ्यासकार्यम्

**प्रश्न 1. एकपदेन उत्तरं लिखत।**

क. ''आरण्यक'' इति शब्दस्य कः अर्थः ?

ख. ''अहं ब्रह्मास्मि'' कस्य दर्शनस्य महावाक्यम् ?

ग. महावाक्ययोः आधारः कः ?

घ. कस्य वेदस्य आरण्यकं नास्ति ?

ङ. शुक्लयजुर्वेदस्य आरण्यकग्रंथाः के ?

**प्रश्न 2. एकवाक्येन उत्तरं लिखत।**

क. आरण्यकग्रन्थानां प्रतिपाद्यविषयः कः ?

ख. आरण्यकग्रन्थाः के ?

ग. शांखायन आरण्यके कति अध्यायाः ?

घ. आरण्यकग्रन्थाः कैः लिखिताः ?

ङ. सामवेदस्य आरण्यकं किम् ?

**प्रश्न 3. युग्ममेलनं कुरुत -**

| | अ | ब |
|---|---|---|
| 1. | ऋग्वेदः | तत्त्वमसि |
| 2. | शुक्लयजुर्वेदः | ऐतरेय-आरण्यकम् |
| 3. | कृष्णयजुर्वेदः | बृहदारण्यकम् |
| 4. | सामवेदः | मैत्रायणीय-आरण्यकम् |
| 5. | महावाक्यम् | तवल्कार-आरण्यकम् |

**प्रश्न 4. शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत-**

1. ''तत्त्वमसि'' एवं अहं ब्रह्मास्मि महावाक्ये स्तः।
2. महाभारतानुसारम् आरण्यकग्रन्थाः वेदानां सारभागाः।
3. अथर्ववेदस्य पृथक् आरण्यकम् अस्ति।
4. ऐतरेय आरण्यकस्य रचयिता महिदासः नास्ति।
5. सम्प्रति षड् आरण्यकानि एव लभ्यन्ते।

**प्रश्न 5. उचितैः पदैः रिक्तस्थानानि पूरयत-**

(याज्ञवल्क्यः, शांखायन-आरण्यकस्य, कठऋषिः, महर्षिः जैमिनी, आत्मतत्त्वस्य।)

1. बृहदारण्यकम् ............... निरूपणं विद्यते।
2. ........... प्रवक्ता गुणशांखायनः वर्तते।
3. तवल्कार-आरण्यकस्य प्रवचनकर्ता ............. अस्ति।
4. तैत्तिरीय-मैत्रायणीमारण्यकयोःकर्ता ................. वर्तते।
5. बृहदारण्यकस्य प्रवचनकर्ता ................ अस्ति।

**प्रश्न 6. निम्नलिखितशब्दानां सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत-**

| | **शब्दः** | **संधि विच्छेदः** | **सन्धेः नाम** |
|---|---|---|---|
| 1. | कुतश्चित् | ........................... | ........................... |
| 2. | तदैव | ........................... | ........................... |
| 3. | इदमपि | ........................... | ........................... |

4. ब्रह्मास्मि ........................ ........................

5. अस्म्यहम् ........................ ........................

6. इत्यपि ........................ ........................

7. एतदारण्यकम् ........................ ........................

**प्रश्न 7. क्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातुः | लकारः | पुरूषः | वचनम् |
|---|---|---|---|---|
| 1. आगच्छति | ............... | ............... | ............... | ............... |
| 2. अभवत् | ............... | ............... | ............... | ............... |
| 3. सन्ति | ............... | ............... | ............... | ............... |
| 4. वर्तते | ............... | ............... | ............... | ............... |
| 5. प्रस्तौमि | ............... | ............... | ............... | ............... |
| 6. अस्ति | ............... | ............... | ............... | ............... |
| 7. भवति | ............... | ............... | ............... | ............... |

**प्रश्न 8. निम्नलिखितैः अव्ययशब्दैः वाक्यानि रचयत -**

1. अपि
2. इति
3. एव
4. प्रति
5. च

**प्रश्न 9. अधोलिखितशब्दानां धातुं प्रत्ययं च पृथक् कुरुत-**

| शब्दः | धातुः | प्रत्ययः |
|---|---|---|
| 1. पठनीयम् | ..................... | ..................... |
| 2. जातम् | ..................... | ..................... |
| 3. ज्ञातम् | ..................... | ..................... |
| 4. श्रुत्वा | ..................... | ..................... |
| 5. संजातः | ..................... | ..................... |
| 6. दृष्ट्वा | ..................... | ..................... |

**प्रश्न 10. एकपदेन उत्तरं लिखत-**

1. कौषीतकि-उपनिषद् कस्य आरण्यकस्य भागः अस्ति?
2. कृष्णयजुर्वेदस्य उपनिषद् कः अस्ति?
3. अर्थववेदस्य सम्बद्धः उपनिषद् कः अस्ति?

**प्रश्न 11. एकवाक्येन उत्तरं लिखत-**

1. उपनिषदः कति सन्ति?
2. विद्ययाऽमृतश्नुते कस्य उपनिषद् वाक्यम् अस्ति?
3. स्वामी विवेकानन्दस्य ध्येयवाक्यं किम् अस्ति?
4. मुण्डकोपनिषद् प्रमुख वाक्यं किम् अस्ति?
5. तत् त्वमसि कस्य उपनिषदः वाक्यं अस्ति?

**प्रश्न 12. वेदानुसारम् आरण्यकग्रन्थानां विषयस्वरूपं वर्णयत् ।**

**प्रश्न 13. वेदानुसारम् उपनिषदां निर्धारणं कुरुत ।**

**प्रश्न 14. वेदानुसारं ब्राह्मणग्रन्थानां निरूपणं लिखत ।**

❖ ❖ ★ ❖ ❖

# द्वितीयः अध्यायः
# वेदाङ्गानि

वैदमन्त्राणां यथाविधि उच्चारणाय, अर्थज्ञानाय, प्रयोगकौशलाय, तत्त्वार्थबोधाय वेदाङ्गानि कल्पितानि। षड्वेदाङ्गानि शिक्षाकल्पादि महर्षिभिः प्रणीतानि सन्ति। एतेषां द्वारैव वेदमन्त्रेषु निहितस्य रहस्यस्य उद्घाटनं सहजतया भवति। वेदार्थज्ञानाय वेदाङ्गानि उपकारकाणि भवन्ति। वेदानां रक्षणार्थं वेदाङ्गानि अध्येतव्यानि।

वेदस्य वेदानां वा अङ्गानि-वेदाङ्गानि, विग्रहानुसारं वेदस्य अङ्गभूतानि खलु वेदाङ्गानि। अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अंगानि इति व्युत्पत्यनुसारेण अंगब्दस्य अर्थ उपकारको वर्तते। वेदार्थज्ञानाय येषां शास्त्राणाम् आवश्यकता भवति तान्येव शास्त्राणि वेदांगानि इति कथ्यन्ते।

**वेदांगानि षड्** -

शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषायनं चैव वेदांगानि षडेव तु।।

तद्यथा - शिक्षा, कल्प, व्याकरणम्, निरुक्तम्, छन्दः ज्योतिषं चेति।

एतेषां षड्वेदांगानां विभाजनं पाणिनीय शिक्षायां निम्नप्रकारेण कृतमस्ति-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ उच्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् सागङमधीत्यैव ब्रह्मलोके महीयते।।

वेदस्य पादौछन्दः, हस्तौकल्पः, अयनम् ज्योतिषं चक्षुः निरुक्तं शिक्षा घ्राणं, मुखं व्याकरणम्।

1. **शिक्षा**- येन शास्त्रेण वेदमन्त्राणां शुद्धोच्चारणे सारल्यं साहाय्यं च भवति तत् - शास्त्रं शिक्षेति कथ्यते।

अर्थात् स्वरवर्णादीनाम् उच्चारणनियमबोधयित्री विद्या शिक्षेत्यभिधीयते।

सायणाचार्येण ऋग्वेदभाष्यभूमिकायां शिक्षायाः लक्षणं कुर्वता लिखितम् -

''स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा''।

तैत्तिरीयोपनिषदि शिक्षाध्याये शिक्षायाः षडङ्गानि लिखितानि -

वर्णः, स्वरः, मात्रा, बलम्, सामः, सन्तानः, एतानि षडङ्गानि सन्ति।

अत्र वर्णः अकारादिः स्वरस्तु उदात्तादिः मात्रा ह्रस्वादिका: बलं उच्चारणं स्थानं ताल्वादिकम्। साम निपातादिः सन्तानो विकर्षणादिः। शिक्षासाहित्यं तु नितरां विशालं वर्तते यथा –

पाणिनीयशिक्षा, व्यासशिक्षा, भारद्वाजशिक्षा, पाराशरीशिक्षा, वाशिष्ठीशिक्षा, कात्यायनीशिक्षा, माध्यन्दिनीशिक्षा, केशवीशिक्षा, नारदीयशिक्षा, माण्डूकीशिक्षा स्वरभक्तिलक्षणशिक्षा इत्यादयः।

वेदेषु सर्वत्र स्वरप्राधान्यं भवति स्वरभेदेनार्थभेदः सम्भवात्। इदं स्वरज्ञानं शिक्षाधीनं भवति। अतएव शिक्षाशास्त्रस्य वेदांगता सुतराम् उपपद्यते यतः अशुद्धोच्चारणेन महाननर्थः भवति।

कथितं पाणिनीयशिक्षायाम् –

मन्त्रो हीनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोपराधात्।।

आख्यायिका इयं प्रसिद्धा, यत् विश्वरूपनामके त्वष्टुः पुत्रे इन्द्रेणाहते सति रूष्ठः त्वष्टा इन्द्रस्य हन्तारं पुत्रम् उत्पादयिषुः अभिचारिकं यागं कृतवान्। तत्र इन्द्रशत्रुर्वर्धस्व, इति मन्त्रः ऊहितः तत्र तत्पुरुषप्रयुक्तान्तोदात्तत्वे कर्तव्ये बहुव्रीहिः युक्तः आदि उदात्तः ऋत्विजा प्रयुक्तः। इत्यर्थानान्तराभिधानाद् इन्द्रेण सोऽपि हतः।

अतः मन्त्रेषु स्वरदोषः वर्णदोषः वा कथमपि न भवेत्।

स्वरतः स्वरेण वर्णतः वर्णेन अक्षरेण वा हीनः रहितः मन्त्रः मिथ्याप्रयुक्तः सन्तम् अभीप्सितम् अर्थम् न आह। स मन्त्रो वाग्व्रजं भूत्वा यजमानं हिनस्ति पातयति।

यथा स्वरस्य अपराधात् इन्द्रशत्रुः इन्द्रशत्रुशब्दः यजमानः हिनस्ति हिंसितवान् इत्यर्थः।।

**2. कल्पः** – वेदेषु विस्तीर्णं कर्मकाण्डं सूत्रबद्धं कर्तुमेव कल्पानामाविर्भावः। अर्थात् वेदविहितानां कर्मणां व्यवस्थापकं शास्त्रं कल्पः इत्यभिधीयते।

सायणाचार्येण ऋग्भाष्यभूमिकायां कल्प-शब्दस्य व्युत्पत्तिं कुर्वता कथितम् –

''कल्प्यते समर्थ्यते यागप्रयोगोऽत्र इति व्युत्पत्तेः।

अर्थात् यत्र यज्ञविधीनां समर्थनं प्रतिपादनं च कृतं ते ग्रन्थाः कल्पशब्द वाच्याः। कल्पसूत्रेषु वेदविहितानां कर्मणां क्रमशः वर्णनं मिलति। अतएव विष्णुमित्रेण कथितम् –

''कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्''

**कल्पसूत्राणि चतुर्विधानि** –

(क) श्रौतसूत्राणि (ख) गृह्यसूत्राणि (ग) धर्मसूत्राणि (घ) शुल्वसूत्राणि

(क) श्रौतसूत्राणि – श्रौतसूत्रेषु श्रुतिप्रतिपादितानां यज्ञानां क्रमबद्धं विधानं वर्णितम्। विविधानि श्रौतसूत्राणि ऋषिभिः प्रणीतानि।

**तानि यथा** –

आपस्तम्ब श्रौतसूत्रम्, कात्यायनश्रौतसूत्रम्, आश्वलायनश्रौतसूत्रम्, बौधायनश्रौतसूत्रम्, लाट्यामनसूत्रम्, शांखायनश्रौतसूत्रम्, मानवश्रौतसूत्रम्, वैतानश्रौतसूत्रम्, ब्राह्मणश्रौतसूत्रम् चेति।

(ख) गृह्यसूत्राणि – गृह्यसूत्रेषु पंचमहायज्ञाः षोडशसंस्कारादीनि च गृह्यकृत्यानि वर्णितानि। गह्यसूत्राणि अपि तदृषिप्रणीतानि। तानि यथा – आश्वलायनगृह्यसूत्रम्, हिरण्यकेशी-पारस्कर-बौधायन-

आपस्तम्ब-मानव-शांखायन-काठक-भारद्वाज-गोभिल-लौगासि-जैमिनीय-खादिन-हिरण्यकेशीगृह्यसूत्राणि चेति।

(ग) धर्मसूत्राणि - धर्मसूत्रेषु चतुर्णा वर्णानामाश्रमाणां च चित्रण एवमेव च राजधर्माणाम् अन्येषां च सामाजिककृत्यानां वर्णनं प्राप्यते ऋषिनामभिः प्रसिद्धानि प्रमुखानि धर्मसूत्राणि यथा बौधायनधर्मसूत्रं, वरिष्ठ-मान-आपस्तम्ब-गौतम-हिरण्यकोशीधर्मसूत्रं चेति।

(घ) शुल्वसूत्राणि - शुल्वशब्दोमापनार्थकः। शुल्वसूत्रेषु यज्ञकुण्डस्य यज्ञवेद्याः, यज्ञपात्रादीनां च मापनविधिस्तन्निर्माणरीतिश्चोपलभ्यते। ततः प्रधानभूतानि शुल्वसूत्राणि यथा -

कात्यायनशुल्वसूत्रं, बौधायन-मानव-आपस्तम्ब, सूत्रं चेति।

शुल्वसूत्रेषु ज्यामितिविज्ञानस्य गणितविज्ञानस्य च मूलं दृश्यते।

यथा कश्चित् पुरुषो धर्मकृत्यं स्वकर्तव्यपालनं च करोति तथैव वैदिक कृत्यानां वेदप्रतिपादितमर्यादानां आर्यपरम्पराणां च सम्पादनं कल्पसूत्रानुसारमेव विधीयते।

अतः - हस्तौ कल्पोऽथ पठ्यते इति वचनं सर्वथा सार्थकतां धते। इति।

3. **व्याकरणम्**- व्याक्रियन्ते शब्दा अनेनेति व्याकरणम्-

इति व्युत्पत्ति-अनुसारेण संस्कृतवाङ्मये प्रयुक्तानां शब्दानां शुद्धाशुद्धयोः विचारः व्याकरणेनैव क्रियते।

प्रकृति-प्रत्यय-पद-पदार्थ-वाक्य-वाक्यार्थ-ध्वनि स्फोटादीनां शब्दविज्ञानविषयाणां विश्लेषणं व्याकरण शास्त्रस्य लक्ष्यभूतम्।

व्याकरणम् - शब्दशास्त्रम्, शब्दानुशासनं, अक्षरसमाम्नायश्च इत्यपि कथ्यते।

बहुप्राचीना खलु व्याकरणपरम्परा। पाणिनिपूर्वकालिकानां पञ्चाशीति वैयाकरणानामुल्लेखो लभ्यते। एवमेवैन्द्रचान्द्रादीनि अष्टविधव्याकरणान्यपि परिगण्यन्ते।

किन्तु तेषु पाणिनीयव्याकरणं सर्वोत्कष्टं वर्तते।

पाणिनिना अष्टाध्याय्यां संक्षेपेण व्याकरणशास्त्रस्य शब्दविज्ञानस्य वा सर्वे सिद्धान्ताः समाविष्टाः। पाणिनीयसूत्रेषु कात्यायनेन वार्तिकानि विरचितानि। भगवता पतञ्जलिना च तेषु महाभाष्यम् विलिखितम्। इत्यथमेतत् मुनित्रयं व्याकरणम्।

मुनित्रयानन्तरमपि वामनजयादित्य-भर्तृहरि-भट्टोजीदीक्षितवरदाचार्य-कैमट-नागेश-भट्टादीनां व्याकरणाचार्याणां व्याकरणक्षेत्रे महनीयं योगदानम्।

शरीरे मुखस्य यत् स्थानं तदेव वैदिकसाहित्ये व्याकरणवेदाङ्गस्य। व्याकरणेनैव वेदमन्त्राणां साधूच्चारणं तेषामर्थज्ञानं च सम्भवम् अतो व्याकरणं वेदाङ्गेषु मुखत्वेन स्वीक्रियते -

''मुख व्याकरणं स्मृतम्'' इति

महर्षिपतञ्जलिना कथितम् -

''प्रधानं च षडङ्गेषु व्याकरणम्'' इत्युक्त्या

व्याकरणस्य प्राधान्यं प्रतिपादितम्।

4. **निरुक्तम्** - षडङ्गेषु निरुक्तस्यापि महत्त्वमङ्गीक्रियते।

शरीरे यत् स्थानं श्रोत्रस्य तदेव वेदार्थ ज्ञाने निरुक्तवेदाङ्गस्य

अतः साधूक्तम् – निरुक्तं श्रोत्रमुच्यते।

पूर्व वेदेभ्यः समाहृत्य – समाहृत्य यथाक्रम शब्दाः संगृहीताः।

तमिमं शब्दसंग्रहं निघण्टुरिति नाम्ना निर्दिशन्ति। तस्य निघण्टोः व्याख्यारूपेणैव यास्काचार्यो ''निरुक्तम्'' इति ग्रन्थं लिखितवान्। निरुक्ते ''नामाख्यातोपसर्गनिपाताः'' इति चत्वारि पदजातानि षड् भावविकाराः वैदिकशब्दानां निर्वचनानि ऋचां भेदाः देवतानां वर्गीकरणम्, तासां विभक्तिसाहचर्य चेत्यादयो विषयाः वर्णिताः येषां ज्ञानं वेदस्वरूपबोधाय परमावश्यकम्।

निरुक्तं त्रिषु काण्डेषु विभक्तम्। तद्यथा –

नैघण्टुककाण्डम्, नैगमकाण्डम्, दैवतकाण्डं चेति।

एतानि काण्डानि द्वादशाध्यायेषु विभक्तानि। अन्ते द्वावध्यायौ परिशिष्टभूतौ।

अर्थानुसारं शब्दानां निर्वचने – यास्काचार्यस्य अद्वितीयं योगदानम्। ''नामान्याख्यातजातानि'' इत्युक्त्वा निरुक्तटीकाकारेण दुर्गाचार्येण निरुक्तस्य प्रवृत्तिः पञ्चधा परिकल्पिता –

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।

धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तम्।।

निरुक्त परम्परा अपि अति प्राचीना। यास्केन निरुक्ते स्वपूर्ववर्तीनां गार्ग्य कौत्सशाकटायनादीनामुल्लेखो विहितः।

5. **छन्दः** – वेदाः छन्दोबद्धाः सन्ति। अतः तेषां उच्चारणज्ञानम छन्दोज्ञानम् आवश्यकम् अस्ति। अतएव वेदमन्त्राणां शुद्धोच्चारणदृष्टया छन्दसां वेदांगता सुस्पष्टमेवास्ति। अर्थात् वैदिकमन्त्रोच्चारणपप्रयोजनपूर्तये छन्दसां अध्ययनं परमावश्यकम् अस्ति।

''छन्दांसि छादनात्'' इति यास्ककृत निर्वचनानुसारं छन्दांसि वेदमन्त्राणां आवरणभूतानि रक्षकानि वा। वेदार्थे प्रयुक्तः ''छन्दस्'' शब्दः छन्दोवेदयोस्तादात्म्यं सूचयति।

यथोक्तम् आचार्येण कात्यायनेन –

''यो ह वा अविदितार्षेयच्छन्दो दैवत ब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वर्च्छति गर्त्ये वा पात्यते प्रमीयते वा पापीयान् भवति'' इति ऋग्वेदे, सामवेदे च सर्वे मन्त्राः छन्दोबद्धाः सन्ति। यजुर्वेदस्यापि गद्यात्मकाः, पद्यात्मकाश्च सर्वे मन्त्राः छन्दोबद्धाः एव सन्ति। यतः एकाक्षरादारभ्य चतुश्शताक्षराणां (104) छन्दसां विधानमस्ति। मुख्यानां छन्दसां नामानि तु संहितासु ब्राह्मणेष्वेव उपलभ्यन्ते।

मन्त्रेषु गायत्री-त्रिष्टुप्-जगती-वृहतीत्यादीनि वैदिकछन्दांसि अधिकतया प्रयुक्तानि।

छन्दोबद्धमन्त्रपाठेनेनैव देवताः प्रसन्ना जायन्ते। यथा नरः पद्भ्यां बिना स्थातुं चलितुं च न शक्तस्यथैव छन्दसा विना वेदोऽपि गतिहीनः आधारहीनश्च। अतः सत्यमेवेद पाणिनीयवचनम् – छन्दः पादौ तु वेदस्य – इति।

6. **ज्योतिषम्** – वैदिकयज्ञादीनां सम्पादनाय समुचिततिथिनक्षत्रादीनां ज्ञानमपेक्षितम्। ज्योतिषज्ञानं विना अहोरात्र-पक्ष-मास-ऋतु-संवत्सराणां शुभत्वाशुभत्वज्ञानमपि सम्भवं नास्ति।

किम्बहुना यज्ञसम्पादनाय यात्रादिसम्पादनाय चापि ज्योतिषस्य आवश्यकता भवत्येव।

अतः ज्योतिषशास्त्रज्ञ एव तानि यथा विधिः परिपूर्णतया सम्पादयितुं शक्नोति।

आचार्यलगधः ज्योतिषवेदाङ्गस्य कर्ता कथ्यते।

वेदाङ्गज्योतिषम् वेदद्वयसम्बद्धमुपलभ्यते - यजुः सम्बद्धं याजुषज्योतिषम् ऋक्सम्बद्धमार्चज्योतिषम् च। परिवर्तिग्रन्थेषु आर्यभटीयः सूर्यसिद्धान्तश्च, ज्योतिर्विद्यायाः रत्नभूतौ। गणितं विज्ञानमपि ज्योतिर्विद्यायाः अङ्गभूतम्। सौरचान्द्रमासपरिगणनापि ज्योतिर्विद्याविषयभूता।

''ज्योतिर्विद्याविशारद एव वस्तुतो विज्ञः'' इति वेदाङ्गज्योतिषस्य उद्घोषः -

वेदादियज्ञार्थमभिप्रवृत्ताः कालानिपूर्वाविहिताश्च यज्ञाः।

तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्।।

अतो वेदाङ्गज्योतिषं वेदपुरुषस्य चक्षुतुल्यमेव।

## अभ्यासकार्यम्

**प्रश्न 1 - एकपदेन संस्कृतभाषया उत्तरत -**

1. वेदाङ्गानि कति सन्ति ?
2. कल्पसूत्रणि कतिविधाानि ?
3. व्याकरणस्यापरं नाम किम् ?
4. मुखं किं स्मृतम् ?
5. षडङ्गेषु प्रधानं किम् ?
6. वेदस्य पादौ कः ?
7. वेदपुरुषस्य चक्षुतुल्यं किम् ?
8. तैत्तिरीयोपनिषदि शिक्षायाः कति अङ्गानि कथितानि ?
9. निरूक्तं वेदपुरुषस्य किं कथितम् ?
10. वेदपुरुषस्य हस्तौ कः ?

**प्रश्न 2 - एकवाक्येनोत्तरत -**

1. उच्चारणकर्मणि उपकारकत्वं किमस्ति ?
2. षड्वेदाङानां नामानि कानि ?
3. शिक्षायाः षडङ्गानां नामानि लेखनीयानि ?
4. वेदेषु सर्वत्र कस्य प्राधान्यं भवति ?
5. कल्पशास्त्रस्य विषये किमभिधीयते ?
6. शुद्धामशुद्धयोः विचारः केन क्रियते ?
7. निरूक्तं कति विधम् कथितम् ?
8. वेदाः कीदृशाः सन्ति ?
9. यास्कमतेन वेदमन्त्रणाम् आवरणभूतानि कानि कथितानि ?
10. ज्यौतिषस्य विषये विज्ञः क ?

**प्रश्न 3. - अधोलिखितं रिक्तस्थानं उचितेन शब्देन पूरयत -**

क. शिक्षा ................................तु वेदस्य । (घ्राणं / मुखं / मस्तिष्कम्)

ख. वेदाङ्गानि ....................................अपि कथ्यन्ते। (पुराणानि / शास्त्रणि / सूत्रणि)

ग. शिक्षाध्यायः ....................................मिलति। (ईशोपनिषदि / कठोपनिषदि / तैत्तिरीयोपनिषदि)

घ. यथा शिक्ष्यते सा ..........................................। (शिक्षकः / शिक्षा / शिक्षणम्)

ङ वाग्वज्रं भूत्वा ...........................हिनस्ति। (यजमानं / पुरोहितं / अनुष्ठानम्)

**प्रश्न 3. - अधोलिखितान् श्लोकान् पूरतय -**

1. शिक्षाकल्पो .........................................................।

   .............................................................................।।

2. छन्दः पादौ .......................................................।

   .......................................................श्रोत्रमुच्यते।।

3. शिक्षाघ्राणं ...........................................................।

   तस्मात्.......................................................महीयते।।

4. मन्त्रो हीनः स्वरतो ..............................................।

   ...................................................स्वरतोपराघात्।।

5. वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।

   ..........................................................................................।।

**प्रश्न 5.- अधोलिखितं यथायोग्यं योजयत -**

| | क | ख |
|---|---|---|
| 1. | शास्त्रणि | व्याकरणम् |
| 2. | शिक्षायाः | चतुर्विधानि |
| 3. | कल्पसूत्रणि | छादनात् |
| 4. | आपस्तम्ब | षडङ्गानि |
| 5. | निरूक्तम् | श्रौतसूत्रम् |
| 6. | प्रधानम् | पञ्चविधम् |
| 7. | छन्दांसि | वेदाङ्गानि |

**प्रश्न 6. - अधोलिखितानां शब्दानां प्रकृतिः प्रत्ययं लिखत -**

1. भवति - ....................................................................................................
2. कर्त्तव्यम् - ....................................................................................................
3. गमनीयम् - ....................................................................................................
4. स्मृतम् - ....................................................................................................

5. त्यक्त्वा - ..........................................................................................

6. गन्तव्यम् - ..........................................................................................

7. कारणात् - ..........................................................................................

8. महती - ..........................................................................................

9. अस्ति - ..........................................................................................

10. व्यावहारिकम् - ..........................................................................................

**प्रश्न 7.- अधोलिखितानां पदानां विग्रहं कृत्वा समासनाम लिखत -**

| **पदम्** | **विग्रहः** | **समासनाम** |
|---|---|---|
| क. वेदाङ्गानाम् | ................................ | ................................ |
| ख. षडङ्गानि | ................................ | ................................ |
| ग. धर्मसूत्रणि | ................................ | ................................ |
| घ. पञ्चविधम् | ................................ | ................................ |
| घ. यथाशक्ति | ................................ | ................................ |

**प्रश्न 8.- संक्षेपेण विवेचनं कुरुत -**

1. शिक्षाग्रन्थानां नामानि।
2. शिक्षायाः षडङ्गानि लिखत।
3. गृह्यसूत्रणां नामानि।
4. श्रौतसूत्राणि लिखत।
5. धर्मसूत्राणां विषये लिखत।
6. शुल्वसूत्राणि वर्णयत।

**प्रश्न 9. - संक्षिप्तां टिप्पणीं लिखत -**

क. वेदाः

ख. शिक्षाशास्त्रम्

ग. व्याकरणम्

घ. कल्पशास्त्रम्

ङ. ज्यौतिषम्

च. निरूक्तम्

छ. छन्दः

**( परीक्षाकृते नास्ति )**

**योग्यता - विस्तारः**

क. व्याकरणग्रन्थानां नामानि लिखत।

ख. पाणिनेः परिचयं लिखत।

ग. पतञ्जलेः परिचयं लिखत।

घ. ज्यौतिषग्रन्थानां नामानि लिखत।

ध. प्राचीनसंस्कृतरचनाकाराणां नामानि लिखत।

❖ ❖ ★ ❖ ❖

# तृतीयः अध्यायः
# काव्यपरिचयः

काव्यं त्रिविधं पद्यकाव्यं, गद्यकान्यं चम्पूकाव्यं च। यद्यपि दृश्यश्रव्यभेदात् आदौ द्विविधं काव्यम्। छन्दोबद्धरचना पद्यकाव्यम्, छन्दोमुक्तरचना गद्यकाव्यम् पद्य-गद्ययुतं रचनाकर्म चम्पूकाव्यम्। उपर्युक्तेषु त्रिषु काव्यभेदेषु संस्कृते विपुलं साहित्यं लभ्यते। विशालमेतत् काव्यसाहित्यम्।

**पद्यकाव्यस्य सामान्यपरिचयः**

''कवेर्भावः काव्यम्'' कविः शक्त्या, निपुणतया, अभ्यासेन च यद् वर्णयति तद् वर्णनमेव काव्यम् भवति। उक्तं केनचित् ''कवते श्लोकान् ग्रंथते वर्णयति वा कविः। कविशब्दस्य प्रयोगः शुक्राचार्यस्य कृते, विद्वत्सामान्यस्य च कृते संस्कृते प्रयुक्तो भवति। लोकोत्तरवर्णनानिपुणं क्रान्तदर्शी कविकर्म काव्यम्''

**काव्यलक्षणम्** -

''वाक्यं रसात्मकं काव्यम्'' (सा.द. 1)

आचार्य विश्वनाथः साहित्यदर्पणे रसात्मकं वाक्यम् एव काव्यमिति स्वीकृतवान्

रसगंगाधरे पण्डितराज जगन्नाथः काव्यस्य अपरं लक्षणं दत्तवान्-

''रमणीयार्थप्रतिपादकः शब्दः काव्यम्''

तथा

''रसे सारश्चमत्कारः'' इत्युक्तम्।

अग्निपुराणे अपि काव्यस्य लक्षणं लभ्यते। तद्यथा।

'' संक्षेपाद्वाक्यमिष्टार्थ व्यवच्छिन्नपदावली।
काव्यं स्फुरदलङ्कारं गुणवद् दोषवर्जितम् ।। (अग्नि पु. 337/7)

तत्त्वतः चमत्कारयुक्तं, रसात्मकं, गुणयुक्तं, अलङ्कृतं, निर्दोषवाक्यं काव्यं कथ्यते।

कविः असाधारणः भवति। भारतीयपरम्परायां कवेः स्थानं सर्वोपरि वर्तते। उक्तं केनचित्-

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्त्तते।।

यथा प्रजापतिः विधाता संसारस्य सृष्टिं करोति, तथैव कविरपि काव्यसंसारस्य निर्माणं करोति।

**काव्यभेदाः** -

सामान्यतया काव्यं द्विविधं भवति, दृश्यकाव्यं श्रव्यकाव्यं च । प्रथमं दृश्यकाव्यं ''रुपकम्'' इत्यपि

कथ्यते।

इदं दृश्यं रुपककाव्यं दशविधं भवति–

''नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति।।

एतदनुसारं नाटक–प्रकरण– भाण– व्यायोग समवकार–डिम–ईहामृग –अंक–वीथी– प्रहसन भेदात् दशविधं भवति दृश्यकाव्यम्।

द्वितीयं काव्यं श्रव्यकाव्यं भवति। इदं हि श्रव्यकाव्यं त्रिविधं भवति–'' गद्यं पद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्। (काव्यादर्श पद्यकाव्यम्, गद्यकाव्यम्, चम्पूकाव्यम् च।)

**पद्यकाव्यस्य परिचयः**

पद्यकाव्यस्य सप्तभेदाः भवन्ति। महाकाव्यम्, खण्डकाव्यम्, कुलककाव्यम्, कलापकाव्यम्, सन्दानितककाव्यम्, युग्मककाव्यम्, मुक्तककाव्यम् च।

**गद्यकाव्यम्** –

गद्यकाव्यं मूलतः द्विविधं, कथा आख्यायिका चेति। परन्तु विश्वनाथस्य मतेन अस्य गद्यकाव्यस्य चत्वारः भेदाः इतोऽपि भवन्ति। तद्यथा–

''वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकश्च चतुर्विधम्।। ( सा.द. 6/5/86)

एतेन ज्ञायते यत् मुक्तक–वृत्तगंधि –उत्कलिकाप्राय– चूर्णकभेदात् गद्यकाव्यं चतुर्विधम् अपि स्वीकृतं वर्तते।

**तृतीयं चम्पूकाव्यम्**

गद्य–पद्यात्मकं काव्यं चम्पूकाव्यं कथ्यते। इदं चम्पूकाव्यं यदि राजस्तुतिपरकं भवति चेत् '' विरुद'' इति तथा च बहुभाषा युक्तं भवति चेत् '' करम्भक इति निगद्यते।

**पद्यकाव्यस्य परिचयः**

पादै, चरणैः वा युक्ता छन्दोबद्धा रचना ''पद्यम्'' इति निगद्यते। पद्यकाव्यस्य प्रचलिताः निम्नभेदाः सन्ति।

**पद्यकाव्यम्**

प्रबंधकाव्यम् – महाकाव्यम्, खण्डकाव्यम्

मुक्तककाव्यम्

गीतिकाव्यम् – स्तोत्रकाव्यम्

महाकाव्यस्य स्वरूपं लक्षणं च

महाकाव्यस्य अर्थः, महत् काव्यम् इति। आचार्यः भामहः महाकाव्यस्य निम्नलिखितं लक्षणं कृतवान् –

''सर्गबन्धो महाकाव्यं महतां च महच्च यत्'' इति। महाकाव्यस्य कतिपय विशेषताः –

- महाकाव्यं सर्गेषु विभक्तं भवति।

-काव्यस्यारम्भः मङ्गलाचरणेन भवति।

- कथावस्तु प्राचीनम् ऐतिहासिकं वा भवति।

- नायकः धीरोदात्तः, उदात्तचरित्रवान् भवति।

- महाकाव्ये धर्मार्थकाममोक्षाणां पुरुषार्थानां वर्णनं भवति, कस्यचिद् एकस्य प्राप्तिरपि भवति।

- महाकाव्ये नगर-समुद्र-पर्वत- ऋतु-सूर्योदय-जलक्रीड़ा-उद्यान-विहार-विवाह- यात्रा-युद्ध-विजय प्रभृतिविषयाणां वर्णनं भवति।

- महाकाव्ये अंगीरसः श्रृंगारः अथवा वीरः भवति। अन्ये रसाः पोषकाः भवन्ति।

- अलंकाराः,रसाः छन्दोविधानम्, लोकशिक्षणम् इत्यादयः अपि गुणाः महाकाव्यस्य महत्त्वं स्थापयन्ति।

| **क्र.** | **प्रमुखमहाकाव्यानि** | **महाकविः** |
|---|---|---|
| 1. | रामायणम् | आदिकविः वाल्मीकिः |
| 2. | महाभारतम् | वेदव्यासः |
| 3. | रघुवंशमहाकाव्यम् | कालिदासः |
| 4. | कुमारसम्भवम् | कालिदासः |
| 5. | बुद्धचरितम् | अश्वघोषः |
| 6. | सौन्दरनन्दम् | अश्वघोषः |
| 7. | पाद्यचूडामणि | बुद्धघोषः |
| 8. | हयग्रीववधम् | भर्तृमेण्ठः |
| 9. | किरातार्जुनीयम् | भारविः |
| 10. | भट्टिकाव्यं (रावणवधम्) | भट्टिः |
| 11. | जानकीहरणम् | कुमारदासः |
| 12. | शिशुपालवधम् | माघः |
| 13. | हरविजयम् | रत्नाकरः |
| 14. | धर्मशर्माभ्युदयम् | हरिश्चन्द्रः |
| 15. | नैषधीयचरितम् | श्रीहर्षः |

**ऐतिहासिकमहाकाव्यानि-**

| **क्र.** | **प्रमुखमहाकाव्यानि** | **महाकविः** |
|---|---|---|
| 1. | नवसाहसाङ्कचरितम् | पद्मगुप्तः (परिमलः) |
| 2. | विक्रमाङ्कदेवचरितम् | बिल्हणः |
| 3. | राजतरङ्गिणी | कल्हणः |

| | | |
|---|---|---|
| 4. | रामपालचरितम् | सन्ध्याकरनंदी |
| 5. | कुमारपालचरितम् | जयानकः |
| 6. | पृथ्वीराजविजयम् | जयानकः |
| 7. | वसन्तविलासः | बालचन्द्रसूरिः |
| 8. | हम्मीरकाव्यम् | नयचन्द्रसूरिः |
| 9. | रघुनाथाभ्युदयम् | रचयित्री रामभद्राम्बा |
| 10. | ईश्वरविलासः | श्रीकृष्णभट्टः |
| 11. | अजितोदयः | जगजीवनभट्टः |

**चरितकाव्यानि** -

| **क्र.** | **प्रमुखमहाकाव्यानि** | **महाकविः** |
|---|---|---|
| 1. | शंकरविजयमहाकाव्यम् | व्यासाचलः |
| 2. | शांकरदिग्विजयमहाकाव्यम् | माधवाचार्यः ( विद्यारण्यः) |
| 3. | भोजचरित्रम् | राजवल्लभः |
| 4. | नानकचन्द्रोदयम् | देवराज शर्मा |
| 5. | खानखानाचरितम् | रुद्रकविः |
| 6. | अब्बुदुल्लाहचरितम् | लक्ष्मीपतिः |

**खण्डकाव्यस्य परिचयः** -

संस्कृतकाव्यशास्त्रे पृथक्तया काव्यभेदेषु गीतिकाव्यस्य विवेचनं नास्ति, तथापि कालिदासाद् आरभ्य

निरन्तरं गीतिकाव्यानां समृद्धा परंपरा लभ्यते। गीतिकाव्यम् एव खण्डकाव्यम् अथवा मुक्तककाव्यम् इति ख्यातम्। साहित्यदर्पणकारेण आचार्यविश्वनाथेन महाकाव्येभ्यः भिन्नस्य लघुकाव्यस्य कृते ''खण्डकाव्य'' इत्यस्य अभिधानस्य प्रयोगः विहितः। तदनुसारम्-

''खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च'' (सा.द. 6/239)

खण्डकाव्ये महाकाव्यस्य सर्वाणि लक्षणानि न भवन्ति। खण्डकाव्यं महाकाव्यस्यैकांशस्य

अनुसरणं करोति। अस्मिन् प्रबन्धात्मकता भवति। इदमपि सर्गबद्धम्। कालिदासस्य ऋतुसंहारम् एतस्योदाहरणं वक्तुं शक्यते।

**मुक्तककाव्यपरिचयः** :-

मुक्तककाव्यं द्विविधं भवति। गीतिकाव्यं, मुक्तककाव्यं चेति। वस्तुतः गीतिकाव्यशब्दः

अपेक्षाकृतनवीनः। खण्डकाव्यं गीतिकाव्यं, मुक्तककाव्यम् एतेषु प्रायः भेदः नास्ति।

गीतिकाव्यम् - साहित्यदर्पणकारेण गीतिकाव्यं खण्डकान्यम् इत्येव कथितम्। आधुनिकाः विद्वान्सः अन्तरंगतत्त्वानां महत्त्वं स्वीकृत्य ऋतुसंहारम्, मेघदूतम्, प्रभृतिकाव्यं गीतिकाव्यम् इति वदन्ति। एतस्य गीतिकाव्यस्य मुक्तककाव्यस्य वा स्वरूपं एवं ज्ञातुं शाक्यते

(अ) यत्र स्वल्पस्येतिवृत्तस्य कथा वर्णिता स्यात्,

(ब) यत्र प्रबंधात्मकता सर्गबद्धता च भवेत्,

(स) यत्र पद्यानि परस्परं निरपेक्षानि पूर्वापरसम्बन्धरहितानि न स्यु:, तत्काव्यं खण्डकाव्यं अथवा गीतिकाव्यम्। यथा कालिदासस्य मेघूदतम्, जयदेवस्य गीतगोविन्दम्।

**मुक्तककाव्यम्** -

यत्र पद्यम् एकैकं भावदृष्ट्या स्वतन्त्रं भवति तत्काव्यं मुक्तककाव्यम् । यथा-

" मुक्तकं श्लोकैकैश्चमत्कारक्षम: सताम्" (अग्नि पु.अ. 36)

पूर्वापरसम्बन्धरहितत्वात् मुक्तकम् इति-

"तेन मुक्तेन मुक्तम्" (सा.द. 6/314)

मुक्तेषु अपि रसपेशलता, भावतरलता तथैव स्याद् यथा प्रबंधकाव्ये।

"मुक्तेषु प्रबन्धेष्विव रसबंधाभिनिवेशिन: कवयो दृश्यन्ते" (ध्वन्यालोक उ. 3)

यथा गीतिकाव्यस्य श्रेष्ठतमम् उदाहरणं मेघदूतम्, तथैव मुक्तककाव्यस्य श्रेष्ठतम् उदाहरणं "अमरुकशतकम्" अस्ति।

प्रसिद्धानि गीतिकाव्यानि, मुक्तककाव्यानि च

| **क्र.** | **प्रमुखमहाकाव्यानि** | **महाकवि:** |
|---|---|---|
| 1. | ऋतुसंहारम् | कालिदास: |
| 2. | मेघदूतम् | कालिदास: |
| 3. | गीतगोविन्दम् | जयदेव: |
| 4. | अमरुकशतकम् | अमरुककवि: |
| 5. | नीतिशतकम् | भर्तृहरि: |
| 6. | श्रृंगारशतकम् | भर्तृहरि: |
| 7. | वैराग्यशतकम् | भर्तृहरि: |
| 8. | भामिनीविलास: | पण्डितराजजगन्नाथ: |
| 9. | गंगालहरी | पण्डितराजजगन्नाथ: |
| 10. | करुणालहरी | पण्डितराजजगन्नाथ: |
| 11. | अमृतलहरी | पण्डितराजजगन्नाथ: |
| 12. | लक्ष्मीलहरी | पण्डितराजजगन्नाथ: |
| 13. | सुधालहरी | पण्डितराजजगन्नाथ: |
| 14. | सूर्यशतकम् | मयूरभट्ट: |
| 15. | चण्डीशतकम् | बाणभट्ट: |
| 16. | भल्लटशतकम् | भल्लट: |
| 17. | वैराग्यशतकम् | अप्पयदीक्षित: |
| 18. | शान्तिशतकम् | विल्हण: |

# चम्पूकाव्यम्

गद्य-पद्यमिश्रितं चम्पूकाव्यं कथ्यते।

''चमत्कृत्य पुनाति सहृदयान् विस्मयीकृत्य प्रसादयति इति चम्पूः।

**चम्पूकाव्यस्य लक्षणम्-**

''गद्य-पद्यमयी काचिच्चम्पूरित्यपि विद्यते'' (काव्यादर्शः 1/31)

दण्डिना चम्पूकाव्यस्य बाह्यस्वरूपमेव निरुपितम्। परन्तु हेमचन्द्रः, वाग्भट्टश्च विशिष्टं स्वरूपं निगदतः। ताभ्यां सांका, सोच्छ्वासा इति विशेषणद्वयं योजितम्। तदनुसारेण-

''गद्य-पद्यमयी साङ्का सोच्छ्वासा चम्पूः'' (हेम/काव्यानुशासनं 8/9)

सामान्यतया चम्पूकाव्यस्य

वैशिष्ट्यं निम्नांकितं वर्तते-

(1) चम्पूकाव्यं गद्य-पद्यमिश्रितं प्रबंध काव्यं भवति।

(2) एतस्य विभाजनं स्तवकेषु, उल्लासेषु, उच्छवासेषु भवति।

चम्पूकाव्यस्योत्तपत्तिः विकासश्च

चम्पूशब्दः चुरादिगणगत्यर्थकः चपि (चम्प्) धातुना औणादिकेन 'उन्' प्रत्ययेन 'ऊङ्' आदेशात् निष्पन्नः। 'चम्पयति' इत्युक्ते सहैव गमयति प्रयोजयति गद्यपद्ये इति चम्पूः, इत्युक्ते यस्यां रचनायां गद्यपद्ययोः समभावेन सहयोगपूर्वकेण प्रयोगः भवति सा रचना चम्पूः भवति। हरिदासभट्टाचार्येण चम्पूशब्दस्य व्याख्या इत्थं कृता- 'चमत्कृत्य पुनाति, सहृदयान् विस्मयीकृत्यप्रसादयति, इति चम्पूः। अनेन प्रकारेण चम्पूकाव्ये शब्दचमत्कारः अर्थप्रसादश्च भवेत्। चम्पूकाव्ये वर्णनात्मकं भागमाधृत्य गद्यस्य प्रयोगः भवति तथा च अर्थगाम्भीराय पद्यस्य प्रयोगः भवति। आचार्य विश्वनाथेनोक्तम्-

'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते'। (सा.दपर्ण 6-336)

चम्पूरामायणे भोजः चम्पूकाव्यस्य विशेषतां वर्णयति यत् तस्मिन् पद्यसंयोगेन गद्यं तथैवाह्लादकं भवति यथा वाद्यमिश्रिता गीतिः।

गद्यानुबन्धरस -मिश्रित-पद्य-सूक्तिः;हृद्या हि वाद्य-कलया-कलितेव गीतिः।

तस्माद् दधातु कविमार्गजुषां सुखाय, चम्पूप्रबंधरचनां रसना मदीया।। (बालकाण्ड-3)

अग्नि पुराणेऽपि चम्पूशब्दस्य प्रयोगः प्राप्यते।

'मिश्रं चम्पूरिति ख्यातं प्रकीर्णमिति च द्विधा, (अग्नि पु. 336-38)

काव्यानुशासनस्य कर्ता हेमचन्द्रः चम्पूकाव्ये अङ्के(किमपिविशिष्टं पदं) उच्छवासेषु च विभजनं नितान्तमावश्यकं मन्यते। (गद्यपद्यमयी सांका सोच्छ्वास चम्पूः)

**चम्पूकाव्यस्य विकासः**

चम्पूपरम्परायाः आरंभः अर्थर्ववेदात् जातः। अस्मिन् गद्यपद्ययोः सम्मिलितः प्रयोगः प्राप्यते। अनेनैव प्रकारेण कृष्णयजुर्वेदीया तैत्तरीय - मैत्रायणी काठकसंहितासु गद्यपद्ययोः मिश्रितं स्वरूपं प्राप्यते। ब्राह्मणग्रन्थानां उपाख्यानेष्वपि गद्यपद्ययोः प्रयोगः मिलति। ऐतरेयब्राह्मणः हरिचन्द्रोपाख्यानं चम्पूशैल्याः

उत्कृष्टोदाहरणमस्ति। कठ-प्रश्न-उपनिषदौ गद्यपद्यमिश्रिताया: भाषाया: प्रयोग: कृत: वर्तते।

वैदिकसाहित्यानन्तरं महाभारते विष्णुपुराणे, भागवतपुराणे च गद्यपद्ययो: मिश्रणं प्राप्यते। तत्पश्चात् बौद्धजातककथास्वपि चम्पूपद्धतेर्दिग्दर्शनं भवति। तासु- अवदानशतकम्, दिव्यावदानं च आर्यशूररचिता जातकमाला।

चम्पूकाव्यस्य सर्वप्रथमं पारिभाषिकं स्वरूपं दण्डे: (600 ई.) काव्यादर्शे प्राप्यते।

अद्यावधि लब्धसाहित्यमाधृत्य इदं वक्तुं शक्यते यत् नलचम्पूकाव्यस्य रचयिता त्रिविक्रमभट्ट: एव सर्वप्रथमं काव्यरूपेण अस्या: पद्धते: प्रवर्तक:। अनन्तरं यशस्तिलक-चम्पू (सोमदेवसूरे:) पश्चात् चम्पूकाव्यस्य स्वतंन्त्रधारा प्रवाहिता। चम्पूकाव्यनां मूल स्रोत: पुराणम्। चम्पूकाव्यस्य नायक: देव:, गन्धर्व:, मानवोऽपि भवितुम् शक्नोति, नायिक अत्र अनिवार्या नास्ति। चम्पूकाव्यस्य अंगी रस: वीर:, शृंगार: शानतो वा भवति गद्यपद्ययो: मात्रा विषये नियम: नास्ति।

**विविधा: चम्पूग्रन्था:**

| **क्र.** | **चम्पूग्रन्थ:** | **रचनाकार:** | **काल:** |
|---|---|---|---|
| 1 | जीवन्धरचम्पू: | हरिश्चन्द्र: | 900 ई. |
| 2 | यशस्तिलकम् | सोमदेवसूरि: | 959 ई. |
| 3 | रामायणचम्पू: | भोजराज: | 1005 ई. |
| 4 | भागवतचम्पू: | अभिनवकालिदास: | 1100 ई. |
| 5 | उदयनसुन्दरीकथा | सोड्ढल: | 1100 ई. |
| 6 | नलचम्पू: | त्रिविक्रमभट्ट: | 1000 ई. |
| 7 | मदालसाचम्पू: | त्रिविक्रमभट्ट: | 1000 ई. |
| 8. | भारतचम्पू: | अनन्तभट्ट | |
| 9. | वरदाम्बिकापरिणयचम्पू: | कवयित्री तिरुमलाम्बा | |
| 10. | जीवनधरचम्पू: | हरिश्चन्द्र: | |
| 11. | आनन्दवृन्दावनचम्पू: | अज्ञात: | |
| 12. | नीलकण्ठविजयचम्पू: | नीलकण्ठ: | |
| 13. | नृसिंहचम्पू: | केशवभट्ट: | |
| 14. | विश्वगुणादर्शचम्पू: | वैंकटाध्वरी | |
| 15. | तत्वगुणादर्शचम्पू: | अन्नार्थ: | |
| 16. | यात्राप्रबंधचम्पू: | समुद्रपुंगवदीक्षित: | |
| 17. | भागवतचम्पू: | चिदम्बर: | |

**स्तोत्रकाव्यपरिचय:** - इष्टस्य देवस्य स्तुतिपरककाव्यं स्तोत्रकाव्यं कथ्यते।

स्तोत्रकाव्यस्य परंपरा अतिप्राचीना वर्तते। वस्तुत: काव्यस्य उद्गम: स्तोत्रकाव्यादेव अभवत्। स्तुतेरर्थे संहितासु स्तोमशब्द: प्रयुक्त:। वैदिकस्तोत्रेभ्य: लौकिकस्तोत्राणाम् परंपरा आरब्धा। लौकिक काव्ये

सर्वप्रथमं स्तोत्रकाव्यं रामायणे, महाभारते च लभ्यते। रामायणस्य आदित्यहृदयस्तोत्रं अतिप्रसिद्धमेव। कालिदासस्य रघुवंशे दशमसर्गे देवमुखात् विष्णोः स्तुतिः कुमारसम्भवे द्वितीये सर्गे देवैः ब्रह्मणः स्तुतिः स्तोत्रकाव्यस्य उत्तमं उदाहरणं वर्तते।

एवं च माघस्य शिशुपालवधे चतुदर्शे सर्गे भीष्मकृता कृष्णस्तुतिः रत्नाकरस्य हरविजयकाव्ये देवीस्तुतिः,

अश्वघोषस्य बुद्धचरिते सप्तविंशतितमे सर्गे बुद्धस्तुतिः स्तोत्रकाव्यस्योत्कृष्टं उदाहरणं वर्तते।

शतशः स्तोत्रकाव्यानि परम्परायां प्रसिद्धानि सन्ति। कानिचित् प्रमुखस्तोत्रकाव्यानि अधोदीयन्ते–

| | | |
|---|---|---|
| 1 | त्रिपुरामहिमस्तोत्रम् | ऋषिः दुर्वासा |
| 2 | शिवताण्डवस्तोत्रम् | रावणः |
| 3 | साम्बपंचाशिका | कृष्णपुत्रसाम्बः |
| 4 | शिवमहिम्नः स्तोत्रम् | पुष्पदन्तः |
| 5 | सौन्दर्यलहरी | आद्यशंकराचार्यः |
| 6 | आनन्दलहरी | आद्यशंकराचार्यः |
| 7 | पंचशती | मूककविः |
| 8 | मुकुन्दमाला | कुलशेखरः |
| 9 | आलबन्दारस्तोत्रम् | यामुनाचार्यः |
| 10 | दीनाक्रन्दनस्तोत्रम् | लोष्टककविः |
| 11 | स्तुतिकुसुमाञ्जलिः | जगद्धरभट्टः |
| 12 | महागणपतिस्त्रोतम् | राघवचैतन्यः |
| 13 | पादुकासहस्त्रम् | वेदान्तदेशिकः |
| 14 | नारायणीयम् | नारायणभट्टः |
| 15 | आनन्दमन्दाकिनी | मधुसूदनसरस्वती |
| 16 | वरदराजस्तवः | अप्पयदीक्षितः |
| 17 | चण्डीरहस्यम् | नीलकण्ठदीक्षितः |
| 18 | लक्ष्मीसहस्त्रम् | वैकटाध्वरिः |

इत्यादीनि प्रसिद्धानि सन्ति।

**सन्देशकाव्यपरिचयः** –

सन्देशकाव्यपरम्परायाः मूलं ऋग्वेदे प्राप्यते। सरमा–पणिसम्वादसूक्ते सरमा इन्द्रस्य दौत्यं स्वीकृत्य

पणिनां पार्श्वे गच्छति, तत्सन्देशं श्रावयति। महाभारतस्य नलोपाख्यानेऽपि हंस–दमयन्तीसंवादः वर्णितोऽस्ति। श्रीमद्भागवतमहापुराणे दशमस्कन्धे ब्राह्मणः श्रीकृष्णस्य सन्देशं स्वीकृत्य रुक्मिणीं पार्श्वे गच्छति।

सामान्यतया सन्देशकाव्यं त्रिविधं लभ्यते

1. श्रृंगारपरकं सन्देशकाव्यम्
2. जैन सन्देशपरककाव्यम्
3. बौद्धसन्देशपरककाव्यम्

**प्रमुखसन्देशकाव्यानि**

| | | |
|---|---|---|
| 1. | मेघदूतम् | कालिदासः |
| 2. | घटकर्परकाव्यम् | घटकर्परः |
| 3. | पवनदूतम् | धोयी |
| 4. | हंससंदेशः | पूर्णसरस्वती |
| 5. | शुकसन्देशः | लक्ष्मीदासः |
| 6. | भृंगसन्देशः | वासुदेवः |
| 7. | कोकिलसन्देशः | उद्दण्डशास्त्री |
| 8. | मयूरसंदेशः | उदयकविः |
| 9. | हंसदूतम् | वामनभट्टबाणः |
| 10. | मनोदूतम् | विष्णुदासः |
| 11. | कोकसंदेशः | विष्णुत्रातः |
| 12. | उद्धवसंन्देशः | रुपगोस्वामी |
| 13. | उद्धवदूतम् | माधवकवीन्द्रः |
| 14. | सुभगसन्देशः | नारायणकविः |
| 15. | कामसन्देशः | मातृदत्तः |
| 16. | भ्रमरदूतम् | रुद्रन्यायपंचाननः |
| 17. | पिकदूतम् | रुद्रन्यायपंचाननः |
| 18. | सारिकासन्देशः | रामपाणिवादः |

इत्यादीनि सन्देशकाव्यानि मिलन्ति।

एतदतिरिच्य अन्यविधानि काव्यानि अपि पद्यसाहित्ये विद्यमानानि सन्ति। विपुलं तद्वाङ्मयम्। अत्र तावत् नामोल्लेखः समासतः क्रियते-

शास्त्रकाव्यम्

काव्यमीमांसायां सर्वप्रथमं आचार्यो राजशेखरः शास्त्रकवीनां भेदविषये लक्षणं दत्तवान्

"योऽपि काव्ये शास्त्रार्थं निधत्ते स शास्त्रकविः" (का.मी. 5)

महाभाष्येऽपि प्रदत्तैरूदाहरणैः ज्ञायते यत् पतंजलिकालेऽपि शास्त्रकाव्यलेखनपरंपरा प्रचलिता आसीत्। पाणिनि-पतंजलि-कात्यायन -व्याडिप्रभृतिवैयाकरणानां जाम्ववतीजयम्, बालचरिम्, स्वर्गारोहणम्, प्रभृतिकाव्यानि शास्त्रकाव्यानि एव स्युः कदाचित्।

**प्रमुख शास्त्रकाव्यानि -**

| | | | |
|---|---|---|---|
| 1. | भट्टिकाव्यम् (रावणवधम्) | इदं रामायणाश्रितं व्याकरणशास्त्रकाव्यम् अस्ति | भट्टिः |
| 2. | रावणार्जुनीयम् | इदं काव्यं महाभारतीय-कार्तवीर्यार्जुनयोः कथाश्रितं वर्तते, परंतु एतस्मिन्नपि पाणिनेः अष्टाध्याय्याः सूत्राणाम् उदाहरणानि सन्ति। | भट्टभीमः |
| 3. | श्रेणिकचरितम् | इदं काव्यं कातन्त्रव्याकरणाश्रितं वर्तते। | विनप्रभसूरिः |
| 4. | वासुदेवविजयम् | इदं व्याकरणशास्त्रपरकं काव्यम्। | वासुदेवः |
| 5. | धातुकाव्यम् | धात्वाश्रितं काव्यमिदम् | नारायणभट्टः |
| 6. | कुट्टनीमतम् | ''कामसूत्रम्-नाट्यशास्त्रम्'' इत्यनयोः आश्रितं काव्यम्। | कवि दामोदरः |
| 7. | कलाविलासः | अस्मिन् काव्ये कलानां निरूपणम् अस्ति। | क्षेमेन्द्रः |

एवं प्रकारेण सन्धानकाव्यम् यमककाव्यम् चित्रकाव्यम् शब्दालंकाराश्रितं शास्त्रकाव्यम् अपि पद्यकाव्ये परिगणितं भवति। एतेषामपि सुदीर्घा परम्परा संस्कृते विद्यते।

(i) वैदिक साहित्य परिचयः (वेदनां परिचयः)

(ii) वेदांगानां परिचयः (शिक्षा-कल्प-व्याकरणम्)

(iii) पुराणपरिचयः (अष्टादश)

(iv) काव्यपरंपरा (गद्यकाव्यम्) (कथा,अख्यानिका)

(v) प्रमुख गद्यकाराः (वाणभट्ट, दण्डी, सुबंधु, अम्बिकादत्तः, पण्डिता क्षमाराव, धनपालः)

(vi) पञ्चतन्त्रम्, हितोपदेशः

(vii) नाट्यसाहित्य

(viii) निबन्धः

---

(i) वैदिक साहित्य परिचयः (ब्राह्मण ग्रंथाः, आरण्यकाः उपनिषदः)

(ii) वेदांग परिचयः (ज्योतिष-छन्द-निरुक्तम्)

(iii) काव्य परंपरा

(vi) रामायणम्, महाभारतम्

(v) पद्यकाव्यम् - चम्पूकाव्यम्

(vi) प्रमुख महाकावयः (कालिदासः, भारविः, माघः, श्रीहर्षः, राजशेखरः, अश्वघोषः)

(vii) गीतिकाव्यम्

(viii) लोककथा परंपरा

(ix) निबंधाः (संस्कृत भाषायाः, संस्कृति -सांस्कृतिकता, दीपावली, आदर्श संस्कृत विद्यालयाः, छात्र जीवनम्, जननी जन्मभूमि

(x) प्रमुख नाटककाराः (भास, कालिदास, शूद्रक, भवभूतिः, भट्नारायण, विशाखदत्त)

---

## अभ्यास प्रश्नाः

### काव्यपरम्परा

**प्रश्नवैविध्यम् -**

1. **एकपदेन उत्तरं लिखित -**

   क. काव्यं कति विधं भवति ?

   ख. महाकाव्यं केषु विभक्तं भवति ?

   ग. 'बुद्धचरितम्' इत्यस्य रचनाकारः ?

   घ. काव्यस्यारम्भः केन भवति ?

   ङ. 'नीतिशतकम्' कस्य रचना अस्ति ?

2. **एकवाक्येन उत्तरं लिखत -**

   क. आचार्य व्रिश्वनाथस्य काव्य लक्षणं लिखत ?

   ख. 'रामणीयार्थ-प्रतिपादकःशब्दः काव्यं लक्षणस्य प्रतिपादकः कः ?

   ग. कतिविधं गद्य -काव्यम् ?

   घ. गद्यपद्यात्मकं काव्यं किम् ?

   ङ. महाकाव्ये प्रमुखाः अङ्गिरसाः के भवन्ति ?

3. **त्रिचतुर्भिः वाक्यैः उत्तरं लिखत -**

   क. रूपककाव्यं कति विधं तेषां नामानि लिखत ?

   ख. पद्यकाव्यस्य संक्षेपेण परिचयं लिखत ?

   ग. महाकाव्यस्य विशेषतां लिखत ?

   घ. ऐतिहासिक महाकाव्यानि कानि ?

   ङ. संदेशकाव्यं कतिविधं कानि च तानि ?

4. **लघूत्तरीय प्रश्नाः ( त्रिंशत् शब्देषु उत्तरत )**

   क. संक्षेपेण संदेश काव्यस्य परिचयं लिखित ?

   ख. किं नाम शास्त्रकाव्यं नामोल्लेखपूवर्क च लिखत ?

   ग. स्तोत्रकाव्यं किं, प्रमुखानि स्तोत्रकाव्यानि लिखित ?

5. **रिक्तस्थानानि पूरयत -**

   क. गद्यपद्यमिश्रितं काव्यं ...................कथ्यते ।

   ख. पूर्वापरसम्बन्धरहितत्वात् .................. इति।

   ग. नायकः धीरोदात्तः ......................... भवति ।

घ. खण्डकाव्यं भवेत्काव्यस्य ....................।

6. **यथा योग्यं योजयत -**

| | | |
|---|---|---|
| क. | विक्रमाङ्कदेवचरितम् | अमरुकशतकम् |
| ख. | राजतरङ्गिणी | बिल्हण: |
| ग. | मुक्तककाव्यम् | त्रिविक्रमभट्ट: |
| घ. | नलचम्पू: | कल्हण: |

7. **शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत -**

क. चम्पूकथानां मूलस्रोत: पुराणम् ।

ख. मुक्तककाव्यं द्विविधं गीतिकाव्यं मुक्तककाव्यं च ।

ग. 'मेघदूतम्' महाकाव्यम् अस्ति ।

घ. कालिदासस्य रघुवंशे दशमसर्गे देवमुखात् विष्णो: स्तुति: गीतिकाव्यस्य उदाहरणम् ।

ङ पतञ्जलिकाले शास्त्रकाव्यलेखनपरम्परा प्रचलिता आसीत्।

8. **अधोलिखितेषु शब्देषु विशेष्य विशेषणं पृथक् कुरुत -**

क. निर्दोषवाक्यम्

ख. श्रव्यकाव्यम्

ग. बहुभाषा

घ. महाकाव्ये

ङ अतिप्रसिद्धम्

9. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरूत -**

क. लोकोत्तर:

ख. तथैव

ग. महाकाव्यस्यैकांश:

घ. स्तुतेरर्थे

ङ वर्णितोऽस्ति

10. **नामोल्लेखपूर्वकं समासविग्रहं कुरूत -**

क. साहित्यदर्पण:

ख. गीतिकाव्यम्

ग. भावतरलता

घ. गद्यपद्ययो:

ङ महाभारतम्

11. **अधोलिखितेषु प्रकृति प्रत्ययं पृथक् कुरूत -**

क. इत्युक्तम्

ख. स्वीकृतम्

ग. कृतवान्

घ. स्वीकृत्य

ङ लिखित्वा

**योग्यता विस्तारः**

1. महाकाव्यखण्डकाव्ययोः तुलनात्मकम् अध्ययनं कुरुत ।
2. बृहत्रयी लघुत्रयी महाकाव्यानि कानि तेषु विषयेषु चर्चा कुरु।

## अभ्यास प्रश्नाः

## चम्पूकाव्यम्

**प्रश्नः 1- समुचितं विकल्पं चित्वा लिखत -**

क. 'चम्पू' इत्यस्मिन् धातुः कः ?

| | | | |
|---|---|---|---|
| अ. | चपि | ब. | चम् |
| स. | चम्प् | द. | पू |

ख. चम्पूकाव्ये कस्य चमत्कारः भवति ?

| | | | |
|---|---|---|---|
| अ. | शब्दस्य | ब. | अर्थस्य |
| स. | शब्दार्थयोः | द. | वर्णस्य |

ग. 'रामायणचम्पूः' काव्यस्य रचनाकारः कः?

| | | | |
|---|---|---|---|
| अ. | हरिश्चन्द्रः | ब. | भोजराजः |
| स. | त्रिविक्रमभट्टः | द. | सोमदेवसूरिः |

घ. काव्येषु चम्पूशैल्याः प्रवर्तकः कः ?

| | | | |
|---|---|---|---|
| अ. | हरिहरः | ब. | त्रिविक्रमभट्टः |
| स. | भोजराजः | द. | सोड्ढलः |

ङ. चम्पूपरम्परायाः आरम्भः कस्मात् जातः ?

| | | | |
|---|---|---|---|
| अ. | ऋग्वेदात् | ब. | अथर्ववेदात् |
| स. | सामवेदात् | द. | यजुर्वेदात् |

**प्रश्नः 2 - एकपदेन उत्तरत -**

क. कस्मिन् पुराणे चम्पूशब्दस्य प्रयोगः प्राप्यते ?

ख. काव्यानुशासनस्य कर्ता कः ?

ग. 'काव्यार्दर्शः' इत्यस्य कर्त्ता कः ?

घ. महाकविदण्डेः कालः कः ?

**प्रश्नः 3 - एकवाक्येन उत्तरत -**

क. आचार्य विश्वनाथस्य चम्पूलक्षणं किम् ?

ख. चम्पूकाव्ये पद्यस्य प्रयोगः किमर्थं भवति ?

ग. चम्पूकाव्ये गद्यस्य प्रयोगः किमर्थं भवति ?

**प्रश्नः 4 – युग्मं मेलयत –**

| अ | आ |
|---|---|
| नलचम्पूः | भोजराजः |
| भागवत–चम्पूः | सोमदेवसूरिः |
| जीवन्धरचम्पूः | त्रिविक्रमभट्टः |
| यशस्तिलकम् | हरिश्चन्द्रः |
| रामायणचम्पू | अभिनवकालिदासः |

**प्रश्नः 5 – आम्/न लिखत –**

क. सहैव गमयति प्रयोजयति गद्यपद्ये इति चम्पूः ।

ख. काव्यानुशासनस्य कर्त्ता हेमचन्द्रः ।

ग. चम्पूपरम्परायाः आरम्भः अथर्ववेदात् जातः ।

घ. रामायणचम्पू इत्यस्य प्रणेता हरिश्चन्द्रः अस्ति ।

ङ. काव्यादर्शे चम्पूकाव्यस्य पारिभाषिकं स्वरूपं प्राप्यते।

**प्रश्नः 6 – उचितैः पदैः रिक्तस्थानं पूरयतु –**

(विस्मयीकृत्य प्रसादयति, चम्पूरिति, चम्पूः, सहैव गमयति, चम्पूः)

क. गद्यपद्यमयं ......................... चम्पूरित्यभिधीयते ।

ख. चमत्कृत्य पुनाति, सहृदयान् ........................ इति चम्पूः ।

ग. ................ प्रयोजयति गद्यपद्ये इति चम्पूः।

घ. गद्यपद्यमयी साङ्का सोच्छ्वासा .................।

ङ. मिश्रं .................ख्यातं प्रकीर्णमिति च द्विधा।

**प्रश्नः 7 – अधोलिखितेषु शब्देषु प्रकृति-प्रत्ययं प्रथक् कुरुत ।**

| क्रमांक | शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| क. | आधृत्य | ................ | ................ |
| ख. | वाद्यमिश्रिता | ................ | ................ |
| ग. | सम्मिलितः | ................ | ................ |
| घ. | कृताः | ................ | ................ |
| ङ. | वक्तुम् | ................ | ................ |

**प्रश्नः 8 – अधोलिखितेषु विभक्तिं वचनं लिङ्गं मूलशब्दं च लिखत ।**

क. आदेशात्

ख. सहृदयान्

ग. भाषायाः

घ. महाभारते

ङ. परम्परायाः

**प्रश्नः 9 - क्रियापदानां धातुं पुरुषं वचनं लकारं च लिखत ।**

क. चम्पयति

ख. जातः

ग. रचिता

घ. तासाम्

ङ. इमानि

**प्रश्नः 10 - चम्पूकाव्यस्य वैशिष्ट्यं लिखत ।**

**योग्यताविस्तारः**

- शिक्षकैः सह चम्पूकाव्यस्य विषये चर्चा कुर्वन्तु।
- चम्पूकाव्यानां विशेषतां लिखन्तु।

❖ ❖ ★ ❖ ❖

# चतुर्थः अध्यायः
# लौकिकसाहित्य परिचयः

महर्षिवाल्मीकिविरचितं रामायणम् आदिकाव्यं महाकाव्यं वर्तते। रामायणं परवर्तिकाव्यपरम्परायाम् उपजीव्यं काव्यं मन्यते। महाकाव्येषु एतस्य सर्वोत्कृष्टं स्थानं वर्तते। एतस्य महाकाव्यस्य न केवलं साहित्यं अपितु धार्मिकं, सांस्कृतिकं महत्त्वमपि विद्यते।

संस्कृतसाहित्ये नैकानि प्रसिद्धानि काव्यानि सन्ति। तेषु काव्येषु रामायणम् आदिकाव्यं वर्तते। महर्षिवाल्मीकिः आदिकविः। महर्षिवाल्मीकिकृते रामायणमहाकाव्ये सप्तकाण्डानि सन्ति। एतेषु काण्डेषु श्रीरामचन्द्रस्य सम्पूर्ण चरित्रं वर्णितमस्ति। यथा रामायणे भारतीय समाजस्य संस्कृतेश्च सुमज्जवलं मर्यादितं स्वाभाविकं स्वरूपं दृश्यते तथा नान्यत्र कुत्रापि। पाठोऽयं रामायणमहाकाव्यस्य सामान्यं परिचयं ददाति।

**आदिकाव्यं रामायणम्** -

लौकिक संस्कृतसाहित्ये छन्दोबद्ध कवितायाः प्रादुर्भावः वाल्मीकितः एवं जातः। अतएव महर्षि-वाल्मीकिकृतं रामायणम् 'आदिकाव्यम्' इति कथ्यते।

महर्षिवाल्मीकिः कया प्रेरणया रामायणम् अलिखत् इत्यस्मिन् विषये प्रसिद्धाऽस्ति घटनैका। यदा महर्षिः स्नानाय तमसानदीं गतवान् आसीत् तदा कस्यचित् व्याधस्य शरैर्विद्धं क्रौञ्चद्वन्द्वयोः एकं मृतं विलोक्य, विलपन्तीं क्रौञ्चीम् अपश्यत्। करुणया वाल्मीकेः मुखारविन्दात् शोकतरंगिणी वाणी श्लोकरूपेणैव निःसृतवती-

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।

महर्षेः मुखनिर्गलितं करुणामयं इदं पद्यम् भारतीय काव्यस्य आदिकविता अस्तीति ज्ञायते। परमकल्याणमयीं वाणी श्रुत्वा स्वयं ब्रह्मा समुपस्थिाय वाल्मीकिं रामायणं रचयितुं च अकथयत्। अनया प्रेरणया एव महर्षिः रामायणम् अरीरचत्। सर्वप्रथमं च लौकिकछन्दो निबद्धस्य रामायणस्य रचना जाता। अतएवं रामायणम् 'आदिकाव्यम्' वाल्मीकिश्च 'आदिकविः' इत्युच्यते।

**रामायणस्य रचनाकाल** -

रामायणस्य रचनाकाल-विषये विदुषां मतम्

1. मगधनरेशः अजातशत्रुः (500 बी.सी.) पाटलीपुत्रस्य स्थापनां कृतवान्। अनेन एव राज्ञा शत्रोः आक्रमणात् रक्षार्थं गंगाशोणयोः संगमस्थले दुर्गमेकं निर्मितम्। रामायणे गंगाशोणयोः संगमात् श्रीरामगमनं वर्णितमस्ति, किन्तु दुर्गस्य उल्लेखः नास्ति। अतः रामायणस्य रचना

500 बी.सी. प्रागेव सिद्धयति।

2. रामायणे कौशलनरेशस्य राजधानी 'अयोध्या' इति वर्णिता अस्ति। परन्तु बौद्ध-जैनग्रन्थेषु नगरमिदं 'साकेत' नाम्ना प्रसिद्धं दृश्यते। रामपुत्रो लवः स्वराजधानीं श्रावस्त्यां स्थापितवान्। बुद्धस्य समये कौशलनरेशः प्रसेनजित् श्रावस्त्यामेव राज्यं करोति स्म। अतः रामायणस्य रचना बुद्धात् प्रागेव भवितुम् अर्हति।

3. रामायणे विशाला मिथिला चेति द्वे राज्ये वर्णिते स्तः। बुद्धस्य समये इमे द्वे नगर्यौ वैशालीराज्यान्तर्गतमेव वर्णिते, अनेनैव प्रमाणेन रामायणं बुद्धात् प्राचीनतम् इति सिद्धयति।

एतेषां ग्रन्थानां साक्ष्यानां च पर्यालोचनेन रामायणस्य रचना बुद्धस्य प्रादुर्भावात् प्रागेव सिद्धयति। अतः रामायणस्य रचनाकालः 500 बी.सी. प्रागेव स्वीकर्तव्यः इति सम्यक् प्रतिभाति

1. श्रावस्तीतिपुरा रम्या श्राविता च लवस्य च। (उत्तर 108-4)

**रामायणस्य सामान्यं स्वरूपम्** -

सप्तकाण्डानि बाल-अयोध्या-अरण्य-किष्किन्धा-सुन्दर-युद्ध-उत्तरकाण्डानि तथा च रामायणे चतुर्विंशति सहस्त्रं श्लोकाः सन्ति। (रामायण 1/4/2) अतः काव्यम् इदं चतुर्विंशतिसाहस्रीसंहिता इत्यनेन पदेन अभिधीयते। यावन्ति अक्षराणि गायत्री मन्त्रे तावत्सहस्रपरिमाणं रामायणम् इति दृढम्। इदमपि प्रत्यक्षसिद्धं यत् प्रतिसहस्रतमश्लोकादौ गायत्रीमन्त्रस्य एकैकमक्षरं प्राप्यते।

बहवो विद्वांसः उत्तरकाण्डं बालकाण्डस्य कियन्तमंशं च प्रक्षिप्तं स्वीकुर्वन्ति। 'जैकोबी' महोदयस्तु अयोध्याकाण्डादारभ्य युद्धकाण्डान्तं काण्डपञ्चकमेव वाल्मीकिकृतं मन्यते। लङ्काकाण्डस्यान्ते ग्रन्थः समाप्त इति प्रतिभाति उत्तरकाण्डवर्णितविषयानां सूचना च प्राक्तनकाण्डेषु नायातीति।

**रामायणस्य कथा परिचयः** -

रामायणे सर्गाः पञ्चशतम् (500 रामायण 1/4/2)

**बालकाण्ड** - (77 सर्ग) सप्तसप्ततिः सर्गाः

अयोध्यायाः अश्वमेधयज्ञः, देवतानां प्रार्थना, रामावतारः, श्रीरामस्यबाल्यावस्वथा, विश्वामित्रेण रामाय बला अतिबलाश्च विद्याः प्रदत्ताः, ताडकायाः वधः, अहल्यायाः उद्धारः, शिवधनुषस्य वृत्तान्तः, रामेण धनुर्भङ्गः, दशरथस्य मिथिलाऽऽगनम्, रामसीताविवाहयोः विस्तृतवर्णनम्, परशुरामस्य गर्वभङ्गः

**अयोध्याकाण्डः** (119 सर्गाः) एकोनविंशत्याधिकशतम्

राजप्रसादस्य घटनानां वर्णनम्, कैकेयीमातुः वंचना-भरतस्य राज्याभिषेकः, रामस्य वनवासः, रामवनगमनम्,

पुत्रवियोगेन दशरथस्य देहत्यागः, रामाय नेतुं भरतस्य चित्रकूटगमनम्, इत्यादिघटनानां उल्लेखः दृश्यते।

तथाच अस्मिन् काण्डे अनेके महत्त्वपूर्णाः प्रसङ्गाः सन्ति

यथा - वने दुःखानां वर्णनम्, भरतस्य संतापः, रामस्य भरताय राजधर्मोपदेशः, अनुसुयया पातिव्रत्यधर्मोपदेशः रामस्य चित्रकूटाऽनन्तरं दण्डकारण्ये प्रवेशः।

**अरण्यकाण्डः** - (75 सर्गाः) पञ्चसप्ततिः

रामलक्ष्मणसीतानां दण्डकारण्ये निवासः

पञ्चवटेः प्रवेशः, रावणस्य भगिनी शूर्पणखायाः परिचियः, चतुर्दशसहस्रराक्षसानां संहारः, छलपूर्वकं सीतायाः हरणम्, रावणेन जटायुः वधः, सुग्रीवस्य मैत्रीत्यादयः

**किष्किन्धाकाण्ड (67 सर्गाः)**- बालिवधः, सुग्रीवः अङ्गदस्य च राज्याभिषेकः, लक्ष्मणस्य कोपः, हनुमतः दक्षिणदिशिः भ्रमणम् इत्यादयः

**सुन्दरकाण्डः (68 सर्गाः अष्टषष्टिः सर्गाः)**- हनुमतः लङ्कायां प्रवेशः, रावणस्यान्तःपुरेः सीतायाः अन्वेषणम्, सीतादर्शनम्, हनुमतः बंधनम्, लङ्का दहनम्, हनुमतः प्रत्यावर्तनम् हनुमता सीतायाः सुन्दरवृतान्तं कथनम् काण्डेऽस्मिन् नायकः हनुमान्

**युद्धकाण्डः** : (128 शताधिकअष्टविंशतिः सर्गाः) - समुद्रे सेतुबन्धः, रामरावणयोः युद्धम्, विभीषणस्य राज्याभिषेकः, सीतायाः अग्निपरीक्षा, रामस्य अयोध्यागमनम्, रामस्य राज्याभिषेकः।

**उत्तरकाण्डः** - सर्गाः शताधिकएकादशाः सर्गाः अनेकानीतिहासपुराणाख्यानानि सन्ति, रावण वधस्य कथा, सीतायाः परित्यागः, लवकुशयोः जन्मः, राजसूय यज्ञः, अश्वमेध यज्ञः, सीतायाः पातालप्रवेशः लवकुशयोः राज्याभिषेकः इत्यादयः।

**रामायणस्य काव्यवैशिष्ट्यं** -

आदिकाव्यं वाल्मीकिरामायणं संस्कृतवाङ्मयस्य अनुपमं रत्नं विद्यते। काव्यक्षेत्रे एतस्य विलक्षणं साहित्यिकं महत्त्वं वर्तते। सर्वप्रथमं रामायणं काव्यं वर्तते तदन्तरमेव धर्मग्रन्थः इतिहासः अन्यद्वा।

1. रसः - ''मा निषाद प्रतिष्ठा...............।

   इति क्रौञ्चवधरूपिकारुणिक घटनातः उद्भूते रामायणग्रन्थे करुणरसस्य एव प्राधान्यम्। अत एव उक्तम्-

2. छन्दः - आदिकविवाल्मीकिमुखात् निर्गतस्य अनुष्टुप्छन्दसः एव अत्र प्राधान्यं वर्तते।

3. **अलङ्कारः** - रामायणे अनुप्रास-उपमा-रूपक-उत्प्रेक्षा-अनन्वय अर्थान्तरन्यासादिशब्दार्थालंकाराः स्वाभाविकतया प्रयुक्ताः।

तद्यथा - (1) अनुप्रासः ''हंसो यथा राजतपंजरथः सिंहो यथा यन्दरकन्दरस्थः''

(2) उपमा - ''समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव''।

(3) अनन्वय - ''गगनं गगनाकारं सागरः सागरोपमा।<br>राम-रावणयोर्युद्धं रामरावणयोरिव।''

4. **भाषा भावश्च** - काव्यसौन्दर्यदृष्ट्या भाषा सहजा सरला प्रवाहात्मिका च वर्तते। रामचरित्रवर्णनात् भारतीय संस्कृतेः अत्युत्कृष्टभावानां संग्रहः वर्तते गन्थोऽयम्।

5. **रामायणे पञ्चसन्धयः** -

   मुख-प्रतिमुख गर्भ विमर्श निर्वहणसन्धयः

   | | |
   |---|---|
   | बालकाण्डायोध्याकाण्डयोः | मुख सन्धिः |
   | अरण्यकाण्डे | प्रतिमुख सन्धिः |
   | किष्किन्धाकाण्डे | गर्भसन्धिः |

| | |
|---|---|
| सुन्दरकाण्डे | विमर्शसन्धिः |
| युद्धकाण्डे | निर्वहणसन्धिः |

**रामायणस्य मुख्यो रसः -**

रामायणे प्रायः सर्वे रसाः दृष्टिगोचराः भवन्ति। करुण-शृंगार-वीराश्च प्रमुखाः। कविभिः रामायणे मुख्यो रसः (अंगीरसः) करुणः इति स्वीकृतः। महर्षेः कारुण्यमेव रामायणस्य आदिकारणम्। अतः अत्र संदेहः न। ''श्री आनन्दवर्धनाचार्येण'' रामायणे मुख्यरसत्वं करुणस्यैव स्वीकृतम् ''रामायणे हि करुणो रसः स्वयमादिकविना सूचितः शोकः श्लोकत्वमागतः इत्येवं वादिना निर्व्यूढ़श्च''।

**रामायणस्य लोकप्रियता -**

संसारे किमपि काव्यं लोकप्रियतायां रामायणस्य समतां कर्तुं न क्षमते, अतएव अस्य प्रचारोपि पूर्णतया जातः। महाभारते तृतीयपर्वणि रामकथा रामायणानुसारेण वर्णिता। अग्नि-विष्णु-गरुड भागवत ब्रह्माण्डपुराणेषु च रामायणानुसारेण रामस्य चरितं दृश्यते। भासकालिदासादयः प्राचीनाः कवयः रामायणमेव आधारभूत ग्रन्थरूपेण स्वीकृतवन्तः। अश्वघोषप्रभृतयो बौद्धकवयोऽपि स्वकाव्यानि रामायणानुकृतिवारिभिरसिञ्चन्।

खीष्ट प्रथमशतके जैनकविना विमलसूरिणा रामायणमुपाजीव्य 'पउम चरिउ' नामको ग्रन्थो रचितः। वर्मा (इन्डोचाइना) प्राच्यद्वीपादिभूभागेष्वपि रामायणं लोकप्रियत्वं प्राप्नोति। भारतस्य कापि एतादृशी भाषा नास्ति यत्र रामायणस्यानुवादो न जातः स्यात्। वैदेशिक्यो भाषा अपि रामायणस्यानुवादेनात्मानं धन्यं मन्यते।

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।

तावद् रामायणकथा लोकेषु प्रचरिष्यति।। रामायण, बालकांडम् (2-36-7)

**रामायणे सामाजिकादर्शाः -**

रामायणकालिकसमाजे परिवारस्य स्वरूपं पितृसत्तात्मकम् आसीत् यथा 'पितरि शुश्रुषा तस्य वा वचनक्रिया''। अयोध्यातः पित्राज्ञया एव रामः वनम् अगच्छत्। पतिव्रतास्त्रीषु सीता-अनसूया-कौशल्या-सुलोचना इत्यादीनां नामानि प्रसिद्धानि आसन्। तद्यथा स्त्रीणाम् अर्थस्वभावानां परमं दैवतं पतिः। शिक्षायाः स्वरूपं मौखिकम् आसीत्। तदानीं चत्वारः वर्णाः, चत्वारः आश्रमाः षोडशसंस्कारश्च प्रचलिताः आसन्। वाल्मीकि-भारद्वाज-विश्वमित्रादि ऋषीणां आश्रमेषु निरन्तरं यज्ञ-अग्निहोत्र-वेदाध्ययन-युद्धविद्यादीनाम् अध्ययनं भवति स्म।

इत्थं भारतीयसमाजस्य संस्कृतेश्च समुज्जवलं मर्यादितं स्वाभाविकस्वरूपं यथा रामायणे दृश्यते तथा नान्यत्र कुत्रापि।

**रामायणस्य उपजीव्यत्म् -**

मनीषिणः वाल्मीकिरामायणं ''आदिकाव्यम्'' ''आर्षकाव्यम्'' ''उपाजीव्यकाव्यम्''

''विकासशीलमहाकाव्यं'' च वदन्ति। जीवनस्य शाश्वतमूल्यानां वर्णनकाारणत् रामायणमधिकृत्य शताधिकाः ग्रन्थाः रचिता। तद्यथा -

**रामायण ग्रन्था : -**

| | |
|---|---|
| (1) अध्यात्मरामायणम् | (2) अद्भुतरामाणम् |
| (3) अगस्त्यरामायणम् | (4) आनन्दरामायणम् |
| (5) भुसुण्डिरामायणम् | |

**काव्यग्रन्थाः -**

(1) रघुवंशमहाकाव्यम् — कालिदासः
(2) जानकीहरणम् — कुमारदासः
(3) सेतुबन्धः — प्रवरसेनः
(4) रामायणमञ्जरी — महाकवि क्षेत्रेन्द्रः
(5) भट्टिकाव्यम् — महाकविभट्टिः

**नाटकानि -**

(1) अभिषेकनाटकम् — भासः
(2) प्रतिभानाटकम् — भासः
(3) महावीरचरितम् — भवभूतिः
(4) उत्तररामचरितम् — भवभूतिः
(5) अनर्घराघवम् — महाकविमुरारिः
(6) बालरामायणम् — राजशेखरः
(7) कुन्दमाला — दिङ्नागः
(8) प्रसन्नराघवम् — जयदेवः
(9) आश्चर्यचूडामणिः — शक्तिभद्रः
(10) हनुमान्नाटकम् — दामोदरमिश्रः

**चम्पूकाव्यानि**

(1) रामायणचम्पू — भोजः
(2) उत्तरचम्पू — वेंकटाध्वरिः
(3) रामकथा — अनन्तभट्ट
(4) चम्पूरामायणम् — लक्ष्मणभट्ट

**अन्यभारतीयभाषाषु रामायणस्य प्रभाव :-**

(1) रामचरिमानसम् — महाकवितुलसीदासः
(2) रामचन्द्रिका — केशवदासः
(3) साकेतमहाकाव्यम् — मैथिलीयशरणगुप्तः
(4) वैदेहीवनवासः — अयोध्यासिंह उपाध्यायः ''हरिऔधः''

## ऐतिहासिकं महाभारतम्

महर्षिः कृष्णद्वैपायनव्यासेन विरचितं ऐतिहासिक महाकाव्यं वर्तते ''महाभारतम्'' ग्रन्थोऽयम् अष्टादशपर्वषु विभक्तोऽस्ति।

ग्रन्थेऽस्मिन् भारतीयसंस्कृतेः लोकजीवनस्य च व्यापकं चित्रणमस्ति। अत्र न केवलं कौरव

पाण्डवानां संघर्षवर्णनम् अपितु, राजधर्म-राष्ट्र-धर्म-नीतिशास्त्र-योगत्रय पुरुषार्थचतुष्टयादीनां बाहुल्यम् अस्ति।

कथितम् यत्

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र, यनेहास्ति न तत् क्वचित्।। महा.आदि. 62-53

**महाभारतम्** -

प्राय: सर्वे भारतीया: विद्वांसो मन्यन्ते यत् महाभारतं प्राग् जयनाम्ना ततो भारतनाम्ना तत: परतश्च महाभारतनाम्ना प्रसिद्धम्।

नारायणं नमस्कृत्य नरं चैव नरोत्तम्।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्।। महाभारतं (मंगलाचरणम्)

इति पद्यं महाभारतस्य जयशब्दव्यवहार्यतामाह।

''जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा'' महाभारतं 1/62/20

पद्यमिदं महाभारतस्य जय नामकरणं निरूपयति।

मौलिकं जयनाम्ना व्यवहृत-महाभारतमल्पपरिमाणं स्वरूपत ऐतिहासिककथाप्रधानञ्चावर्तत नोपदेशप्रधानम्। जय इति नामैव तस्य ग्रन्थस्य पाण्डवविजयमात्रबोधनाय निर्मितत्वमाह। अमुमेव जयनामानं ग्रन्थं व्यासो निजशिष्यं वैशम्पायनमध्यापयामासेति सा प्रथमावस्था महाभारतस्य।

वैशम्परायनश्च गुरोर्व्यासादधीते जये स्वरचितसंवादादिकं योजयित्वा नागयज्ञावसरे जनमेजयं श्रावयामासेति तस्यामवस्थायां चतुर्विंशतिसहस्त्र श्लोकपरिमाणतां गतं भारतसंज्ञया प्रथमानश्चेदं जातम्। सेयं द्वितीयाऽवस्था।

चतुर्विंशतिसाहस्त्रीं चक्रे भारतसंहिताम्।
उपाख्यानैर्विना तावद् भारतं प्रोच्यते बुधै:।। महाभारतं, आदिपर्व 1/102-3

अथऽयमेव चतुर्विंशतिसाहस्री भारतग्रन्थ: शौनकाय सौतिना श्रावणकाले तत्पृष्टप्रतिवचनै: समुपबृंहितो भूत्वा लक्षश्लोकपरिमाणो महाभारतसंज्ञया प्रथितोऽभवत्। सेयं तृतीया पूर्णाऽवस्था। तृतीयावस्थायां व्यवहारविषयतां गतोऽयं ग्रन्थो महाभारतमिति तस्य संज्ञा सौतिकृता।

महत्त्वाद् भारतत्त्वाच्च महाभारतमुच्यते। 2/1/274 महाभारतं प्रथमं महाभारतमितिहास: पुराणमाख्यानञ्चेति नामभिराख्यायते स्म। साम्प्रतिकास्तु महाभारतम् आचारशास्त्रम् नीतिशास्त्रम् धर्मार्थकाममोक्षाख्यचतुर्वर्गसाध नम् चामनन्ति। भारतं पञ्चमो वेद: इति सर्वत्र प्रचारितम्। सर्वत्रास्मिन् ग्रन्थे वैष्णवसिद्धान्तानां प्रमुखत्वेन प्रतिपादनात् महाभारतं वैष्णवस्मृतिरप्याख्यायते। महाभारतस्य अशीतिप्रतिशतभागोऽनेकविधोपदेशमय: विंशतिप्रतिशतभाग एवेतिहासप्रतिपाद अत एव अस्य नीतिशास्त्रेषु गणनोचिता एव। अत: ग्रन्थोऽयम् चतुविंशतिसाहस्रश्लोकत: लक्ष्यश्लोकी अभवत्। महाभारतस्य विकासस्य सारणी रूप -

| **ग्रन्थ नाम** | **कर्ता** | **श्लोकसंख्या** | **वक्ताश्रोता** | **अवसर:** |
|---|---|---|---|---|
| जय: | व्यास: | 8800 | व्यास-वैशम्पायनौ | धर्मचर्चा |
| भारतम् | वैशम्पायन: | 24 सहस्र | वैशम्पायन' जनमेजयौ | नागयज्ञ: |
| महाभारतम् | सौति: | लक्ष्यश्लोका: | सौति-शौनकादि | नैमिषारण्ये यज्ञ: |

**महाभारतस्य रचनाकालः -**

सम्प्रत्युपलभ्यमानं महाभारतं मूलमहाभारतात् परतो बहुषु शतके व्यतीतेष्वेव निर्मितं स्यादतो

मूलमहाभारतस्य जयाभिधानस्य वर्तमानमहाभरतात् पूर्वकालिकत्वं निश्चितम्। अत्र वर्तमानमहाभारतस्य रचनाकालसम्बन्धे विचारणीयमस्ति तत्र 445 खीष्टीयाब्दस्य शिलालेखे ''शतसाहस्रयां संहितायां वेदव्यासेनोक्तम्'' इति महाभारतस्य निर्देशः प्राप्यते। अतः एतत् पूर्वमस्यास्तित्वं प्रतीयते।

कनिष्कसभापण्डितः श्री अश्वघोषः वाज्रसूच्यां हरिवंश महाभारतयोः पद्यमुद्धरति। आश्वलायनगृह्यसूत्रे

विष्णुसहस्रनाम्नः उल्लेखः तथा श्रीमद्भागवत्गीतायाम् उद्धृतः श्लोकश्च प्राप्यते। अनयोः द्वयोः ग्रन्थयोः स्थितिकालः ईस्वीय पूर्व चतुःशताब्द्यां मन्यते। अतः महाभारतस्य रचना इतोऽपि पूर्वं जातेति प्रतीयते। बुद्धात् पूर्वमेव महाभारतस्य रचना जातेति निश्चप्रचम्। अतः महाभारतस्य रचनाकालः 400 ईसवीतः द्विशतवर्षपूर्व मन्तव्य इति न्यायसंगतः प्रतिभाति।

**महाभारतस्य स्वरूपम् -**

महाभारतमष्टादशसु पर्वसु विभक्तं वर्तते -

मद्वयं शद्वयं चैव, सन्द्वयं वद्वक्ष्यं तथा। अ-स्तो-स्त्री-भ-द्र-काश्चैवम्, आत्रयी भाति 'भारते'।। (कपिलदेव) संस्कृत साहित्य अ.-4

| | |
|---|---|
| 1. आदिपर्वम् | 2. सभापर्वम् |
| 3. वनपर्वम् | 4. विराटपर्वम् |
| 5. उद्योगपर्वम् | 6. भीष्मपर्वम् |
| 7. द्रोणपर्वम् | 8. कर्णपर्वम् |
| 9. शल्यपर्वम् | 10. सौप्तिकपर्वम् |
| 11. स्त्रीपर्वम् | 12. शान्तिपर्वम् |
| 13. अनुशासनपर्वम् | 14. अश्वमेघपर्वम् |
| 15. आश्रमवासिपर्वम् | 16. मौसलपर्वम् |
| 17. महाप्रास्थानिकपर्वम् | 18. स्वर्गारोहणपर्वम् |

अनुषङ्गतः अत्र शकुन्तलोपाख्यानं, मत्स्योपाख्यानं, रामोपाख्यानं, शिविकथा, सावित्रीकथा, नलोपाख्यानादीनि च वर्णितानि सन्ति।

युद्धवर्णनमात्रं न व्यासस्य लक्ष्यमपितु भौतिकजीवनस्य असारतां प्रकाश्य प्राणिनां मोक्षमार्गे प्रवर्तनेव व्यासस्य महाभारतप्रणयने उद्देश्यमासीत्। अत एव अत्र शान्तो रसः प्रधानभूतः, वीरस्तु रसोऽङ्गभावं गतः।

व्यासस्य कृतिरियं सर्वैरितिहासः इत्युच्यते यतोऽत्र वीराणां पुण्या गाथा वर्णिता। अयं ग्रन्थो धार्मिकग्रन्थोऽस्ति। येन लोकः स्वकल्याणं गवेषयति।

अत्रैव ग्रन्थेऽस्मिन् गीतारत्नं विद्यते या दुग्धेव प्रतीयते अनवरतं दुह्यमानाऽपि। गीताग्रन्थस्यादरो महाभारतस्यैव विशिष्टतां प्रमाणयति।

**महाभारतकालिकसमाजः -**

महाभारतकालिकसमाजे मातृपितृगुरुअतिथीनां पूजनीयं स्थानम् आसीत्। तदानीन्तनस्य भीष्मस्य पितृभक्तिः एकलव्यार्जुनयोः गुरुभक्तिः सुप्रसिद्धा आसीत्। पुत्रपुत्र्योः भेदः न आसीत्।

''यथैवात्मा तथा पुत्रः, पुत्रेण दुहिता समा।''

तात्कालिक - गान्धारी - कुन्ती - द्रोपदी - सुभद्रा - सत्यभामादिषु नारीषु दायित्वबोधः अधिकारानुकूलस्य सामर्थ्यम् आसीत्। विद्यार्थिनः गुरुकुलं गत्वा पठन्ति स्म। तदानीम् आन्वीक्षिकी त्रयीवार्ता दण्डनीति आयुर्वेदादीनां शिक्षा दीयते स्म -

''त्रयी चान्वीक्षिकी चैव वार्ता च भरतर्षभ''

अतः कथयितुं शक्यते यत् महाभारतकालीनसमाजे लोकव्यवहाराणां विचित्र समावेशः दृश्यते।

**महाभारतस्य साहित्यिकं महत्त्वम् -**

आचार्यभामहेन काव्यलक्षणेषु काव्यस्य यावन्ति लक्षणानि प्रयोजनानि च उक्तानि, तानि सर्वाणि महाभारते सिद्धयन्ति। अतएव महाभारतं एकः विलक्षणः साहित्यग्रन्थोऽस्ति।

1. गुणः रीतिश्च - काव्यशास्त्रीदृष्टया महाभारते 'पाञ्चालीरीतिः' विद्यते

   ''शब्दार्थयोः समो गुम्फ पाञ्चालीरीतिरिष्यते''

   अतः ग्रन्थोऽयम् ओज प्रसाद माधुर्यादिभिः सर्वैः काव्यगुणैः परिपूर्णोऽस्ति।

2. रसः - महाभारतस्याङ्गीरसः तु शान्तरसः एव तथाऽपि भीष्म-द्रोण-कर्ण-शल्यादिषु-पर्वसु वीररसस्य धारा अपि प्रवाहिता अस्ति।

3. अलङ्कारः- महाभारते शब्दाऽलङ्कारा - अर्थाऽलङ्कारश्च उभयोः प्रयोगः वर्तते। शब्दालङ्कारेषु मुख्यरूपेण 'अनुप्रासः' अर्थालङ्कारेषु उपमा-रूपक-उत्प्रेक्षा-अर्थान्तरन्यासश्च दृश्यन्ते-

**उपमायाः उदाहरणम् -**

पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्।
मालाकार इवारामे, न यथाऽङ्गारकारकः।। (उद्योग 34-18)

4. छन्दः - महाभारते अधिकांशतः अनुष्टुपछन्दस्य प्रयोगः दृश्यते कुत्रचित् गद्यात्मको भागः अपि।

   अन्येषां छन्दसामपि प्रयोगः यदा कदा दृश्यते।

5. भाषाशैली -संवादात्मिका शैली वर्तते महाभारतस्य।

   भाषासरला, गंभीरा प्रभावोत्पादिका वर्तते।

   तद्यथा - कालो वा कारणं राज्ञो राजा वा कालकारणम्।
   इति ते संशयो मा भूद् राजा कालस्य कारणम्।।

**महाभारतस्य उपजीव्यम् -**

महाभारतं सर्वाधिकप्रसिद्धमहाकाव्यम् अस्ति। जीवनस्य शाश्वत मूल्यानां वर्णनकारणात्, सर्वेषां रसानां समुचितपरिपाककारणात् एवञ्च अनेकानेक लघु-लघु आख्यानोपाख्यानानां संग्रहकारणात्। बहवः कवयः इतः मार्गदर्शनं प्राप्य काव्यरचनां कृतवन्तः।

तद्यथा -

(क) सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति।
पर्जन्य इव भूतानामक्षयो भरतद्रुमः ।। (महा.आदि. 1-108)

(ख) इदं कविवरैः सर्वैराख्यानमुपजीव्यते।
उदयप्रेप्सुभिर्भृव्यैरभिजात इवेश्वरः।। (महा.आदि. 2-390)

**महाकाव्यानि** -

| | | |
|---|---|---|
| शिशुपालवधम् | - | माघस्य (सभापर्वम्) |
| नैषधीयचरितम् | - | श्रीहर्षस्य (वनपर्वम्) |
| किरातार्जुनीयम् | - | भारवेः (वनपर्वम्) |

**नाटकानि** -

| | | |
|---|---|---|
| दूतघटोत्कचम् | - | महाकवि भासस्य |
| दूतवाक्यम् | - | नाटकम् |
| कर्णभारम् | - | नाटकम् |
| मध्यमत्यायोगम् | - | नाटकम् |
| पञ्चरात्रम् | - | नाटकम् |
| ऊरुभङ्गम् | - | नाटकम् |
| अभिज्ञानशाकुन्तलम् | - | महाकविकालिदासस्य (आदिपर्वम्) |
| वेणिसंहारम् | - | भट्टनारायणस्य |
| बालभारतम् | - | राजशेखरस्य |

(3) चम्पूकाव्यानि -

| | | |
|---|---|---|
| नलचम्पूः | - | त्रिविक्रमभट्टस्य (वनपर्वम्) |
| भारतचम्पूः | - | अनन्तभट्टस्य |
| पाञ्चालीस्वयंवरचम्पूः | - | नारायणभट्टस्य |
| द्रौपदीपरिणयचम्पूः | - | चन्द्रकवेः |

इत्थं महाभारतम् परिवर्तिग्रन्थानां कृते अक्षयकोषवत् विद्यते।

महाभारतस्य विशिष्टः ग्रन्थात्मकः अंश :

महाभारतस्य कतिपय एतादृशाः अंशाः सन्ति ये स्वयं स्वतन्त्र ग्रन्थरूपेण परिगणिताः -

यथा -

1. शकुन्तलोपाख्यानम् - आख्यानोऽयम् महाभारतस्य आदिपर्व (अध्याय 68-74) पर्यन्तम् अस्ति।
2. नलोपाख्यानम् - आख्यानोऽयम् महाभारतस्य वनपर्वस्य (अध्याय 53-79) संङ्कलिताः

3. रामोपाख्यानम् - वनपर्वस्य 274 अध्यायत:

4. भगवद्‌गीता - भीष्मपर्वस्य 25 अध्यायत: 42 अध्याय पर्यन्तम्

इत्यादि आख्यनानि परवर्तिकवीनां कृते प्रेरकाणि उपजीव्यानि च अभवन्।

## अभ्यासकार्यम्

### आदिकाव्य-रामायणम्

**प्रश्न 1 - एकपदेन उत्तरं लिखत -**

क. रामायणस्य रचयिता क: ?

ख. रामायणे कति काण्डा: सन्ति ?

ग. रामायणमहाकाव्ये कति श्लोका: सन्ति: ?

घ. आदिकाव्ये कस्य चरित्रवर्णनम् अस्ति ?

**प्रश्न 2 - एकवाक्येन उत्तरं लिखत -**

क. स्वयं ब्रह्मा कदा समुपस्थितवान् ?

ख. कया प्रेरणया महर्षि: रामायणम् अरचयत् ?

ग. रामायणमहाकाव्ये प्रमुख: रस: क:?

घ. समुद्रे सेतुबंधप्रसङ्ग: कस्मिन् काण्डे ?

ङ. रामायणस्य काण्डानां नामानि लिखत ?

**प्रश्न 3 - त्रिचतुर्भिर्वाक्यै: उत्तरं लिखत -**

क. भारतीय काव्यस्य आदिकविताया: पद्यं लिखत ?

ख. प्रक्षिप्त काण्डानि कानि कथञ्च ?

ग. रामायणकालिक सामाजस्य वर्णनं कुरुत ?

घ. रामायणस्य उपजीव्यत्वं प्रतिपादयत ?

ङ. रामायणस्य काव्यवैशिष्ट्यं प्रतिपादयत ?

**प्रश्न 4 - समुचितपदै: रिक्तस्थानानि पूरयत -**

(आदिकाव्यं, आदिकवि:, गिरय:, विमर्श:, छन्दोबद्ध, रामकथा)

क. रामायणम् ........................ तथा वाल्मीकि: ...................... अस्ति ।

ख. यावत् स्थास्यन्ति ......................।

ग. पञ्चसन्धय: मुख-प्रतिमुख-गर्भ ...................... निर्वहणा: ।

घ. वाल्मीकित: ............ कविताया: प्रादुर्भाव: ।

ङ. तावत् .................... लोकेषु प्रचरिष्यति।

**प्रश्न 5 - उचितपदमेलनं कुरुत -**

| | | | |
|---|---|---|---|
| क. | चतुर्विंशतिसाहस्री संहिता | (i) | पञ्चशतम् |
| ख. | रामायणे सर्गाः | (ii) | प्रक्षिप्तं |
| ग. | उत्तरकाण्डं | (iii) | रामायणम् |
| घ. | बालकाण्डायोध्याकाण्डयोः | (iv) | मुखसन्धिः |

**प्रश्न 6 - सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत -**

| | शब्दः | सन्धिविच्छेदः | सन्धेःनाम् |
|---|---|---|---|
| क. | समुज्ज्वलं | .................... | ..................... |
| ख. | पाठोऽयं | .................... | ..................... |
| ग. | एकैकम् | .................... | ..................... |
| घ. | इत्यादिः | .................... | ..................... |
| ङ. | तदन्तरम् | .................... | ..................... |

**प्रश्न 7 - अधोलिखित शब्दानां मूलशब्दं विभक्तिं वचनं लिङ्गं च लिखत -**

क. काव्येषु

ख. सरसि

ग. करुणया

घ. एतेषां

ङ. अक्षराणि

च. अहल्यायाः

छ. स्त्रीणाम्

**प्रश्न 8 - क्रियापदानां धातुं वचनं पुरुषं लकारं च लिखत -**

क. आसीत्

ख. अगच्छत्

ग. मन्यते

घ. प्राप्नोति

ङ. हन्ति

च. अरचयत्

छ. ददाति

**प्रश्न 9 - अधोलिखितानां शब्दानां धातुं प्रत्ययं च पृथक् कुरुत -**

| शब्दः | धातुः | प्रत्ययः |
|---|---|---|
| कृतवान् | .................... | .................... |
| उक्तम् | .................... | .................... |
| जातः | .................... | .................... |
| रचितः | .................... | .................... |

**प्रश्न 10 - शब्दैः वाक्य निर्माणं कुरुत -**

क. परिचयः

ख. मगधनरेशः

ग. रामायणे

घ. पतति

ङ. भारतस्य

**योग्यताविस्तारः -**

- रामायणसदृशस्य - अन्य उपजीव्यस्य वर्णनं कुरुत।
- श्रीरामस्य आदर्शपुरुषत्वं प्रतिपादयत।

## अभ्यासकार्यम्

## ऐतिहासिककाव्यं - महाभारतम्

**प्रश्नवैविध्यम् -**

**प्रश्न 1 - एकपदेन उत्तरं लिखत -**

क. महाभारतस्य लेखकः कः ?

ख. महाभारतं कीदृशं काव्यम् वर्तते ?

ग. महाभारते कति पर्वाणि सन्ति ?

घ. महाभारते कति श्लोकाः सन्ति ?

ङ. श्रीमद्भगवत् गीतायाः उल्लेखः महाभारतस्य कस्मिन् पर्वणि वर्तते ?

**प्रश्न 2 - एकवाक्येन उत्तरं लिखत -**

क. महाभारतस्य विकासक्रमे अन्यानि नामानि कानि ?

ख. कौरवपाण्डवानाम् उत्पतिः कस्मिन् पवर्णि वर्तते ?

ग. पञ्चमो -वेदः इति नाम्ना कः ज्ञायते ?

घ. महाभारते प्रधानरसः कः ?

ङ. महाभारतस्य भाषाशैली कीदृशी ?

**प्रश्न 3 - त्रिचतुर्भिर्वाक्यैः उत्तरं लिखत -**

क. महाभारतस्य विकासक्रमं निरूपयत ?

ख. महाभारतस्य अष्टादशपर्वणां नामानि लिखत ?

ग. महाभारतस्य साहित्यिक -महत्त्वम् प्रतिपादयत ?

**प्रश्न 4 - उचितं योजयत -**

| | | |
|---|---|---|
| क. | जयः | (i) सौतिः |
| ख. | भारतः | (ii) व्यासः |
| ग. | महाभारतम् | (iii) वैशम्पायनः |
| घ. | शाकुन्तलोपाख्यानम् | (iv) आदि पर्वणि |

**प्रश्न 5 - रिक्तस्थानपूर्तिं कुरुत -**

क. धर्मे अर्थे ......................... ।
.........................न तत् क्वचित् ।।

ख. नारायणं नमस्कृत्य ....................।
........................... ततो जयमुदीरयेत्।।

ग. सर्वोपनिषदो गावो .........................।
............................दुग्धं गीतामृतं महत् ।।

**प्रश्न 6 - अधोलिखित शब्दैः वाक्य निर्माणं कुरुत-**

क. श्रावणकाले

ख. सर्वत्र

ग. प्रतीयते

घ. सन्ति

ङ. गाथा

**प्रश्न 7 - अधोलिखितानां शब्दानां संधिविच्छेदं कृत्वा संधिनाम लिखत-**

क. कृतिरियं

ख. नामैव

ग. सेयम्

घ. उल्लेखः

**प्रश्न 8 - समासस्य नामोल्लेखपुरस्सरं विग्रहवाक्यं लिखत-**

क. सभापण्डितः

ख. गीतारत्नं

ग. त्रयीवार्ता

घ. आदिकविः

**प्रश्न 9 - धातुलकारवचनानि लिखत-**

क. व्यवहार्यते

ख. प्रतीयते

ग. प्रमाणयति

घ. आसीत्

ङ. अभवन्

**प्रश्न 10 - प्रकृति प्रत्ययौ लिखत-**

क. गतः

ख. कृतवन्तः

ग. भूत्वा

घ. प्रपठ्य

**योग्यता विस्तारः**

1. महाभारतस्य आख्यान् ग्रन्थान् पठित्वा अवबोधयन्तु।

❖ ❖ ★ ❖ ❖

# पञ्चमः अध्यायः
# प्रमुखाः कवयः

## महाकविः राजशेखरः

प्रेयांसः छात्राः। अद्य वयं राजशेखरस्य विषये ज्ञानं प्राप्नुमः। कोऽयं राजशेखरः ? कुत्र कदा च उत्पन्नः ? किमस्थ कर्तृत्वम् ? किं वैशिष्ट्यम् ? इत्येते प्रश्नाः झटिति बुद्धौ आगच्छन्ति किम्। अस्तु तर्हि आगच्छन्तु एकैकशः एतेषां प्रश्नानामुत्तराणि जानीमः।

**जीवन परिचयः** - महाकवि-वंशोत्पन्नः राजशेखरः प्रसिद्धसाहित्यिकः प्रौढनाटककारः गभीरसमीक्षकश्च आसीत्।

अयं दशमशताब्द्यां प्रथमचरणे महाराष्ट्रस्य, क्षत्रियवंशे जनिमलभत्। अस्य पितामहस्य नाम 'अकालजलदः' पितुः नाम 'दर्दुकः' एवं मातुः नाम 'शीलवती' आसीत्। अस्य पूर्वजेषु 'सुरानन्दः' 'तरलः' 'कविराजः' इत्येते प्रथिताः कवयः बभूवुः। शैवः राजशेखरः आत्मानं वाल्मीकि-भर्तृहरि-भवभूतीनाम् अवतारं मनुते। अस्य भार्या चह्वाणकुलोत्पन्ना 'अवन्तिसुन्दरी' इति आसीत्।

राजशेखरः कान्यकुब्जनरेशस्य महेन्द्रपालस्य गुरुः आसीत्। महेन्द्रपालस्य आदेशात् अनेन बालरामायणस्य रचना कृता। कालान्तरे असौ लाटदेशं गत्वा लाटनरेशाश्रितः अभवत्। तत्रैव अनेन विद्धशालभञ्जिकायाः रचना अकारि। किन्तु किञ्चित्कालमतीत्य असौ पुनः कान्यकुब्जदेशं प्रत्यावर्त्य महेन्द्रपालसुतस्य महीपालस्य सभासदो जातः।

**कर्तृत्वम्** -

राजशेखरः कति ग्रन्थान् व्यरचयत् इति सम्प्रति विचारयामः। असौ स्वयमेव स्वग्रंथे 'बालरामायणे' नाटके लिखति यत् -

'विद्धि नः षट् प्रबंधान् इति।

अर्थात् नः (अस्माकम्) षट् प्रबन्धान् (ग्रन्थान्) विद्धि (जानीहि)।

तस्य कथनेन इदं तु स्पष्टं यदसौ षट् ग्रन्थान् व्यरचयत् । तर्हि इयं जिज्ञासा यत् के ते ग्रन्थाः इति ? ते क्रमशः एवं सन्ति - 1. बालरामायणम् , 2. बालभारतम्, 3. कर्पूरमञ्जरी, 4. विद्धशालभञ्जिका, 5. हरविलासः, 6. काव्यमीमांसा च।

उपरिलिखितेषु काव्यमीमांसां हित्वा अन्यानि नाटकानि सन्ति। नाटकेष्वपि हरविलासं त्यक्त्वा अन्यानि सम्प्रति उपलभ्यन्ते। काव्यमीमांसा काव्यशास्त्रस्य उत्कृष्टः ग्रन्थोऽस्ति। भवन्तः जानन्ति किं यत्

काव्यशास्त्रीयः ग्रन्थः सः भवति यस्मिन् काव्यस्य परिभाषा काव्यस्य गुण-दोषाः अलङ्कारा इत्यादि सैद्धान्तिकाः विषयाः विविच्यन्ते। एतान् सैद्धान्तिकपक्षान् एव प्रकटयति 'काव्यमीमांसा' इत्याख्यः समीक्षात्मकः ग्रन्थोऽयम्।

आगच्छन्तु, सम्प्रति राजशेखरस्य ग्रन्थानाश्रित्य किञ्चित् चर्चयामः।

**बालरामायणम्** -

रामकथाश्रितः अयं विशालः नाटकग्रन्थोऽस्ति। अस्मिन् दश अङ्काः विस्तरेण एकैकनाटिकातुल्याः। सम्पूर्णेऽस्मिन् नाटके एकचत्त्वारिंशदुत्तरसप्तशतं पद्यानि सन्ति। एतेषु द्वयधिकद्विशतं (203) पद्यानि शार्दूलविक्रीडितछन्दसि ऊननवतिः (89)पद्यानि स्रग्धरायां वर्तन्ते।

भवन्तः जानन्ति किम्! शार्दूलविक्रीडितं स्रग्धरा च बृहच्छंदः। शार्दूलविक्रीडिते

ऊनविंशतिः (19) वर्णाः तथा स्रग्धरायां एकविंशतिः (21) वर्णाः भवन्ति । किञ्च इदं भवद्भिः ज्ञातव्यं यत् यथा-यथा वर्णानां संख्या एधते तथा-तथा तस्मिन् छन्दसि पद्यरचना क्लिष्टा कठिना च भवति। अतएव एतादृग्भिः छन्दोभिः पद्यरचना उत्कृष्ट-कवित्व-प्रतिभायाः परिचायिका भवति। राजेशखरोऽपि तादृशेषु उत्कृष्टकविषु अन्यतम आसीत्।

बालरामायणं रामकथाश्रितं नाटकं वर्तते। अस्य नाटकस्य वैशिष्ट्यं रावणस्य चरित्रम् अस्ति। अस्मिन् नाटके रावणः प्रेमिरूपेण प्रस्तूयते यः सीतां परिणेतुं वाञ्छति। पञ्चमे अङ्के राम-सीतोः परिणयं श्रुत्वा असौ विरहव्यथितो भवति। तस्य विरहितस्य रावणस्य दशामाध्यमेन षण्णाम् ऋतूनां रमणीयं वर्णनं राजशेखरः करोति। नाटके प्रतिपदं काव्य-कौशलं परिलक्ष्यते।

**बालभारतम्** -

इदं नाटकं महाभारताश्रितं वर्तते। अस्मिन् कति अङ्काः इत्यस्य कुत्रचित् उल्लेखः नास्ति यतोहि अस्य द्वौ एव अङ्कौ उपलभ्येते। एतयोः द्रौपदी-स्वयंवरस्य द्यूतक्रीडायाः द्रौपदीचीरहरणस्य च घटनाः उपस्थापिताः सन्ति।

**विद्धशालभञ्जिका** -

शास्त्रीयदृष्ट्या इयं नाटिका न तु नाटकम्। अत्र का नाम नाटिका ? इति प्रश्नः मनसि उदीयेत्।

वस्तुतः नाटकस्यैव लघुस्वरूपं 'नाटिका' इति कथ्यते, या चतुर्भिः अङ्कैर्युक्ता भवति। अस्यां नाटिकायां एकः नायकः द्वे च नायिके भवतः। नायकः प्रसिद्धः राजा भवति यः राज्ञीम् अतिरिच्य अन्यां नायिकां (मुग्धां राजकुमारीं) प्रीणाति। नाटिकायां अन्तःपुरसम्बन्धिनी प्रणयलीला निरूप्यते।

विद्धशालभञ्जिकायामपि नायकः विद्याधरमल्लः नायिकां मृगाङ्कवतीं शालभञ्जिका-(पुत्तलिका) रूपेण आसाद्य प्रीणाति।

**कर्पूरमञ्जरी** -

इयं राजशेखरस्य अति प्रसिद्धा कृतिरति। इदं नाटकं न अपितु 'सट्टकं' वर्तते। किमिदं सट्टकं नाम? इत्ययं प्रश्नः बुद्धौ आगच्छेत् । तु, सर्वादौ अस्यैव प्रश्नस्य उत्तरं दीयते। यतः समाधानं विना बुद्धिः अग्रे न प्रवृत्तो भवेत्।

सट्टकं नाटकस्य रूपकस्य वा एकं भेदस्वरूपम् अस्ति। नाटिकावत् अस्मिन् चत्वारः अङ्काः भवन्ति।

अस्य वैशिष्ट्यं भाषा एव। अस्य भाषा पूर्णतया प्राकृतं भवति। प्रायः अस्मिन् अद्भुतघटनानां चित्रणं भवति। अत्र अङ्कानां 'जवनिकान्तरम्' इति संज्ञा क्रियते। कथावस्तु प्रणयप्रधानं भवति।

अस्तु भवद्भिः परिचयः प्राप्तः । सम्प्रति कर्पूरमञ्जर्याः चर्चा क्रियते। कर्पूरमञ्जर्याः नायकः नृपः 'चन्द्रपालः' तथा नायिका कुन्तलदेशीया राजकन्या 'कर्पूरमञ्जरी' वर्तते । उभयोः प्रणयप्रसङ्गः अतिनाटकीयतया अस्मिन् प्रदर्शितो वर्तते। राजशेखरस्य काव्यप्रतिभा कथावस्तुनः वैचित्र्यञ्च अस्य सट्टकस्य वैशिष्ट्यमस्ति। ऋतु-वर्णनं नायिकायाः विरहावस्थायाः वर्णनं च अस्य उत्कृष्टताम् अभिव्यञ्जयति।

**राजशेखरस्य वैशिष्ट्यम्** -

अस्तु, एतावता राजशेखरस्य कर्तृत्वम् अस्माभिः भृशं विचारितम्। सम्प्रति इयं जिज्ञासा मनसि उत्पद्येत् यत् राजशेखरस्य किं वैशिष्ट्यम् ? तस्य रचनासु के -के गुणाः येनासौ महाकवित्वेन प्रसिद्धः अभवत् ? असौ कालिदास-हर्ष-भवभूतिभिः प्रभावितोऽस्ति। रचनासु पद्यानि सुललितानि भावपूर्णानि गभीरशब्दोपेतानि सन्ति। अस्य काव्यशैली 'गौडी' इति कथ्यते। अस्य रचनासु विशिष्य कर्पूरमञ्जर्यां भणितीनाम् आभाणकानां वा बाहुल्येन समीचीनतया च प्रयोगः दृश्यते। प्रकृतेः विस्तृतवर्णने असौ पटुरस्ति। शार्दूलविक्रीडितम् अस्य प्रियच्छन्द इति विभाव्यते। असौ स्रग्धरायाः वसन्ततिलकायाश्च प्रयोगे दक्षोऽस्ति। एकं प्रयोगं पश्यतु, 'हस्तकङ्कणं किं दर्पणेन दृश्यते।

अस्य आभाणकस्य भाषान्तरं भवद्भिः प्रायः श्रूयत एव- ''हाथ कङ्गन को आरसी क्या'' ! इत्थं राजेशखरस्य स्थानं संस्कृतवाङ्मये अतिमहत्वपूर्णं विद्यते।

## महाकविः भारविः

प्रियच्छात्राः ! संस्कृतकाव्येषु 'बृहत्रयी' इति संज्ञा अतिप्रसिद्धा अस्ति। भवद्भिः नूनमेव श्रुता अपि स्यात्। 'बृहत्रयी' इति त्रयाणां महाकाव्यानां समूहस्य संज्ञाविशेषः। तु कानि तानि महाकाव्यानि इति प्रश्नः मनसि उदीयेत्। तानि क्रमशः - 'किरातार्जुनीयम्' 'शिशुपालवधम्' 'नैषधीयचरितम्' च सन्ति। एतेषां कर्तृणां विषये भवन्तः जानन्ति किम् ?

किरातार्जुनीयस्य कर्त्ता भारविः, शिशुपालवधस्य कर्त्ता माघः तथा नैषधीयचरितस्य कर्त्ता श्रीहर्षः विद्यते। किमर्थं 'किरातार्जुनीयम्' इति महाकाव्यं बृहत्रय्यां परिगणितम् इति अस्य प्रश्नस्य उत्तरं तु अनन्तरं दीयते किन्तु सम्प्रति किरातार्जुनीयस्य कर्तुर्विषये किञ्चित् चर्चयामः।

आगच्छन्तु, सर्वप्रथम् अस्य महाकवेः जीवनपरिचयं जानीमः।

**जीवनपरिचयः** - कस्यचिदपि पुरातनस्य साहित्यिकस्य जीवनपरिचयः तस्य साहित्येन अथवा अन्यप्रमाणैः यथा अन्यसाहित्यकानां लेखनेन शिलालेखैः इत्यादिभिः ज्ञातुं शक्यते। यदि असौ आत्मनः परिचयं स्वग्रन्थेषु ददाति तर्हि तानि अन्तरङ्गप्रमाणानि कथ्यन्ते। किञ्च लेखकस्य विषये यानि अन्यानि प्रमाणानि उपलभ्यन्ते तानि बहिरङ्गप्रमाणानि एव उपलभयन्ते। यतोहि तस्य या एका कृतिः 'किरातार्जुनीयम्' उपलभ्यते तस्यां सः स्वपरिचयं न प्रस्तौति। तर्हि भारवेः विषये कानि बहिरङ्गप्रमाणानि इति मनसि प्रश्नः आयाति। वस्तुतः दण्डिनः 'अवन्तिसुन्दरीकथा' मैसूरस्थस्य पुरातत्वविभागस्य प्रतिवेदने चित्रितं पुराकालीनं दानपत्रम् कर्णाटकस्य मेगुतीग्रामे प्राप्तः ऐहोलशिलालेखः इत्येतानि त्रीणि प्रमुखप्रमाणानि सन्ति। विविध प्रमाणेभ्यः ज्ञायते यत् भारविः दक्षिणभारतीयः महाशैवः अर्थात् शिवभक्तः आसीत्। अस्य पितुः नाम

'नारायणस्वामी' आसीत्।

अस्य अनुजः 'दामोदरः' आसीत् यः भारवेः मित्रस्य चालुक्यवंशस्य राज्ञः विष्णुवर्धनस्य कृपाम् भारवेः अनुंशसया अलभत्। भारवेः पुत्रस्य नाम 'मनोरथः' तथा पौत्रस्य नाम महाकविः 'दण्डी' आसीत्। भारविः स्वमित्रस्य नृपविष्णुवर्धनस्य सभासद आसीत्। कालान्तरे असौ काञ्चीपुर्याः पल्लववंशीयस्य नृपस्य सिंहविष्णोः तदनु तत्पुत्रस्य महेन्द्रविक्रमस्य च सभायाः पण्डित आसीत्। भारवेः उपनाम 'आतपत्रभारविः' आसीत्।

एतावता अस्माभिः भारवेः जीवनपरिचयः प्राप्तः आगच्छन्तु सम्प्रति तस्य कर्तृत्वं जानीमः। भारवेः कालः षष्ठशताब्द्याः पूर्वार्धं 615 खीष्टाब्दासन्नः स्वीक्रियते।

**कर्तृत्वम्** -

भारवेः एका एव कृतिः 'किरातार्जुनीयम्' इत्युपलभ्यते। इदं महाकाव्यम् अस्ति। अस्मिन् अष्टादश सर्गाः सन्ति। अस्य कथावस्तु महाभारतस्य वनपर्व आश्रित्यअस्ति। अर्जुनेन कथं पाशुपतास्त्रं महेश्वरात् प्राप्तम् इतीयं कथा महाभारतस्य वनपर्वणि वर्णिता अस्ति। एनामेव कथामाश्रित्य भारविना स्वकीयं महाकाव्यं रचितम्। महाकाव्येऽस्मिन् वनवासकाले हिमालयस्थेन अर्जुनेन कौरवान् जेतुं विहिता तपश्चर्या, किरातवेशिना प्रकटितेन शिवेन सह अर्जुनस्य युद्धम्, तोषितेन प्रीतेन शिवेन अर्जुनाय वरप्राप्तिः इत्येते प्रसङ्गाः अतिविशदतया वर्णिताः सन्तिः। अतएव 'किरातः (किरातवेशधारी शिवः) च अर्जुनश्च इति किरातार्जुनीयौ तौ अधिकृत्य कृतं काव्यं किरातार्जुनीयम्' इति द्वन्द्वसमासेन सिद्धा अस्य महाकाव्यस्य इयं संज्ञा अन्वर्थनामा वर्तते।

अस्य महाकाव्यस्य कानि वैशिष्ट्यानि इतीयमपि जिज्ञासा भवतां बुद्धौ सबलायते कदाचित्। अस्तु तत् तावत् चर्चयामः। अस्य महाकाव्यस्य आरम्भः श्रियः इति मङ्गलसूचकशब्देन भवति। अथ च प्रत्येकं सर्गे अन्तिमे पद्ये 'लक्ष्मी' इति शब्दस्य पौनःपुण्येन प्रयोगं विदधति भारविः । इत्थम् आदौ मध्ये अन्ते च मङ्गलसूचकानां शब्दानां प्रयोगात् सम्पूर्णं महाकाव्यं मङ्गलायतनम् इव जातमस्ति। अस्मिन् महाकाव्ये प्रकृति-वर्णनं क्रीडा-वर्णनं युद्धवर्णनञ्च विस्तरेण अतिरमणीयतया च कृतं विद्यते। शृंङ्गार -चेष्टानां वर्णने मुक्तककाव्यवत् वैचित्र्यं पदे-पदे विशिष्य चतुर्थसर्गात् एकादशतमसर्गं यावत् द्रष्टुं शक्यते। अस्य महाकाव्यस्य प्रधानरसः वीररसः अङ्गरसश्च शृंङ्गारः अस्ति। नायकः अर्जुनोऽस्ति। अस्य आदित्रिषु सर्गेषु राजनयस्य सूक्ष्मं चिन्तनम् उपस्थापितं भारविना। पञ्चमे पञ्चदशेचे सर्गे यमकालङ्कारस्य प्रयोगं भारविः करोति। यमकालङ्कारं जानन्ति भवन्तः।

यमकालङ्कारः शब्दालङ्कारस्यैव एकः प्रधानः भेदोऽस्ति। यदा एकस्यैव शब्दस्य भिन्ने-भिन्ने अर्थे एकाधिकवारं प्रयोगः भवति यदा अयं प्रयोगः 'यमकालङ्कारः' इति कथ्यते। अत्र भारवेः एकं प्रयोगं पश्यन्तु-

'धृत-सदान-सदानन दन्तिनम्' इति (किरात. 5 सर्ग 9 श्लोकः) अत्र 'सदान' इति पदस्य द्विवारं प्रयोगः। तत्र प्रथमं हस्ति-वाचकं तथा द्वितीयं सदाननं (अत्र अन्त्यनकारेण अर्थपरिवर्तनम्) सुंदर मुखवाचकम् अस्ति।

चित्रकाव्यमाध्यमेनापि भारविः स्वप्रतिभां प्रदर्शयति। चित्रकाव्यं किम् इति मनसि जिज्ञासायाम् उच्यते यस्मिन् काव्ये शब्दविन्यास एव वैचित्र्यं जनयेत् तत् 'चित्रकाव्यम्' कथ्यते। क्वचित् एकाक्षरपद्यानि क्वचित् द्वयक्षरपद्यानि कुत्रचित् आद्यन्तगेन यमकेन युक्तानि इत्मेवं पञ्चमे सर्गे चित्रकाव्यस्य निदर्शनं

भवति। एकमुदाहरणं पश्यन्तु- 'न नोननुन्नो नुन्नोनो नाना नानानना ननु' इति। (किरात. 5/14) अत्र नकारस्यैव प्रयोगः ।

अर्थः एवमस्ति - नानाननाः (हे अनेकमुखयुक्ताः शिवगणाः) ऊननुन्नः (निकृष्टव्यक्तिभिराहतः पुरुषः) ना न (पुरुषः नास्ति) । यद्यपि भारवेः कवित्वप्रतिभायाः ईषत् परिचयः पूर्वं भवद्भिः ज्ञातः तथापि अस्य प्रमुखतया वैशिष्ट्यमत्र उपस्थाप्यते।

**भारवेः वैशिष्ट्यम्** -

भारवेः प्रमुखं वैशिष्ट्यम् अर्थगौरवम् अस्ति। प्रसिद्धमपि 'भारवेः अर्थगौरवम्' इति ।

किन्नाम 'अर्थगौरवम्' इति प्रश्ने सति उच्यते, अर्थस्य गाम्भीर्यम् अथवा अर्थस्य बहुलता। अर्थगाम्भीर्ये सति अर्थस्तु सामान्य एव किंतु तेन अर्थेन यः भावः विचारो वा उपस्थाप्यते सः अतीवगूढः चिन्तनपरकः भवति। तान् अर्थान् अभिव्यञ्जयन्ति सूक्तयः यासां प्रतिपदं प्रयोगः किरातार्जुनीये प्रत्यक्षीक्रियते। द्वित्राः सूक्तय अत्र प्रस्तूयन्ते। यथा-

'सहसा विदधीत न क्रियाम् (किरात. 2/30) अर्थात् अविचार्य किमपि कार्यं न करणीयम्।

'हितं मनोहारि च दुर्लभं वचः (किरात 1/4) अर्थात् वाणी हितकरी अपि भवेत् मनोनुकूला च इति प्रायः न अनुभूयते।

'अहो दुरन्ता बलवद् विरोधिता (1/23) अर्थात् धन-शक्त्यादिभिः सम्पन्नैः मनुष्यैः विरोधः अतीवकष्टकरो भवति)

'आत्मवर्गं हितमिच्छति सर्वः (9/64) अर्थात् सर्वेऽपि स्ववर्गस्य (स्वबंधुजनस्य) एव हितं वाञ्छन्ति ( न तु अन्येषाम्)।

'तेजोविहीनं विजहाति दर्पः ( 17/16) अर्थात यः निस्तेजः भवति सः स्वाभिमानी न भवितुमर्हति। एवं प्रकारेण नैकाः सूक्तयः प्रतिपदम् उपलभ्यन्ते किरातार्जुनीये। एताः सूक्तयः

नीति -राजनीतिसम्बद्धाः न केवलं भारवेः पाटवम् अभिव्यञ्जयन्ति अपितु अस्मान् अपि सफलजीवनाय निर्दिशन्ति। यतोहि एतासां सूक्तीनाम् अर्थस्तु सरलः किन्तु भावः चिन्तनं वा अतिगभीरमस्ति।

इत्थं भारवेः स्वकाव्यरचनया संस्कृतवाङ्मये नवीना परम्परा प्रचलिता। सा अस्ति पाण्डित्य-परम्परा। अस्यां परम्परायां कविः शब्दचातुरीम् अलङ्कारकौशलं प्रदर्श्य स्वपाण्डित्यं प्रकटयति। सेयं परम्परा भारवेरनन्तरं माघादिभिरपि न्यूनाधिक्येन अनुपालिता। इत्थं पाण्डित्यपूर्णस्य शब्दचमत्कारयुक्तस्य काव्यस्य प्रणयनात् भारविः संस्कृतवाङ्मये अन्यतमं स्थानं लभते।

## महाकविः माघः

महाकविर्माघः संस्कृतकविमालायां मुक्तामणिरिव भासते। माघस्य प्रतिभा विलक्षणा।

कमनीयकल्पनायां, अभिनवशब्दसंरचनायां, विविधचित्रविचित्रालंकारयोजनायां, ललितपदसंघटनायां पाण्डित्यप्रदर्शनकलायां च माघः सर्वान् कवीनतिशेते। अस्य काव्यकलानैपुण्यं भावगाम्भीर्यं भाषासौष्ठवं, विविधविधावैभवं, सकलशास्त्रज्ञानगौरवं च मुहुर्मुहुः प्रशंसन्ति मनीषिणः।

**जीवनवृत्तम्**- महाकवेः पितुः नाम दत्तकः (सर्वाश्रयः) आसीत् यज्ञः वर्मलातस्य सर्वाधिकारी

(महामन्त्री) श्रीसुप्रभदेवः महाकवेः पितामहः आसीत्।

महाकवेः जन्मस्थानविषये किंवदंती प्रचलिता अस्ति यत् राजस्थानसीमायां स्थिते ''श्रीभिन्नमाल'' इति ग्रामे पूर्वजाः निवसन्ति स्म। महाकविमाघस्य समयः पञ्चसप्तत्युत्तरषष्ठ्यां शताब्दयां (675ई.) अनुमीयते।

माघेन स्वयमेव स्ववंशवर्णनमकारि। तेनैव पद्यपञ्चकं शिशुपालवधस्यान्ते व्यलेखि –

1. सर्वाधिकारी सुकृताधिकारः श्रीवर्मलाख्यस्य बभूव रातः।
असक्तदृष्टिर्विरजाः सदैव देवाऽपरः सुप्रभदेवनामा ।।1।।

2. कालेमितं तथ्यमुदर्कपथ्यं तथागतस्येव जनः सचेताः
विनानुरोधात स्वहितेच्छयैव महीपतिर्यस्य जनः सचेताः ।।2।।

3. तष्मामवद्दत्तक इत्युदातः क्षमी मृदुर्धर्मपरस्तनूजः।
यं वीक्ष्य वैयासमजातशत्रोर्वचोगुणग्राहि जनैः प्रतीये ।।3।।

4. सर्वेण सर्वाश्रम इत्यनिन्धमानन्दभाजा जनितं जनेन।
यश्च द्वितीयं स्वममद्वितीयो मुख्यः सतां गौणमवाप नाम ।।4।।

5. श्रीशब्दरम्यकृतसर्गसमाप्तिलक्ष्म,
लक्ष्मीपतेश्चरितकीर्तनमात्रचारू।
तस्मात्मजः सुकविकीर्तिदुराशयाऽदः,
काव्यं व्यधत्त शिशुपालवधाभिधानम् ।।5।।

**कर्तृत्वम्** – माघस्य काव्यप्रतिभायाः पाण्डित्यस्य च निदर्शनमेकमेव ''शिशुपालवधम्'' इति काव्येन माघस्य कीर्तिकौमुदी वर्तते। शिशुपालवधे द्वाविंशतिः सर्गाः सन्ति महाकाव्यलक्षणैः परिपूर्ण विलक्षणमेव ग्रन्थरत्नम् यच्च बृहत्त्रययामन्यतमम्। शिशुपालवधे भगवता श्रीकृष्णेन कृतस्य शिशुपालवधस्य पाण्डित्यसंवलितया काव्यकलाकलितया भव्यभावभरितया च कवितया वर्णितः।

**शैली** – माघस्य वर्णनात्मिका शैली वर्तते।

माघकाव्ये या सुन्दरालङ्कारयोजना साऽन्यत्र दुर्लभा।

अनुप्रासे अपि अस्य असामान्यं चमत्कारमुपलभामहे।

अभिधाम तदा तदप्रियं शिशुपालोऽनुसमं परं गतः।

भवतोऽभिमनाः समीहते सरूषः कर्तुमुपेत्य मानिनाम्।।

इत्यादिषु पद्येषु श्लेषालङ्काकारस्य सुन्दरः प्रयोगः दृश्यते।

काव्यसौष्ठवम् – महाकविर्माघस्य काव्यसौष्ठवमतिविशिष्टम्। विविधशास्त्रपारङ्गतो माघः भाषायामपि कृताधिकारः। असौ यथेच्छं भाषां नर्तयति। उदाहरणानि कानिचित् –

क. नवानधोऽधो वृहतः पमोधरान् समूढकर्पूरपरागपाण्डुरम्।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृतिना स्फुटोपमं भूतिसितेन शम्भुना।। (शिशुपाल-1-4)

ख. श्रितोदयाद्रेरभिसामुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम्।। (शिशुपाल-1-16)

ग. प्रभावनीके तनवै जयन्ती :-

प्रभावनी केतनवैजयन्तीः ।। (माघः 06-69)

घ. अभिसंसार न वल्लभमङ्गना-

न चकमे च कमेकरसं रहः।। (माघ. 6-26)

एतेषु पद्येषु प्रयुक्ता कोमलकान्तपदावलिरावर्जयति चेतांसि सचेतसाम्। माघस्य नवशब्दयोजनापि विलक्षाणा।

अनेन शिशुपालवधस्य नवसर्गेषु सकलोऽपि शब्दकोशः प्रस्तुतः। तदनन्तरं नावशिष्यते कश्चिदपि नवशब्दः।

अत एवोक्तम्

''नव सर्गगते माघे नवशब्दो न विद्यते।

नवशब्दवदभिनवभावाभिव्यक्तिरपि माघस्य विशेषता विद्यते। वस्तुतो नवीनता एव माघमते रमणीयतायाः परिभाषा अस्ति यथा उक्तं माघेन स्वयमेव -

क्षणे-क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।। (माघ. 4-17)

अत्र अथर्ववेदस्य कालसूक्ते वर्णितः काले सर्वं प्रतिष्ठितम् इति सिद्धान्तः साकारतां यति। एवमेव सूर्योदयवर्णने भाग्यस्य विचित्रां गतिं चित्रयता माघेन निगदितम् -

कुमुदवनमपश्रि श्रीमदम्भोजषण्डम्-

त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।

उदयमहिमरश्मिर्याति शीतांशुरस्तम्

हत विथिलसितानां हा विचित्रो दिपाकः (माघ. 11-64)

अत्र तु सृष्टेः सत्यमेवोद्घाटितम् कविना। एतादृशानि पद्यानि वस्तुतो माघस्य तीव्रतरामनुभूतिं गम्भीरचिन्तनं च प्रमाणयत्ति।

**अलङ्कारयोजना** - माघस्य अलंकारचातुरी चमत्कृतिमादधाति। माघेन उपमोत्प्रेक्षा-यमक-श्लेष-रूपकातिरिक्तं चित्रालंकाराणामपि विचित्रयोजना विहिता। शिशुपालवधे क्वचिद् एकाक्षरश्लोक रचना, क्वचिद् द्वयक्षरपद्ययोजना विहिता।

इतरत्र च मुरजबन्धादीनां गुम्फः माघस्य चमत्कारमयं गहनं, गम्भीरं, अगाधमसीमितं च पाण्डित्यं प्रदर्शयति।

**चित्रालंकारस्य कतिचिद् उदाहरणानि अधोलिखितानि -**

**(क) सर्वतोभद्र** :-

स का र ना ना र का स

का य सा द द सा य का।

र सा ह वा वा ह सा र

ना द वा द द वा द ना (माघ. 19-27)

**( ख ) द्व्यक्षरश्लोकः**:-

राजराजी रुरोजाजेरजिरेऽजोऽजरोऽरजाः।

रेजारिजूरजोर्जार्जी रराजर्जुरजर्जरः।। (माघ. 19-102)

एतादृशानि चित्रालंकारमयानि विचित्राणि पद्यानि माघस्य शब्दवैभवं पदबन्धसामर्थ्यं विलक्षणवैदुष्यं च विद्योतयन्ति। किन्तु एतेषु स्थलेषु कलापक्षः प्रबलतां भावपक्षश्च दुर्बलतां याति।

**माघे सन्ति त्रयो गुणा** :- संस्कृतसाहित्ये पाण्डित्यशैल्याः चरमोत्कर्षो दृश्यते श्रीमाघे। कालिदासस्योपमा भागीरथी, भारवेरर्थगुरुता यमुना, दण्डिनः हर्षस्य वा पदललिता सरस्वती, तीर्थराज सदृशे कविराजे श्रीमाघे विराजते।

**उपमा** - माघस्य एषा शास्त्रीयोपमा राजते साहित्यक्षेत्रे सन्निबन्धना।

शब्दविद्येव यो भाति राजनीतरपस्पशा।।

महाकाव्यस्यारम्भे एव नारदागमनप्रसंगे विद्यमानोपमाः मनांसि मोहयन्ति एव।

**अर्थगौरवम्** - अर्थगौरवक्षेत्रे तु समस्तशास्त्रेषु माघप्रतिभायाः वैशिष्ट्यमद्वितीयमेव। पद्यमिदं घटे सागर-संस्थितिः इत्याभाणकं सार्थकं करोति -

षड्गुणाः शक्तमस्तिस्रः।

सदाभिनैकधना हि मानिनः इत्यादिः।

पदलालित्यम् - पदलालित्ये पद्यमिदं सुप्रसिद्धमेव -

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।

मृदुलतान्तलतान्तमलोयकमत् स सुरभिं सुरभिं सुमनोहरैः।।

इत्थं पर्यालोचनेन निश्चीयते यत् यथार्था एव एषा सूक्तिः ''माघे सन्ति त्रयो गुणाः'' इति।

## महाकविः अश्वघोषः

अश्वघोषः संस्कृतकविषु एकः अन्यतमः महाकविः अस्ति। स महाकाव्य-खण्डकाव्य-नाटकादीन् रचितवान्। सः बौद्धभिक्षुः आसीत्। जनश्रुत्यनुसारेण सः कनिष्कनृपतेः समसामयिकः आसीत्। सः न केवलं चीनेतिब्बते च महायानसम्प्रदायस्य प्रवर्तकः, अपितु श्रेष्ठाचार्यः, रससिद्धः कविः आसीत्। अश्वघोषस्य जीवनचरित्रस्यानुसारम् अयं मध्यभारतस्य निवासी आसीत्। एषः पूज्यपार्श्वस्य शिष्यः आसीत्। सः एव अश्वघोषं स्वस्योत्कृष्टपौरुषेण प्रत्युपन्नमत्या बौद्धधर्मे दीक्षितं कृतवान्। इतोऽपि जनश्रुत्यनुसारेण एतस्य मधुरभाषणं श्रुत्वा चरन्तः अश्वाः अपि स्वभोजनं तृणं त्यक्त्वा मुग्धाः भवन्ति स्म।

**अश्वघोषस्य नाट्यकला** -

प्रो. लूडर्समहोदयस्य प्रयत्नेन वयं ज्ञातवन्तः यत् अश्वघोषेण केचन नाटकानि रचितानि। एशियामध्ये ताडपत्रेषु हस्तलिखितपुस्तकानां त्रयः अंशाः बौद्धनाटकरूपेण उपलब्धाः। तेषु शारिपुत्र प्रकरणम् अपि अस्ति। इदं नाटकं निसन्देहः महाकवेः अश्वघोषस्य कृतिः अस्ति। अत्र प्रमाणानि एवं सन्ति-

प्रथमं प्रमाणां यत् अस्मिन् अश्वघोषस्य पुत्रस्य उल्लेखो वर्तते। अत्र एकः श्लोकः यथावत्

बुद्धचरितात् उदधृतोऽस्ति। एवञ्च, स्वस्य सूत्रालङ्कार ग्रन्थे तेन। अस्य ग्रन्थस्य नामोल्लेख कृतः।

नाटकेऽस्मिन् इयं वर्णितम् अस्ति यत् कथं बुद्धेन तरुणमौद्गल्यायनः शारिपुत्रः स्वधर्मावलम्बी कृतः। कथा बुद्धचरिते वर्णितायाः कथायाः काचित् भिन्ना अस्ति। यतोहि यदा शिष्याः बुद्धसमीपम् आगताः तदा एव तेन साक्षात् शिष्येभ्यः स्वभविष्यवाणी कृता। मृच्छकटिकं मालतीमाधवश्च सदृशमेव इदं प्रकरणम् अस्ति। एतेषु नव अंकाः सन्ति। अस्मिन् नाटके नाट्यशास्त्रस्य नियमानां यथाशक्यं पूर्णरूपेण पालनं कृतम् अस्ति। नायकः शारिपुत्रः धीरोदात्तः अस्ति। बुद्ध एवं तस्य शिष्याः संस्कृतं वदन्ति। विदूषकः अन्यानि पात्राणि च प्राकृतभाषां वदन्ति।

नाटकेऽस्मिन् नायकेन सह विदूषकस्य कल्पनया इदम् अनुमीयते यत् तस्य समयात् पूर्वमेव संस्कृतनाटकस्य प्रादुर्भावः अभवत। अस्मात् उत्तरवर्तिसाहित्ये प्राकृतं मिलति। भरतवाक्ये ''अतः परम्'' शब्दानां प्रयोगोऽपि बहुकौशलेन कृतः अस्ति। नाटकीयनियमानुसारेण भिन्नं-भिन्नं पात्राणि स्व सामाजिकपदानुसारं पृथक्-पृथक् भाषा वदन्ति। अस्मिन् नाटके विविधाः प्राकृतभाषाः मिलन्ति। 'दुष्टः' इत्यस्य प्राकृतभार्गापभ्यः ''गोबम्'' इत्यस्य अर्द्धमार्गधभ्यः एवञ्च विदूषकस्य उक्तोभयोः भाषयोः मिश्रणेन 'मिश्रितम्' अस्ति।

## महाकविः श्रीहर्षः

श्रीहर्षः संस्कृतजगति भुवनभास्करमणिरिव शोभते। अस्य कवित्वं पाण्डित्यं च अतीव विलक्षणम्।

श्रीहर्षः खलु हर्षः रसिकानाम्, उत्कर्षः गुणानाम्, संघर्षः पादानाम, अपकर्षः दोषाणाम्, निष्कर्षः च सकलशास्त्राणां वर्तते यस्य, नानाशास्त्रपाण्डित्यं च दर्श दर्श मुग्धा भवन्ति मनीषिणः।

**जीवनवृत्तम्** - नैषधीयचरितस्य प्रतिसर्गे श्रीहर्षकविना स्वजीवनवृत्तं स्वलिखितपद्यमाध्यमेन प्रस्फुटीकृतम् -

श्रीहर्ष कविराजराजिमुकुटालंकारहीरःसुतम्
श्रीहीरःसुषुवे जितेन्द्रियचयं मामल्लदेवीचयम्।

तदनुसारं-श्रीहरिः हर्षस्य पिता मामल्लदेवी च अस्य माता आसीत्।

नैषधीयचरितस्य द्वाविंशतितमे सर्गे कविः पुनः सूचयति यत् सः कन्नौजाधिपतेर्महाराजजयचन्द्रस्य सभारत्नम् आसीत् तत्र च अनेन महती प्रतिष्ठा लब्धा -

''ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्'' एतस्य पद्यस्य अग्रिमपङ्क्तौ श्रीहर्षस्य समाधिनिष्ठतापि दृश्यते -

यः साक्षात्कुरुते समाधिषु परं ब्रह्मप्रमोदार्णवम्।। नैषध. 22-153

नैषधीयचरितस्य अन्तः साक्ष्येण इदं प्रतिपादितं भवति यत् श्रीहर्षः द्वादशशताब्धाः उत्तरार्धे जनिम् अलभत्।

**कर्तृत्वम्** - श्रीहर्षेण स्वकृतिभिः संस्कृतसाहित्यश्रीः संवर्धिता। नैषधीयचरितस्य कतिपयसर्गेषु कविना स्व रचनानां नामोल्लेखम् अकरोत्। यथा- चतुर्थसर्गान्ते-स्थैर्यविचारणप्रकरणम्, पंचमसर्गान्ते-श्रीविजयप्रशस्तिः, षष्ठसर्गान्ते-खण्डनखण्डखाद्यम्, सप्तमसर्गस्यान्ते गौडोर्वीशकुलप्रशस्तिः नवमसर्गान्ते अर्णववर्णनम् सप्तदशसर्गान्ते छिन्दप्रशस्तिः, अष्टादशसर्गान्ते शिवशक्तिसिद्धिः, द्वाविंशतिसर्गान्ते

नवसाहसाङ्कचरितचम्पू: इति। नैषधीयचरितमतिरिच्य अष्ट रचना: श्रीहर्षस्य कीर्तिं वर्धयन्ति। परं तेसु ''नैषधीयचरितम्'' ''खण्डनखण्डखाद्यम्'' च इत्येतद् द्वयम् एव अधुना समुपलभ्यते। अन्यास्तु रचना: अनुपलब्धा एव। तत्र ''खण्डनखण्डखाद्यम्'' इति अद्वैतमतप्रवर्तक: श्रेष्ठग्रन्थ:। ''नैषधीयचरितम्'' च श्रीहर्षस्य कीर्तिपताकाप्रतानभूतं रमणीयं काव्यम्।

**नैषधं विद्वदौषधम्** – ''नैषधीयचरितम्'' खलु सुधीनां रसोत्पादकमेव। यतोहि तत्र विविधशास्त्राणां ज्ञानं श्रेष्ठकाव्यव्याजेन वरं सम्पादितम्। तद्यथा दशमे सर्गे भारतीवर्णने एकस्मिन्नेव श्लोके बौद्धदर्शनस्य।

सिद्धान्तत्रयम् उल्लिखितम् –

या सोमसिद्धान्तमयाननेत्रशून्यात्मतावादमयोदरेव।
विज्ञानसामस्त्यमयान्तरेव साकारतासिद्धिमयाखिलेव।।

अत्र बौद्धानां शून्यवाद: विज्ञानवाद: साकारविज्ञानवादश्च इति सिद्धान्तत्रयी लालित्यपदावल्या साकारतां प्राप्ता। स्वकीयनवभावोत्पादिकया बुद्धया नैषधे यत्र-तत्र विविधदर्शनानां प्रधानसिद्धान्ता: बद्धा: सन्ति

उदाहरणार्थ – वैशेषिकानामनुसारं परमाणुवादं प्रतिपादितम्

अन्योऽन्यसंगमवशादधुना विभातां
तस्यापि तेऽपि मनसी विकसद्विलासे।
स्रष्टुं पुनर्मनसिजस्य तनुप्रवृत्त
मादाविव द्वयणुककृत्परमाणुयुग्मम्।। नैषध. 3-125

कविना अत्र योगदर्शनानुसारं सम्प्रज्ञातसमाधि: वर्णिता –

इत्युदीर्य स हरिं प्रति संप्रज्ञातवासितम: समपादि।
भावनाबलविलोकितविष्णौ प्रीतिभक्ति सदृशानि चरिष्णु:।। नैषध. 21-118

उपर्युक्तसन्दर्भेषु श्रीहर्षस्य विलक्षणप्रतिभाया: साक्षात् दर्शनं भवति। तस्य ''नैषधीयचरितम्'' वस्तुत: वैदुष्णेणपरिप्लतं वर्तते। अत: ''नैषधंविद्वद्वौधम्'' इति साहित्यसमालोचकानां कथनम् उपयुक्तम्। उदिते नैषधेकाव्ये क्व माघ: क्व भारवि: – इयं कथनमपि

श्रीहर्षस्य काव्यविलक्षणतां वैदुष्यं च प्रमाणीकरोति संस्कृतकवीनां पाण्डित्यप्रदर्शनपरम्परा। आदिकवे: वाल्मीकात् या संस्कृतकाव्यनिर्झरिणी नि:सृता सा कालिदासस्य वाङ्मये प्रवाहमयी आह्लादमयी सञ्जाता तथा भारविकाव्ये अर्थगौरवात् गहना कठिना विद्वज्जन-रञ्जनी अभवत्। तस्मिन् काले कवितामाध्यमेन स्व प्रतिभाप्रख्यापनमेव उद्देश्यं जातम्। माघे अस्या: प्रवृत्या: उत्कर्ष: दृश्यते। प्रतिभाप्रकाशनस्य इयमेन प्रवृत्ति: श्रीहर्षे तत्काव्ये नैषधे च पराकाष्ठां गता।

अतएव समालोचकानामिदं कथनं वास्तविकतां दधाति –

तावद् भा भारवेर्भाति यावन्माघस्य नोदय:।
उदिते नैषधे काव्ये क्व माघ: क्व च भारवि:।।

तथ्यत: भारवे: काव्यप्रतिभा तावता एव तिष्ठति यावता माघस्य। पाण्डित्यं नयनपथं नागच्छति। परं माघकाव्ये दृष्टिगोचरे सति भारवे: प्रतिभा निस्तेजतां गता। यदा च श्रीहर्षस्य अनेकशास्त्रज्ञानपूर्ण

अद्भुतप्रतिभा सम्पन्नं ''नैषधीयचरितम्'' दृष्टिपथं नीयते तदा भारवि- माघयोरुभयोरपि प्रभावः क्षीणतां याति। श्रीहर्षस्य अनेकार्थपदनिबन्धनम् आश्चर्यमुत्पादयति।

यथा - चेतो नलं कामयते मदीयम्। नैषध. 3-67

(क) चलन्नलंकृत्यमहारयं हयः
स वाहवाहोचितवेशपेशलः।
प्रमोदनिः स्पन्दराक्षिपक्ष्मभि
र्व्यलोकि लोकैर्नगरालयैर्नलः।। नैषध. 1-66

(ख) नलिनं मलिनं विवृष्वती पृषतीमस्पृशती तदीक्षणे।
अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम्।। 2-23

अनयोः श्लोकयोः पदानि विलसन्तः रोचन्तः इव दृश्यन्ते। पदेषु लयात्मकता संगीतात्मकता च मनोहारी दृश्यते। अत एव - ''नैषधे पदलालित्यम्''

यत्काठिन्यमवलोक्यते नैषधीयचरिते तत् न स्वाभाविकम्। कविना तत्र प्रयासपूर्वकं कठिनश्लेषादीनां प्रयोगः कृतः। श्रीहर्षस्य गर्वोक्तिरेवात्र स्वतः प्रमाणम्- एवं सर्वथा कविश्रेष्ठः ज्ञानेनज्येष्ठः प्रतिभयावरिष्ठः सुधीनामभीष्टश्च श्रीहर्षः।

## महाकविः कालिदासः

कविकुल शिरोमणिः महाकविः कालिदासः संस्कृतभाषायाः श्रेष्ठतमः कविः अस्ति। संस्कृतसाहित्ये कविकुलगुरोः नाम्ना प्रसिद्धः महाकविः कालिदासः अस्ति। कालिदासः भारतीय-साहित्यकारेषु न, अपितु विश्वसाहित्यकारेषु प्रमुखं स्थानम् आवहति। महाकविकालिदासः प्रतिभायाः प्रकाशः, कलायाः विलासः, व्यञ्जनायाः विकासः, गुणानां संयोजकः, रसानां प्रयोजकः, उपमादि-अलंकाराणाम् आयोजकश्च वर्तते।

**स्थितिकालः** -

महाकविकालिदासेन स्वस्य कालविषये किमपि न लिखितम्। अनेकैः विद्वद्भिः स्व-स्वमतानुसारं तस्य कालस्य निर्णयः कृतः, परं सर्वेषाम् ऐक्यमतं नास्ति। एतस्य समयः द्वितीयशताब्द्याः ई.पू. तथा षड्शताब्द्याः मध्ये मन्यते। कालिदासकृतस्य ''मालविकाग्निमित्रम्'' नाटकस्य यः नायकः तस्य समयः 148 ई.पू. तः 136 ई.पू. पर्यन्तं इतिहासकारैः प्रमाणीकृतः। अतः निर्विवादरूपेण वक्तुं शक्यते यत् कविकालिदासस्य कालः 148ई. पूर्वात् अन्तरम् अस्ति। षष्ठशताब्दयाः अन्ते हर्षवर्धनस्य सभायाः कविना बाणभट्टेन कालिदासस्य कवितायाः प्रशंसा कृता। अतएव कालिदासस्य समयः द्वितीयषष्ठशताब्द्योः मध्ये विद्वान्सः सुनिश्चितं कृतवन्तः। तथापि केचन सुधयः महाकवि-कालिदासस्य प्रादुर्भावं प्रायः पञ्चम्यां शताब्द्यां स्वीकुर्वन्ति।

कालिदासः स्वस्य रचनासु क्वचित् अपि आत्मवृत्तं न कृतवान्। अत एव असौ ''कं देशं कं च कालं स्वजन्मना अकरोत्'' इति न अद्यावधि निर्विवादं सुनिश्चितम्।

कालिदासः प्रायशः स्वकाव्यकृतिषु उज्जयिनीनगर्याः तत्रत्यस्य शिप्रानद्याश्च च वर्णने महाकालस्य चारुतयाः चित्रणे विशिष्टाम् अभिरुचिं प्रदर्शयामास। एतेन अनुमीयते यत् उज्जयिनी एव कालिदासस्य

जन्मभूमिः। कालिदासः विक्रमादित्यवर्णने स्वकाव्यकलायाः अद्भुतं प्रदर्शनम् अकरोत्। अनेन अनुमीयते यत् विक्रमभूपतिः कालिदासस्य आश्रयभूतः इति निश्चितो भवति। कालिदासोऽपि तस्य सभारत्नम् आसीत् इति एवम् उल्लेखः लभ्यते–

धन्वतरिक्षपणकामरसिंहशंकु वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां, रत्नानि वै वररुचिर्नवविक्रमस्य।।

**कृतयः** –

**1. महाकाव्यद्वयम्**

**(क) रघुवंशम्**– महाकविकालिदासेन इदं महाकाव्यम् एकोनविंशतिसर्गात्मकं विरचितम् अस्ति। अस्मिन् महाकाव्ये राजादिलीपतः अग्निमित्रपर्यन्तम् सूर्यवंशस्य राज्ञां वर्णनम् अस्ति।

**(ख) कुमारसम्भवम्**– इदं महाकाव्यं महाकविकालिदासस्य अन्तिमा रचना अस्ति। अस्मिन् महाकाव्ये पार्वतीशिवयोः विवाहस्य वर्णनं कुमारकार्तिकेयस्य जन्मवर्णनम्, तारकासुरस्य वधप्रसङ्ग पौराणिक–कथाः वर्णिताः सन्ति। इदं महाकाव्यम् सप्तदशसर्गात्मकम् अस्ति।

**2. गीतिकाव्यद्वयम् (खण्डकाव्यम्)**

**(क) मेघदूतम्**– महाकविकालिदासस्य विश्वप्रसिद्धं मनोरमम् इदं गीतिकाव्यम्। काव्येऽस्मिन् एकस्य विरहपीडितस्य यक्षस्य मार्मिकमनोभावानाम् अभूतपूर्वकं चरित्रचित्रणं कृतम् अस्ति। अस्य काव्यस्य भारतीय साहित्ये अद्वितीयं स्थानम् अस्ति। अस्य खण्डकाव्यस्य भागद्वयम् अस्ति। (अ) पूर्वमेघः (ब) उत्तरमेघः

**(ख) ऋतुसंहारम्**– महाकविकालिदासस्य इदं गीतिकाव्यं प्रशंसनीयम् अस्ति। अस्मिन् गीतिकाव्ये ग्रीष्म ऋतुतः वसन्त ऋतुपर्यन्तम् षड्ऋतूणां वर्णनम् अस्ति। खण्डकाव्येऽस्मिन् सप्तनवत्युत्तरम् एकशतं (197) श्लोकाः सन्ति।

**3. त्रीणि नाटकानि**

**(क) अभिज्ञानशाकुन्तलम्** महाकविकालिदासस्य इदं नाटकं विश्वप्रसिद्धम् अस्ति। नाटकेऽस्मिन् नायकः महाराजा चक्रवर्ती सम्राट् दुष्यन्तः अस्ति।

नायिका च शकुन्तला, अस्मिन् नाटके शकुन्तलादुष्यन्तयोः प्रणयवियोगयोः एवञ्च पुनर्मिलनस्य कथा विरचिता अस्ति। शृंगाररसयुक्तं, वैदर्भीरीतियुक्तम्, माधुर्यगुणयुक्तम् इदं नाटकं सप्ताङ्कात्मकम् अस्ति।

**'कालिदासस्य सर्वस्वम् अभिज्ञानशाकुन्तलम्'**

वस्तुतः महाकविकालिदासस्य सर्वाः रचना एव रमणीयाः तथापि – ''अभिज्ञानशाकुन्तलम्'' सर्वोत्कृष्टम्। सर्वास्वपि काव्यविधासु नाटकं स्वभावतः हृदयग्राहि साक्षात् दर्शनात् च रम्यम् इति न अत्र लेशमात्रं सन्देहः। परं नाटकेषु अपि कालिदासस्य ''अभिज्ञानशाकुन्तलम्'' सुन्दरम् इति निर्विवादम्। शाकुन्तलनाटकेऽपि चतुर्थोऽङ्कः प्रसिद्धः तत्रापि च पद्यचतुष्टयं श्रेष्ठमस्ति इदम् एव तथ्यं प्रदर्शयन् निगदितं साहित्यकारेण –

काव्येषु नाटकं रम्य नाटकेषु शकुन्तला।
तत्रापि चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्।।

सर्वात्मना सफलं सुरम्यं च नाटकम् ''अभिज्ञानशाकुन्तलम्'' इति। सप्तसु अङ्केषु विभक्तम् अभिज्ञानशाकुन्तलम्। वस्तुत: वस्तुविस्तारदृष्ट्या सर्वे अपि अङ्का: नितान्तम् उपयोगिन: सन्ति। सर्वे अपि प्रमुखा: अंशा: महाकविकालिदासेन स्वनाट्यकलाकौशलेन चारुतया वर्णिता:। तथापि, तेषु चतुर्थोऽङ्क: श्रेष्ठ:। यतो हि तत्र एव नाटकस्य प्रमुखा: अंशा: संकलिता:। ते यथा - दुष्यन्तेन सह शकुन्तलाया: गान्धर्वविवाह:, दुर्वासस: शाप:, शकुन्तलाया: पतिगृहगमनम्, शकुन्तलां प्रति कण्वस्योपदेश:, दुष्यन्तं प्रतिकुलपते: सन्देश:, शकुन्तलाविरहे आश्रम-वासिनां मृगपक्षिलतानां व्याकुलता, तपोवनविरहकातराया: शकुन्तलायाश्च मनोव्यथा।

चतुर्थाङ्कस्य एते चत्वार: प्रसिद्धा: श्लोका: सन्ति-

**प्रथम: श्लोक:** -

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कंठया, कण्ठ: स्तम्भितवाष्पवृत्ति- कलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकस: पीड्यन्ते गृहिण: कथं नु तनया विश्लेषदु:खैर्नवै:।।
(4/6)

**द्वितीय: श्लोक:** -

शुश्रूषस्व गुरुन् कुरु प्रियसखीवृत्तिं सपत्नीजने, भर्तु: विप्रकृतापि रोषणतया मा स्म प्रतीपं गम:।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी, यान्त्येवं गृहिणीपदं युवतयो नामा कुलस्याधय:।।
(4/18)

**तृतीय: श्लोक:** -

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या, नादत्ते प्रियमंडनापि कुसुम स्नेहेन या पल्लवम्।
आद्ये व: कुसुमप्रसूतिसमये यस्या भवत्युत्सव:, सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।
(4/9)

**चतुर्थ: श्लोक:** -

अस्मान् साधु विचिन्त्य संयमधनानुच्चै: कुलं चात्मन:, त्वय्यस्या: कथमप्यबान्धवकृतां स्नेह प्रवृत्तिं ताम्।
सामान्यंप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया, भाग्यामत्तमत: परं न खलु तद्वाच्यं वधूबन्धुभि:।।
(4/17)

एतेषां श्लोकानां विषये मूलग्रन्थ: ध्यातव्य:

**(ख) मालविकाग्निमित्रम्** - नाटकेऽस्मिन् शुंगवंशस्य राज्ञ: अग्निमित्रस्य एवञ्च विदर्भराज कन्याया: मालविकाया: प्रणयकथा विरचिता अस्ति। इदं नाटकं पञ्चांकात्मकं षड्नवतिश्लोकात्मकं (696) च विद्यते।

**(ग) विक्रमोर्वशीयम्**- महाकविकालिदासस्य मनोहारि इदं नाटकम्। नाटकेऽस्मिन् महाराज पुरुरवा नायक: अस्ति, नायिका च उर्वशी। उभयो: प्रणयकथाया: वर्णनम् अस्ति। अस्य पञ्चसु अङ्केषु गद्यात्मकसंवादेन सह पञ्चषष्ट्यधिकम् एकशतं (165) श्लोकानि सन्ति।

कालिदासस्य लोकप्रियताया: कारणं तस्य प्रसादगुणयुक्ता ललिता शैली अस्ति। कालिदासस्य प्रकृतिचित्रणं अतीवरम्यम् अस्ति। चरित्रचित्रणे कालिदास: अतीवपटु: अस्ति। कालिदासस्य उपमाप्रयोग: अपूर्व:। अत: साधु उच्यते **''उपमा कालिदासस्य''**।

# अभ्यासकार्यम्

## महाकवि राजशेखरः

**प्रश्नः 1 – एकपदेन उत्तरं लिखत ।**

क. कविराजशेखरः कस्मिन् वंशे जनिम् अलभत् ?

ख. कविराजशेखरस्य पितुः नाम किम् ?

ग. राजशेखरः कति ग्रन्थान् व्यरचयत् ?

घ. बालरामायणं नाटकं कस्य रचना अस्ति ?

ङ. बालरामायणे कति अङ्काः सन्ति ?

**प्रश्नः 2 अधोलिखितान् प्रश्नान् एकवाक्येन उत्तरत ।**

क. राजशेखरः कस्य राज्ञः सभासदः आसीत् ?

ख. बालरामायणे कति पद्यानि सन्ति ?

ग. शार्दूलविक्रीडितछन्दसि कति वर्णाः भवन्ति ?

घ. बालरामायणनाटकस्य आश्रयः कः?

ङ. राजशेखरेण कति ऋतवः वर्णिताः ?

**प्रश्नः 3 उचितं विकल्पं चित्वा लिखत –**

क. राजशेखरस्य मातुः नाम अस्ति ?

अ. राममती    ब. शीलवती
स. कलावती    द. ज्ञानवती

ख. राजशेखरः आसीत् ?

अ. शैवः    ब. वैष्णवः
स. शाक्तः    द. वामः

ग. कान्यकुब्जनरेशः आसीत् ?

अ. महेन्द्रपालः    ब. देवपालः
स. राजपालः    द. धर्मपालः

घ. राजशेखरस्य पितामहः कः ?

अ. दर्दुकः    ब. अकालजलदः
स. प्रभातः    द. तरलः

ङ. अवन्तिसुन्दरी कस्मिन् वंशे जाता ?

अ. चह्वाणवंशे    ब. परमारवंशे
स. चन्देलवंश    द. प्रतापवंशे

**प्रश्नः 4 – त्रिचतुर्भिः वाक्यैः उत्तरत –**

क. काव्यशास्त्रीयः ग्रन्थः कः भवति ?

ख. पाठानुसारं नाटिकायाः स्वरूपं किम् ?

ग. सट्टकस्य वैशिष्ट्यं लिखत ?

**प्रश्नः 5 – रिक्तस्थानपूर्तिं कुरुत –**

(एकविंशति, षट्, महेन्द्रपालस्य, राजशेखरस्य, नाटिका)

क. महीपालः .................. सुतः आसीत्।

ख. राजशेखरेण ................ ग्रन्थाः रचिताः।

ग. अवन्तिसुन्दरी .................भार्या आसीत्।

घ. स्रग्धराछन्दसि .................. वर्णाः भवन्ति।

ङ. विद्धशालभञ्जिका एका ..............अस्ति।

**प्रश्नः 6 – आम्/न लिखत**

क. नाटिका चतुर्भिः अङ्कैर्युक्ता भवति।

ख. बालभारतनाटके द्रौपदी-स्वयंवरस्य घटना अस्ति।

ग. कर्पूरमञ्जरी नाटकम् अस्ति।

घ. कर्पूरमञ्जर्याः नायकः देवपालः अस्ति।

ङ. राजशेखरस्य वैदर्भी शैली अस्ति।

**प्रश्नः 7. – युग्मं मेलयत –**

| | **क** | | **ख** |
|---|---|---|---|
| क | ऋतवः | अ. | नाटिका |
| ख | विद्धशालभञ्जिका | ब. | प्राकृतभाषा |
| ग | चन्द्रपालः | स. | दशमशताब्दी |
| घ | सट्टकम् | द. | षट् |
| ङ | राजशेखरः | इ. | कर्पूरमञ्जरी |

**प्रश्नः 8 – अधोलिखितेषु मूलशब्दं विभक्तिं वचनं लिङ्गम् च लिखत ।**

| | **मूलशब्दः** | **विभक्तिः** | **वचनम्** | **लिङ्गम्** |
|---|---|---|---|---|
| (i) | प्रेयांसः | .................. | .................. | .................. |
| (ii) | पितुः | .................. | .................. | .................. |
| (iii) | आत्मनाम् | .................. | .................. | .................. |
| (iv) | स्रग्धरायाम् | .................. | .................. | .................. |
| (v) | चतुर्भिः | .................. | .................. | .................. |

**प्रश्नः 9 - क्रियापदानां धातुं पुरुषं वचनं लकारं च लिखत ।**

| | **धातुः** | **पुरुषः** | **वचनम्** | **लकारः** |
|---|---|---|---|---|
| (i) | आसीत् | .................. | .................. | .................. |
| (ii) | बभूवुः | .................. | .................. | .................. |
| (iii) | आगच्छन्तु | .................. | .................. | .................. |
| (iv) | वर्तन्ते | .................. | .................. | .................. |
| (v) | चर्चयामः | .................. | .................. | .................. |
| (vi) | प्रीणाति | .................. | .................. | .................. |
| (vii) | जानीमः | .................. | .................. | .................. |

**प्रश्नः 10 - अधोलिखितेषु शब्देषु प्रकृति-प्रत्ययं प्रथक् कुरुत ।**

| | **शब्दः** | **प्रकृतिः** | **प्रत्ययः** |
|---|---|---|---|
| क | शीलवती | .................. | .................. |
| ख | त्यक्त्वा | .................. | .................. |
| ग | आश्रित्य | .................. | .................. |
| घ | श्रुत्वा | .................. | .................. |
| ङ | प्रत्यावर्त्य | .................. | .................. |

**प्रश्नः 11 - महाकविराजशेखरस्य कृर्तृत्वं लिखत।**

**योग्यताविस्तारः -**

- अन्यानि छन्दांसि पठित्वा लक्षणानि लिखत।
- रूपकस्य भेदान् पठन्तु।

## अभ्यासप्रश्नाः

### महाकविः भारविः

**प्रश्नः 1 - उचितं विकल्पं चित्वा लिखत।**

क. किरातार्जुनीयमहाकाव्यस्य कर्त्ता अस्ति।

अ. भासः     ब. भारविः

स. श्रीहर्षः     द. माघः

ख. 'अर्थगौरवं' वैशिष्ट्यम् अस्ति।

अ. भारवेः     ब. भासस्य

स. माघस्य     द. श्रीहर्षस्य

ग. किरातार्जुनीयस्य नायकः अस्ति।

अ. शिवः | ब. अर्जुनः

स. युधिष्ठिरः | द. दुर्योधनः

घ. शैवः कः आसीत् ?

अ. भारविः | ब. माघः

स. वाल्मीकिः | द. व्यासः

**प्रश्नः 2 - एकपदेन उत्तरत ।**

क. नैषधीयचरितस्य कर्त्ता कः ?

ख. भारवेः पितुः नाम किम् ?

ग. भारविः कस्य राज्ञः सभासद आसीत् ?

घ. किरातार्जुनीयमहाकाव्ये कति सर्गाः सन्ति ?

ङ. अर्जुनस्य युद्धं केन सह भवति ?

च. किरातार्जुनीय-महाकाव्ये प्रमुखः रसः कः ?

**प्रश्नः 3 - एकवाक्येन उत्तरत ।**

क. केषां ग्रन्थानां समूहः 'बृहत्त्रयी कथ्यते ?

ख. महाकविमाघेन विरचितं महाकाव्यं किम् ?

ग. 'मनोरथः' कः आसीत् ?

घ. भारवेः कालः कः ?

ङ. प्रत्येकस्मिन् सर्गान्ते कः शब्दः प्रयुक्तम् ?

च. किरातार्जुनीय-महाकाव्ये प्रमुखः रसः कः ?

**प्रश्नः 4 - त्रिचतुर्भिः वाक्यैः उत्तरत ।**

क. यमकालङ्कारस्य पाठोक्तं लक्षणं ?

ख. अन्तरङ्गप्रमाणम् किं भवति ?

ग. किरातार्जुनीयस्य कथावस्तु कुतः सङ्कलितम् ?

**प्रश्नः 5 - आम्/न लिखत-**

क. किरातवेशधारी शिवः अस्ति ?

ख. ग्रन्थस्य सर्गान्ते 'लक्ष्मी' शब्दस्य प्रयोगः अभवत् ?

ग. भारविः महेन्द्रविक्रमस्य सभापण्डितः आसीत् ?

घ. पञ्चदशसर्गे राजनीतेः सूक्ष्मं चिन्तनं विद्यते ?

ङ. 'दामोदरः' भारवेः पुत्रः आसीत् ?

**प्रश्नः 6 - समुचितैः पदैः रिक्तस्थानं पूरयत-**

(बृहत्त्रयी, श्रीहर्षः बहिरङ्गानि, भारविः, आतपत्रभारविः)

क. भारवेः विषये तु ........ प्रमाणानि एव उपलभ्यन्ते ।

ख. त्रयाणां महाकाव्यानां समूह-संज्ञाविशेषः ................ ।

ग. नैषधीयचरितस्य कर्त्ता ..................अस्ति ।

घ. चित्रऽलङ्कारे सिद्धः कविः ................अस्ति ।

ङ. भारवेः उपनाम .......................... आसीत् ।

**प्रश्नः 7 - अधोलिखितेषु शब्देषु प्रकृति-प्रत्ययं पृथक् कुरुत-**

| | शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (i) | किरातार्जुनीयम् | .................... | .................... |
| (ii) | श्रुता | .................... | .................... |
| (iii) | वर्णिता | .................... | .................... |
| (iv) | जेतुम् | .................... | .................... |
| (v) | अधिकृत्य | .................... | .................... |

**प्रश्नः 8 - क्रियापदानां धातुं पुरुषं वचनं लकारं च लिखत।**

क. जानन्ति

ख. सन्ति

ग. शक्यते

घ. कथ्यन्ते

ङ. पश्यन्तु

**प्रश्नः 9 - अधोलिखितेषु मूलशब्दं विभक्तिं वचनं लिङ्गम् च लिखत।**

क. बृहत्त्रय्याम्

ख. शिलालेखैः

ग. मनसि

घ. कौरवान्

ङ. वनपर्वणि

**प्रश्नः 10 -**

- भारवेः अर्थगौरवत्वं प्रतिपादयतु।
- चित्रालङ्कारस्य उदाहरणानि लिखन्तु।

**योग्यताविस्तारः -**

- भारविकृत्ग्रन्थस्य सूक्तयः चिन्वन्तु।
- प्रथमसर्गस्य सूक्तीः कण्ठस्थी कुर्वन्तु।

# अभ्यासकार्यम्

## महाकविः अश्वघोषः

**प्रश्न 1 - एकपदेन उत्तरं लिखत।**

क. अश्वघोषस्य समय कः ?

ख. अश्वघोषः कस्य शिष्यः आसीत् ?

ग. बौद्धभिक्षुः कः आसीत् ?

घ. बुद्धचरितस्य प्रणेता कः ?

ङ. शारिपुत्रप्रकरणे कति अङ्काः ?

**प्रश्न 2 - एकवाक्येन उत्तरं लिखत।**

क. अश्वघोषस्य कीदृशी शैली ?

ख. अश्वघोषस्य प्रमुखाः कृतयः काः ?

ग. अश्वघोषः कस्य नगरस्य निवासी आसीत् ?

घ. अश्वघोषः कस्मिन् धर्मे दीक्षितः ?

**प्रश्न 3 - युग्ममेलनं कुरुत -**

| | अ | ब |
|---|---|---|
| 1. | बुद्धचरितम् | दार्शनिकग्रन्थः |
| 2. | शारिपुत्रप्रकरणम् | स्तुतिपरकग्रन्थः |
| 3. | सूत्रालंकारः | महाकाव्यम् |
| 4. | महायानश्रद्धोत्पादः | नाटकम् |
| 5. | गण्डीस्तोत्रगाथा | कथासंग्रहः |

**प्रश्न 4 - शुद्धवाक्यानां समक्षं ''आम्'' अशुद्ध वाक्यानां समक्षं ''न'' इति लिखत-**

क. अश्वघोषः बौद्धभिक्षुः आसीत् ?

ख. शारिपुत्रः धीरोदात्तः नायकः आसीत् ?

ग. अश्वघोषः मध्यभारतस्य निवासी न आसीत् ?

घ. अश्वघोषः रससिद्धः कविः आसीत् ?

ङ. सौन्दरनन्दः महाकाव्यं नास्ति ?

**प्रश्न 5 - उचितैः पदैः रिक्तस्थानानि पूरयत-**

(श्रेष्ठाचार्यः, अन्यतमः, कनिष्कनृपतेः, तिस्रः, वैदर्भी)

क. अश्वघोषः संस्कृतकविषु एकः .................... महाकविः अस्ति।

ख. अश्वघोषः ................... रससिद्धः कविः आसीत्।

ग. सः ....................... समसामयिकः आसीत्।

घ. शारिपुत्रे नाटके ...................... प्राकृतभाषाः लभ्यन्ते।

ङ. अश्वघोषस्य ...............शैली अस्ति।

**प्रश्न 6 - अधोलिखितानां पदानां सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत ।**

| | शब्दः | संधिविच्छेदः | सन्धेः नाम |
|---|---|---|---|
| 1. | एवञ्च | .......................... | .......................... |
| 2. | स्वस्योत्कृष्टपौरुषेण | .......................... | .......................... |
| 3. | प्रथमांशः | .......................... | .......................... |
| 4. | स्वधर्मावलम्बी | .......................... | .......................... |
| 5. | एतादृशः | .......................... | .......................... |
| 6. | धीरोदात्तः | .......................... | .......................... |
| 7. | इतोऽपि | .......................... | .......................... |

**प्रश्न 7 - अधोलिखितेषु शब्देषु प्रकृतिप्रत्ययं पृथक् कुरुत -**

| | शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| 1. | रचितवान् | .......................... | .......................... |
| 2. | श्रुत्वा | .......................... | .......................... |
| 3. | कृतः | .......................... | .......................... |
| 4. | त्यक्त्वा | .......................... | .......................... |
| 5. | कृतवान् | .......................... | .......................... |

**प्रश्न 8. निम्नलिखितक्रियापदानां धातुं पुरुषं वचनं लकारं च लिखत-**

1. अस्ति
2. आसीत्
3. मिलन्ति
4. वदन्ति
5. सन्ति

**प्रश्न 9. अधोलिखितानां पदानां वाक्येषु प्रयोगं कुरुत-**

च, अपि, तदा, एव, तत्र।

**प्रश्न 10. अश्वघोषस्य नाट्यकलायाः वैशिष्ट्यं लिखत-**

# अभ्यासकार्यम्

## महाकविः श्रीहर्षः

**प्रश्न 1 – एकपदेन उत्तरं लिखत–**

क. श्रीहर्षस्य पितुः नाम किम् अस्ति ?

ख. ''नैषधीयचरितम्'' महाकाव्ये कति सर्गाः सन्ति ?

ग. श्रीहर्षस्य जन्म कदा अभवत् ?

घ. खण्डनखण्डखाद्यम् रचनायाः रचनाकारः कः ?

**प्रश्न 2 – एकवाक्येन उत्तरं लिखत–**

क. श्रीहर्षः कस्य राज्ञः सभाकविः आसीत्?

ख. श्रीहर्षस्य रचनासु इदानीं के द्वे रचने लभ्यते ?

ग. श्रीहर्षस्य मातुः नाम किम् अस्ति ?

घ. विद्वदौषधम् किम् ?

**प्रश्न 3 – प्रदत्तशब्दैः रिक्तस्थानानि पूरयत–**

(अतीव, भुवनभास्करमणिरिव, औषधम्, नैषधे, लभते)

क. श्रीहर्षः संस्कृतजगति ..................शोभते।

ख. अस्य कवित्वं पाण्डित्यं च .................... विलक्षणम्।

ग. ताम्बूलद्वयमासनं च ....................... यः कान्यकुब्जेश्वरात्।

घ. नैषधं विद्वद् ....................।

ङ. ................. पदलालित्यम्।

**प्रश्न 4 – सत्यमसत्यं लिखत–**

क. नैषधीयचरितस्य रचनाकारः श्रीहर्षः अस्ति।

ख. खण्डनखण्डखाद्यम् रचनाकारः महाकविः माघः अस्ति।

ग. नैषधीयचरिते पञ्चदश सर्गाः सन्ति।

घ. नैषधीयचरितस्य पञ्चमसर्गान्ते श्रीविजयप्रशस्तिः इति रचनायाः कविता उल्लिखिता।

ङ. श्रीहर्षः महाराजजयचन्द्रस्य सभारत्नम् आसीत्।

**प्रश्न 5 – युग्म मेलनं कुरुत–**

| | | | |
|---|---|---|---|
| क. | श्रीहर्षः | (i) | द्वाविंशतिः सर्गाः |
| ख. | द्वाविंशतिसर्गान्ते | (ii) | अर्णववर्णनम् |
| ग. | षष्ठसर्गान्ते | (iii) | नैषधीयचरितम् |
| घ. | नैषधीयचरितम् | (iv) | खण्डनखण्डखाद्यम् |
| ङ. | नवमसर्गान्ते | (v) | नवसाहसाङ्कचरितचम्पूः |

**प्रश्न 6 - अधोलिखितशब्दानां धातुं लकारं पुरुषं वचनञ्च लिखत-**

क. शोभते

ख. दृश्यते

ग. अभवत्

घ. याति

ङ. प्रकटयति

**प्रश्न 7 - प्रकृति-प्रत्ययौ लिखत-**

क. उत्कर्षः

ख. कतम्

ग. वन्दनीयम्

घ. प्राप्ता

ङ. प्रकटितः

**प्रश्न 8 - अधोलिखितशब्दानां विभक्तिंवचनञ्च लिखत-**

क. गुणानाम्

ख. बुद्धया

ग. नैषधे

घ. श्रेष्ठग्रन्थः

ङ. काव्यविलक्षतां

**प्रश्न 9 - अधोलिखितपदानां पर्यायपदानि लिखत-**

क. कीर्तिः

ख. बुद्धिः

ग. भारती

घ. सुधयः

ङ. अधुना

**लघुत्तरीयप्रश्नः**

क. महाकविश्रीहर्षस्य रचनानां नामानि लिखत-

**दीर्घोत्तरीयप्रश्नाः**

क. ''नैषधं विद्वदौषधम्'' इति विषयं स्वीकृत्य स्वमतं लिखत-

ख. ''उदिते नैषधे काव्ये क्व माघः क्व च भारवि'' इति विषमवलम्ब्य- स्वभावान् प्रकटयत-

ग. महाकविश्रीहर्षस्य सामान्यपरिचयं लिखत-

# अभ्यासकार्यम्

## महाकविः कालिदासः

**प्रश्न 1 – उचितविकल्पं चित्वा लिखत।**

क. रघुवंशमहाकाव्यस्य रचनाकारः अस्ति–

अ. महाकविः श्रीहर्षः ब. महाकविः माघः

स. महाकविः कालिदासः द. महाकविः भारविः

ख. कुमारसम्भवमहाकाव्ये कयोः कथा वर्णिता–

अ. विधिब्रह्मण्योः ब. लक्ष्मीनारायणयोः

स. शिवपार्वत्योः द. शचीन्द्रयोः

ग. अभिज्ञानशाकुन्तलनाटकं कति अङ्कात्मकम्–

अ. अष्ट ब. सप्त

स. नव द. षड्

घ. मेघदूतम् कति खण्डात्मकं काव्यम्–

अ. त्रीणि ब. द्वे

स. चत्वारि द. पञ्च

ङ. कविकुलगुरोः नाम्ना प्रसिद्धः अस्ति –

अ. अश्वघोषः ब. राजशेखरः

स. महाकविः कालिदासः द. महाकविः माघः

**प्रश्न 2 – एकपदेन उत्तरं लिखत।**

क. रघुवंशमहाकाव्ये कति सर्गाः सन्ति?

ख. महाकविः कालिदासः कस्य राज्ञः सभाकविः आसीत् ?

ग. ऋतुसंहारखण्डकाव्ये कति ऋतूणां वर्णनं विद्यते ?

घ. मालविकाग्निमित्रं नाटके कति अङ्काः सन्ति?

ङ. अभिज्ञानशाकुन्तलनाटके नायकः कः अस्ति ?

**प्रश्न 3 – एकवाक्येन**

क. हर्षवर्धनस्य सभाकविः कः आसीत् ?

ख. रघुवंशमहाकाव्ये कति राज्ञां वर्णनम् अस्ति ?

ग. कुमारकर्तिकेयस्य जन्मकथा कस्मिन् काव्ये वर्णिता अस्ति ?

घ. 'मेघदूतम्' कीदृशं काव्यम् ?

ङ. 'ऋतुसंहार' खण्डकाव्ये कति श्लोकाः सन्ति ?

**प्रश्न 4 - प्रदत्तशब्दैः रिक्तस्थानानि पूरयत-**

(पञ्चम्यां शताब्द्यां, महाकविः, कालिदासस्य, महाकाव्यं, राज्ञां)

क. कविकुलशिरोमणिः ................ कालिदासः अस्ति।

ख. कालिदासस्य प्रादुर्भावः प्रायः ................ स्वीक्रियन्ते।

ग. हर्षवर्धनस्य सभाकविः बाणभट्टेन ................ कवितायाः प्रशंसा कृता।

घ. कालिदासेन सूर्यवंशस्य ...........वर्णनं कृतम् ।

ङ. रघुवंश .............अस्ति ।

**प्रश्न 5 - सत्यमसत्यं लिखत-**

क. उपमाप्रसङ्गे महाकविः कालिदासः प्रसिद्धः अस्ति ?

ख. मेघूदतम् गीतिकाव्यमस्ति ?

ग. 'मालविकाग्निमित्रम्' नामकः नाटके षण्णनवतिः श्लोकाः नास्ति ?

घ. विक्रमोर्वशीयम् त्रोटके नायकः पुरुरवा न अस्ति ?

ङ. अभिज्ञानशाकुन्तलनाटके प्रियवंदा-अनुसूये सख्यौ स्तः ?

**प्रश्न 6 - उचितं मेलनं कुरुत-**

| | | | |
|---|---|---|---|
| क. | महाकविः | (i) | नायिका |
| ख. | नायकः | (ii) | महाकाव्यम् |
| ग. | रघुवंशः | (iii) | अग्निमित्रः |
| घ. | मालविका | (iv) | त्रोटकम् |
| ङ. | विक्रमोर्वशीयम् | (v) | कालिदासः |

**प्रश्न 7 - नामनिर्देशपूर्वकं सन्धिविच्छेदं कुरुत -**

क. सर्वास्वपि

ख. कण्वस्योपदेशः

ग. एवञ्च

घ. शकुन्तलेति

ङ. विक्रमोर्वशीयम्

**प्रश्न 8 - अधोलिखितानां विभक्तिं वचनञ्च लिखत-**

क. स्वकालविषये

ख. विद्वद्भिः

ग. मनोव्यथा

घ. सभायाः

ङ. शताब्द्यां

**प्रश्न 9 - अधोलिखितशब्दानां धातुंलकारं पुरुषं वचनञ्च लिखत-**

क. मन्यन्ते

ख. स्वीक्रियन्ते

ग. अनुमीयते

घ. आसीत्

ङ. विद्यते

**प्रश्न 10 - लघूत्तरीयप्रश्नः**

क. महाकवि: कालिदासस्य रचनानां सक्षिप्तं परिचयं लिखत-

**प्रश्न 11 - दीर्घोत्तरीयप्रश्नः**

क. ''कालिदासस्य सर्वस्वम् अभिज्ञानशाकुन्तलम्'' इति विषयम् अवलम्बय स्वमतं लिखत।

ख. महाकवे: कालिदासस्य सामान्यं परिचयं लिखत।

❖ ❖ ★ ❖ ❖

## षष्ठः अध्यायः

# गीतिकाव्यम्

गीतिकाव्यं काव्यस्यैकं विशिष्टं स्वरूपमस्ति, यस्मिन् काव्यत्वेन सह सङ्गीतात्मकता प्रमुखा भवति। एतान् पद्यान् वाद्ययन्त्रैः सह गातुं शक्यते। शास्त्रीयदृष्ट्या गीतिकाव्यं 'खण्डकाव्यं' कथ्यते। यतोऽहि अस्मिन् महाकाव्यस्य सर्वे गुणाः न भवन्ति। 'खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च' इति। गीतिकाव्येषु प्रायः मुक्तकपद्यानि भवन्ति, एतेषु पद्येषु पूर्वापर-प्रसङ्गस्यावश्कता न भवति। इमानि पद्यानि स्वस्मिन् पूर्णतया स्वतन्त्राणि भवन्ति। मुक्तकपद्येषु भावः एकस्मिन्नेव पद्ये पूर्णः भवति।

गीतिकाव्ये भावप्राधान्यं विद्यते। एतस्मिन् अन्तरात्मा ध्वनिः भवति। जीवनस्य एकाङ्गिवर्णनं प्राप्यते। यदि महाकाव्ये जीवनस्य समग्रता तर्हि गीतिकाव्ये एकदेशीयता, महाकाव्ये विस्तारः गीतिकाव्ये घनत्वम्। अतएव गीतिकाव्यानां जनमानसे विशिष्टं स्थानं विद्यते।

### गीतिकाव्यस्योद्गमः विकासश्च

गीतिकाव्यस्योद्गमः ऋग्वेदादेव जातः। ऋग्वेदे उषा-विष्णु-इन्द्र-वरुण-सविता-अदिति-मरुतादि देवानां स्तुतिः कृता। एवञ्च तेषां गुणानां भावप्रवणतया वर्णनं कृतम्। वाल्मीकिरामायणे महाभारते च बहुषु स्थलेषु रामकृष्णयोः स्तुतिः कृता। भागवतपुराणे, विष्णुपुराणे, नारदपुराणे, अन्यपुराणेषु च उपास्यदेवानां स्तुतिः प्राप्यते। लौकिकसाहित्ये कालिदासात् गीतिकाव्यस्य प्रारम्भः भवति।

**गीतिकाव्यस्य भेदाः** - विषयदृष्ट्या गीतिकाव्यस्य भागद्वयं भवितुं शक्नोति । (1) शृङ्गारिकम्, (2) धाार्मिकं नैतिकं वा।

### संस्कृतगीतिकाव्यानां विशेषताः

संस्कृतगीतिकाव्यानां कतिपयप्रमुखाः विशेषताः सन्ति।

(1) शृङ्गारिकं गीतिकाव्यम् - एतस्मिन् काव्ये मानवीयप्रेम्णः उत्कृष्टं स्वरूपं प्रस्तूयते।

(2) धार्मिकम् - धाार्मिकगीतिकाव्यम् एकाम् उपास्यदेवताम् आधृत्य भावप्रधानम् अनुभूतिमूलकम् च भवति।

(3) नैतिकं गीतिकाव्यम् - एतस्मिन् नैतिकशिक्षा मुक्तकरूपेण पद्यात्मकरीत्या प्रस्तूयते।

(4) सङ्गीतात्मकता - सर्वेषु गीतिकाव्येषु सङ्गीतस्य प्रमुखता वर्तते। एतेषु स्वरतन्त्र्याः मधुरः स्वरः आरोहावरोहश्च भवति।

(5) मार्मिकानुभूतिः - सहृदयसंवेद्यता, जीवनस्य मार्मिकानुभूतिः, सुख-दुःखयोः सजीवं चित्रणं प्रसादविषादयोः वर्णनं, जीवनस्य यर्थाथतायाः अभिव्यक्तिः भवति।

(6) भाषाभावयोः समन्वयः - गीतिकाव्ये भावानां सौकर्यं, कोमलत्वं, माधुर्यं भवति। गौडी-शैल्याः समास-बाहुल्यस्य पाण्डित्यप्रदर्शनस्य सर्वथा अभावः निषेधश्च भवति।

(7) भावस्वातन्त्र्यम् - गीतिकाव्ये किमपि विशिष्टं भावं गृहीतुं नियमः न भवति। अत्र कविः उन्मुक्तवातावरणे विचरन् पक्षिवत् स्वतन्त्ररूपेण सर्वेषु विषयेषु सर्वेषु भावेषु सर्वासु च कल्पनासु विचरति।

(8) प्रसादमाधुर्ययोः समन्वयः - गीतिकाव्येषु सुकुमारप्रकृतिः, शृंगाररसाधिक्यं:, नीतयः, अनुभूतयः, भावनाः कल्पनाः जीवनस्य यथार्थता वर्णिता अस्ति। अतः एतेषु सरसपदविन्यासः सहजाभाषा रसमाधुर्य-समन्वयः वर्तते।

(9) रसपरिपाकः - गीतिकाव्येषु शृंगारशान्तवीररसानां मुख्यतः प्रतिपादनं भवति।

(10) तरुणीलावण्यम् - शृंगारिकगीतिकाव्येषु मुख्यतया रमणीसौन्दर्यं , नखशिखवर्णनं, कटाक्षपातः, हासः शृंगारिकाः चेष्टाः भावाः भवन्ति।

(11) जीवनदर्शनम् - संस्कृत-गीतिकाव्येषु मानवस्य जीवनदर्शनं प्रस्तूयते।

**प्रमुखानि गीतिकाव्यानि**

| **क्र.** | **काव्यम्** | **रचनाकारः** |
|---|---|---|
| 1 | गीतिकाव्यम् | गीतिकाव्यकर्त्ता |
| 2 | मेघदूतम् | कालिदासः |
| 3 | ऋतुसंहारम् | कालिदासः |
| 4 | नीति- शृंगार-वैराग्यानि (शतकत्रयम्) | भर्तृहरिः |
| 5 | अमरुशतकम् | अमरुकः |
| 6 | गीतगोविन्दकाव्यम् | जयदेवः |
| 7 | भामिनीविलासः | पण्डितराज-जगन्नाथः |

## अभ्यासप्रश्नाः

**प्रश्न 1 - उचितं विकल्पं चित्वा लिखत -**

क. गीतिकाव्ये प्रमुखा भवति।

अ. सङ्गीतात्मकता   ब. बौद्धिकता

स. रचनात्मकता   द. स्पष्टता

ख. शास्त्रीय-दृष्ट्या गीतिकाव्यं भवति।

अ. महाकाव्यम्   ब. खण्डकाव्यम्

स. मुक्तककाव्यम्   द. गद्यकाव्यम्

ग. जीवनस्य एकाङ्गिवर्णनं प्राप्यते।

अ. गीतिकाव्ये   ब. महाकाव्ये

स. गद्यकाव्ये   द. नाटके

घ. गीतिकाव्यस्योद्गमः कस्मात् जातः ?

अ. ऋग्वेदात् ब. सामवेदात्

स. अथर्ववेदात् द. यजुर्वेदात्

**प्रश्न 2 - एकपदेन उत्तरत -**

क. काव्यत्वेन सह सङ्गीतात्मकता कस्मिन् भवति ?

ख. गीतिकाव्यस्य अपरं नाम किम् ?

ग. गीतिकाव्ये कस्य प्राधान्यं भवति ?

घ. गीतिकाव्ये कस्याः ध्वनिः भवति ?

**प्रश्न 3 - अधोलिखितान् प्रश्नान् एकवाक्येन उत्तरत**

क. खण्डकाव्यस्य लक्षणं किम् ?

ख. कस्मिन् काव्ये जीवनस्य विशदं वर्णनं भवति ?

ग. मुक्तपद्येषु कस्य आवश्यकता न भवति ?

घ. गीतिकाव्यं कैः सह गातुं शक्यते ?

ङ. ऋग्वेदे केषां देवानां स्तुतिः कृता ?

**प्रश्न 4 - समुचितं पदमेलनं कुरुत -**

| | **अ** | | **आ** |
|---|---|---|---|
| क. | गीतिकाव्यस्योद्गमः | अ. | रामायणम् |
| ख. | गीतिकाव्यम् | ब. | मुक्तकपद्यम् |
| ग. | एकदेशानुसारि | स. | ऋग्वेदः |
| घ. | वाल्मीकिः | द. | खण्डकाव्यम् |
| ङ. | पूर्वापरसम्बन्धरहितम् | इ. | वाद्ययन्त्रम् |

**प्रश्न 5 - शुद्धवाक्यसमक्षं 'आम्' अशुद्धवाक्यसमक्षं 'न' लिखत-**

क. गीतिकाव्ये काव्यत्वेन सह गेयता भवति।

ख. शास्त्रीयदृष्ट्या गीतिकाव्यं 'खण्डकाव्यं' अपि कथ्यते।

ग. गीतिकाव्ये जीवनस्य विशदं वर्णनं प्राप्यते।

घ. खण्डकाव्ये पूर्वापरसम्बन्धः भवति।

**प्रश्न 6 - रिक्तस्थानपूर्तिं कुरुत -**

क. गीतिकाव्यस्य .................. ऋग्वेदात् जातः ।

ख. .............. भवेत् काव्यस्यैकदेशानुसारि च।

ग. ................ भावप्राधान्यं विद्यते।

घ. लौकिकसाहित्ये ................ गीतिकाव्यस्य प्रारम्भः।

ङ. मुक्तकपद्येषु भावः एकस्मिन्नेव पद्ये .................. भवति।

**प्रश्नः 7 - अधोलिखितानां मूलशब्दं विभक्तिं वचनं च लिखत।**

| शब्दः | | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| क. | प्रमुखाः | ...................... | ...................... | ...................... |
| ख. | पूर्णतया | ...................... | ...................... | ...................... |
| ग. | जीवनस्य | ...................... | ...................... | ...................... |
| घ. | रुपेण | ...................... | ...................... | ...................... |
| ङ. | विषयेषु | ...................... | ...................... | ...................... |

**प्रश्न 8 - निम्नलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत ।**

| | क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| क. | भवति | ............. | ............. | ............. | ............. |
| ख. | वर्तते | ............. | ............. | ............. | ............. |
| ग. | अस्ति | ............. | ............. | ............. | ............. |
| घ. | विचरति | ............. | ............. | ............. | ............. |
| ङ. | विद्यते | ............. | ............. | ............. | ............. |
| च. | प्राप्यते | ............. | ............. | ............. | ............. |

**प्रश्न 9 - अधोलिखितानां पदानां प्रकृतिं प्रत्ययं च पृथक् कुरुत।**

क. गातुम्

ख. कृतम्

ग. प्रारम्भः

घ. जातः

ङ. अभिव्यक्तिः

**प्रश्न 10 - अधोलिखित पदानां समास विग्रहं कृत्वा समासनाम लिखत।**

क. काव्योद्गमः

ख. रामकृष्णयोः

ग. भावप्राधान्यम्

घ. सहृदयसंवेद्यता

ङ. नैतिकशिक्षा

**प्रश्न 11 - संस्कृतगीतिकाव्यानां संक्षेपेण परिचयं लिखत।**

**योग्यताविस्तारः -**

- कालिदासकृतं ऋतुसंहारं गीतिकाव्यं पठनीयम्।
- गीतिकाव्यानां गेयताविषये परस्परं चर्चा कुर्वन्तु।
- ऋग्वेदे केषां देवानां स्तुतिः कृता, परस्परं चर्चा कृत्वा प्रश्नः निर्मेयः।

❖ ❖ ★ ❖ ❖

# सप्तमः अध्यायः
# लोककथापरम्परा

लोककथा परम्परायाः प्रमुखोद्देश्यं मनोरञ्जनम्। अस्याम् मनुष्यपात्राणां बहुलता दृश्यते।

कथायाः भाषा प्रौढा। अत्र शृंगारादिरसाः काव्यौन्दर्यादिगुणाः अपि द्रष्टुं शक्यन्ते। कथासाहित्यस्य सर्वश्रेष्ठग्रन्थः गुणाढ्यकृता 'बृहत्कथा'। इदानीं बृहत्कथायाः पूर्णमूलप्रतिः न मिलति। कतिपय अंशाः एव प्रचलिताः सन्ति। बृहत्कथाभूमिकायां लिखितम् अस्ति यत् रचनान्तरे सप्तलक्ष्यश्लोकाः आसन् किन्तु इदानीं नरवाहनदत्तस्य चरितस्य अंशः एव शेषः। अस्मिन् अंशे एकलक्ष्यश्लोकाः सन्ति।

**बृहत्कथाश्रितग्रंथाः**

1. बृहत्कथाश्लोकसंग्रहः – बुधस्वामी
2. बृहत्कथामञ्जरी – क्षेमेन्द्रः
3. कथासरित्सागरः – सोमदेवः

1. बृहत्कथाश्लोकसंग्रहस्य लेखकः 'बुधस्वामी'। अष्टाविंशतिसर्गात्कोऽयम् ग्रन्थः। अस्मिन् क्षेमेन्द्रसोमदेवयोः कथातः पर्याप्तभिन्नता अस्ति। प्राकृतिरूपाणां अधिकः प्रयोगः वर्णनानां अभावः अस्ति।
2. क्षेमेन्द्रकृता बृहत्कथामञ्जरी एकोनविंशतिअध्यायेषु विभाजिता। तत्र पञ्चतोत्तर सप्तसहस्रश्लोकाः सन्ति। अस्याम् बुधस्वामीग्रन्थात् अधिकाः कथाः सन्ति।
3. कथासरित्सागरस्य लेखकः सोमदेवः क्षेमेन्द्रस्य समकालीनः राज्ञः अनन्तस्य सभायां कविः आसीत्। अयं अष्टादशलभकेषु विभक्तः, चतुर्विंशत्युत्तरैकशतं तरंगाः सन्ति।

काश्मीरक्षेत्रस्य कथायाः वर्णनं अस्ति। बृहत्कथायाः उपजीव्यग्रन्थेषु उत्कृष्टोऽयं ग्रन्थः।

**अन्यानि कथासाहित्यानि-**

वेतालपंचविंशतिका- अस्यां पञ्चविंशतिकथाः सङ्गृहीताः। अस्याः संस्करणद्वयं अस्ति।

प्रथमसंस्करणम्- शिवदासकृतवेतालपञ्चविंशतिका। अस्याः स्वरूपं गद्यपद्ययुक्तम्।

द्वितीयसंस्करणम् - जम्भलदत्तकृता वेतालपञ्चविंशतिका गद्यमयी एव। वेतालञ्चविंशतिकथायां एकः भिक्षुकः प्रतिवर्षं नृपविक्रमसेनाय फलं एकं ददाति। फले रत्नं भवति स्म। अतः नृपः भिक्षुकाय साहाय्यार्थम् एकं वेतालाधिकृतं शवमानयनार्थम् श्मशानभूमिं गच्छति। वेतालः सार्धं चलितुं सन्धिं स्थापयति यत् भवान् मार्गे मौनमाधृत्य चलिष्यति। सः मार्गे प्रहेलिकायुक्तां कथां श्रावयति। एवं राजानमुत्तरं पृच्छति। राजा सन्धिं विस्मृत्य उत्तरं कथयति, वेतालः श्मशानभूमिं प्रति गच्छति । वेतालः पुनः ससन्धिं आगच्छति

नृपः उत्तरं वदति, वेतालः श्मशानभूमिं प्रति गच्छति। घटनेयं पञ्चविंशतिवारं आवृत्ता पञ्चविंशतिप्रहेलिकाः निर्मिताः। एताः कथाः एव वेतालपञ्चविंशतिकाः।

सिंहासनद्वात्रिंशिका कथायाः लेखकः अज्ञातः। कथायाः अपरं नाम द्वात्रिंशत्पुत्तलिका। अयं ग्रन्थोऽपि विक्रमादित्यात् सम्बद्धः अस्मिन् द्वात्रिंशत्कथानां उल्लेखः। प्रारंभिककथावर्णने विक्रमादित्यस्य सिंहासनं भूमौ तिरोहितः आसीत्। राजा भोजः तत् सिंहासनं प्राप्नोति। तस्मिन् सिंहासने द्वात्रिंशत् पुत्तलिकाः आसन्। ताः पुत्तलिकाः भोजराजं विक्रमादित्यस्य न्यायौदार्ययोः कथां श्रावयन्ति। प्रत्येका पुत्तलिका एकां कथां श्रावयित्वा अगोचरा भवति।

**शुकसप्ततिः** – सप्ततिकथायुक्ता इयं रोचककथा। अस्याः वाचकद्वयं। संक्षिप्तविस्तृतश्च। विस्तृतवाचिकायाः लेखकः चिन्तामणिभरः। अस्यां पतिपरिदेशगमने सति प्रेमिणा सह पालायनम् अवरुद्धार्थं शुकः सप्ततिः कथाः श्रावयति। सा अतीतमनोविनोदिनी। यस्मिन् हरदत्त नामकस्य वणिजः मदनसेन नामा एकः मूर्खः पुत्रः आसीत्। तस्य मूर्खत्वं निवारणाय हरदत्तः पक्षिवेशधारी गन्धर्वद्वयं नियोजयति एकदा मदनः विदेशयात्रां गन्तुकामः स्वपत्नीं द्वयोः पक्षिणोः संरक्षकत्वे ददाति। पतिविरहिता सा कामवेदनया व्यभिचारमार्गं चिनोति। सा काकोपदेशं न श्रृणोति तदा बुद्धिमान् शुकः युवतीं प्रतिदिनं एकां कथां श्रावयित्वा सप्ततिः दिनानि याययति तथा। तां दुराचरणात् निवारयति। सप्ततिदिनानन्तरं तस्याः पतिः समायाति अनेन सा दुष्कृताम् निर्वृत्ता। एवं कथायाः शैली अत्यन्तरुचिरा आकर्षिका च। वक्ता शुकः स्त्रीणां दुराचारः, पर-पुरुषगमनम्, वैवाहिकसंबंधविच्छेदादिनां विषये बहूनि उदाहरणानि दत्वा कथां श्रावयित्वा च तां परपुरुषगमनात् निवारयति।

## अभ्यासकार्यम्

**प्रश्न 1 – एकपदेन उत्तरं लिखत –**

क. लोककथापरम्परायाः प्रमुखोद्देश्य किम् ?

ख. बृहत्कथायाः कर्ता कः ?

ग. क्षेमेन्द्रस्य कृतिः का ?

घ. राजाविक्रमसेनस्य कथा कुत्रास्ति ?

ङ. सिंहासनद्वात्रिं शिकाकथायां सिंहासनं केन प्राप्तः ?

**प्रश्न 2 – एकवाक्येन उत्तरं लिखत –**

क. बृहत्कथायाः उपजीव्यग्रन्थेषु उत्कृष्टः ग्रन्थः कः ?

ख. वेतालपञ्चविंशतिकायां श्रोता कः श्रावकः कः ?

ग. शुकसप्ततिकथायां कति कथाः सन्ति ?

घ. हरदत्तः पक्षिवेशिणौ गन्धर्वौ मदनसेनाय किमर्थं नियोजितवान् ?

ङ. काश्मीरक्षेत्रस्य कथायाः वर्णनं कस्मिन् ग्रन्थे अस्ति ?

**प्रश्न 3 – त्रिचतुर्भिः वाक्यैः उत्तरं लिखत –**

क. बृहत्कथायाः उपजीव्यग्रन्थानां नामानि लिखत ?

ख. वेतालपञ्चविंशतिकायाः सारं लिखत ?

ग. मदनसेनस्य पत्नी किमर्थं व्याभिचारमार्गं चिनोति ?

**प्रश्न 4 - युग्मं मेलयत् -**

| | **अ** | **आ** |
|---|---|---|
| क. | सोमदेवः | बल्लालसेनः |
| ख. | सिंहासनद्वात्रिंशिका | मूर्खपुत्रः |
| ग. | भोजप्रबन्धः | कथासरितसागरः |
| घ. | मदनसेनः | द्वात्रिंशत्पुत्तलिका |

**प्रश्न 5 - समुचितपदेन रिक्तस्थानं पूरयत -**

क. सिंहासने ............ पुत्तलिकाः आसन् ।

ख. शुकः युवतीं प्रतिदिनं एकां .......... श्रावयति।

ग. राजा .............. विस्मृत्य उत्तरं कथयति।

**प्रश्न 6 - धातुलकारवचनानि लिखत -**

क. ददाति

ख. चलिष्यति

ग. प्रतिगच्छति

घ. आसम्

**प्रश्न 7 - अधोलिखितपदानां मूलशब्दविभक्तिवचनानि लिखत -**

क. अस्मिन्

ख. तस्याः

ग. अस्याः

घ. भिक्षुकाय

**प्रश्न 8 - सुबन्तपदानि प्रथक् कुरुत -**

क. भवति

ख. भूमौ

ग. आसन्

घ. आसीत्

ङ. ततः

च. लेखकः

छ. भवान्

**प्रश्न 9 - अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत -**

क. प्रमुखोद्देश्यः

ख. मौनमाधृत्य

ग. न्यायौदार्ययोः

घ. अत्यन्त

ङ. मनोरञ्जनम्

**प्रश्न 10 - अधोलिखितानाम् अव्ययपदानां वाक्येषु प्रयोगं कुरूत -**

क. एव

ख. अत्र

ग. अपि

घ. स्म

ङ. यत्

**योग्यताविस्तारः -**

- सोमदेवकृत कथासरितसागरस्य कथापरिचयः लेखनीयः ।
- कथासाहित्यस्य आधुनिककाव्यकारान् अन्विष्य अध्ययनं कुरुत।

❖ ❖ ★ ❖ ❖

# अष्टमः अध्यायः

# संस्कृत-नाट्यकाराः

## महाकविभासः

**जीवनवृत्तं कृतित्वञ्च**

महाकविभासस्य जीवनचरितसन्दर्भे न किमपि स्पष्टं विवरणं सम्प्राप्यते। महाकविकालिदासः

मालविकाग्निमित्रस्य प्रस्तावनायां (प्रथितयशसां भाससौमिल्ल) इति भासं सादरं स्मरति। अनेन सिद्धयति यदयं कलिदासात् पूर्वमेव नाटककारेषु सुविख्यातः आसीत्। भासस्य नाटकेषु तज्जीवनचरितस्य किमपि स्पष्टं विवरणं न प्राप्यते तथापि, भासः उच्चश्रेण्याः विद्वान् आसीत्। तेन वेदाः, शास्त्राणि, स्मृतयः, काव्यशास्त्राणि, नाट्यशास्त्राणि, दर्शनानि, पुराणानि गंभीरतया अधीतानि। स नाट्यकलायाः ज्ञाता आसीत्, कालिदासेन श्रेष्ठनाटकारत्वेन तस्मै मान्यता प्रदत्ता।

**भासस्य नाट्यकृतित्वम्** :- महाकविभासस्य कृतित्वेन साम्प्रतं त्रयोदश (13) नाटकानि

समुपलभ्यन्ते। खीताब्दस्य 1909 ईसवीये श्री टी. गणपति शास्त्री महोदयेन त्रावणकोरराज्यात् एतानि नाटकानि प्राप्तानि।

भासनाटकानि कथास्रोतदृष्टया चतुर्धा विभक्तुं शक्यते।

**(क)** **उदयनकथामूलकम्** - (1) प्रतिज्ञायौगन्धरायणम् , (2) स्वप्नवासवदत्तम्।

**(ख)** **महाभारतमूलकम्** - (3) उरुभङ्गम् (4) दूतवाक्यम् (5) पञ्चरात्रम् (6) बालचरितम् (7) दूतघटोत्कचम् (8) कर्णभारम् (9) मध्यमव्यायोगः।

**(ग)** **रामायणमूलकम्** - (10) प्रतिमानाटकम् (11) अभिषेकनाटकम्

**(घ)** **कल्पनामूलकम्** - (12) अविमारकम् (13) चारुदत्तम्।

**एतेषां परिचयः समासतोऽत्र प्रस्तूयते**

1. **प्रतिज्ञायौगन्धरायणम्**- अङ्कचतुष्टयनाटकेऽस्मिन् उदयनस्य वासवदत्तया सह प्रणयः परिणयश्चेह वर्ण्येते।

2. **स्वप्नवासवदत्तम्** - नाटकेऽस्मिन् अष्टौ अङ्काः वासवदत्ता अग्नौ दग्धेति प्रवादं श्रुत्वा यौगंधरायणप्रयत्नात् पद्मावत्या सह उदयनस्य परिणयोऽपहृतराज्यावाप्तिश्च वर्णिता।

3. **दूतवाक्यम्**- एकाङ्कीनाटकमिदं महाभारतयुद्धात् प्राक् पाण्डवार्थं दुर्योधनसंसदि दूतत्वेन श्रीकृष्णस्यागमनं वर्णितम्।

4. **उरुभङ्गम्**- एकाङ्कीनाटकेऽस्मिन् द्रौपदी-परिभव-प्रतिक्रिया-फलस्वरूपं भीमसेनेन गदायुद्धे दुर्योधनोरुभञ्जनस्य वर्णनमस्ति।

5. **पञ्चरात्रम्**- त्र्यङ्कयुक्ते नाटकेऽस्मिन् पञ्चरात्र्यभ्यन्तरे पाण्डवानां प्राप्तिः राज्यप्राप्तेश्च वर्णनं विद्यते।

6. **बालचरितम्**- पञ्चाङ्केषु बालस्यः श्रीकृष्णस्य जन्मतः कंसवधान्तं चरितं वर्णितम् ।

7. **दूतघटोत्कचम्**- एकाङ्कीनाटकमिदम् अभिमन्युवधान्तरं घटोत्कचः श्रीकृष्णस्य प्रेरणया दौत्यमङ्गीकरोति।

8. **कर्णभारम्**- एकाङ्कीनाटकेऽस्मिन् इन्द्रः कर्णं कवचकुण्डलान् याचते।

9. **मध्यमव्यायोगः** - नाटकमिदम् एकाङ्की। अत्र मध्यमपाण्डवो भीमः मध्यमनामकं ब्राह्मणबालं घटोत्कचेन त्रायते। अन्ते पुत्रेण पत्न्या सह मेलनमपि भवति।

10. **प्रतिमानाटकम्**- सप्ताङ्कनाटकेऽस्मिन् रामायणी कथा अस्ति अत्र भरतः स्वपितुः दशरथस्य प्रतिमां दृष्ट्वा पितुर्निधनमवगच्छति।

11. **अभिषेकनाटकम्**- अष्टाङ्कयुक्ते नाटकेऽस्मिन् किष्किंधाकाण्डादारभ्य रावण वधानन्तरं रामस्य राज्याभिषेकः वर्णितः।

12. **अविमारकम्**- अङ्कषट्कमत्र। राजकुमारस्य अविमारकस्य कुन्तिभोजस्य पुत्र्या कुरङ्गया सह प्रणयपरिणयोऽत्र वर्णितः।

13. **चारुदत्तम्**- चतुरङ्कयुक्तं नाटकमिदमत्र उदारचित्तस्य चारुदत्तस्य वसन्तसेनया वाराङ्गनया सह प्रणयोपमयम् वर्णितम्।

**भासस्य नाट्यकला**- समुपलब्धं संस्कृतवाङ्मयमनुशील्यते चेत् प्राप्यते यत् भास एव नाटककारेषु श्रेष्ठः अग्रणीरिति। नाटकानां बाहुल्येन, विषयवैविध्येन च नाट्यकौशलं वैशद्यं च दृश्यते। नाटकेषु तस्य प्रमुख विशेषताः सन्ति- भाषासारल्यं, कृत्रिमता रहिता, शैली, वर्णनेषु यथार्थता, घटनासंयोजनसौष्ठवं, कथा प्रसङ्गस्य सरलः प्रवाहः, मौलिकता, कल्पनावैचित्र्यञ्च प्राप्यते।

**भाषाशैली** - भासस्य शैल्यां माधुर्यौजः प्रसादानां त्रयाणां गुणानां समाहारः दृश्यते। भाषा सरला, सुबोधा, सरसा, स्वाभाविकी, सप्रवाहा च । भासः मानवीय मनोवृत्तीनां वर्णने सफलः ।

तद्यथा दुःखं त्युक्तुं बद्धमूलोऽनुरागः, स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषामद् विमुच्येह वाष्पं प्राप्तानृण्या याति बुद्धिः प्रसादम् ।। (स्वप्नवास 4/6)

भासः भारतीयभावानां कविः । तस्य नाटकेषु भावानामुचितं समन्वयः प्राप्यते। यथा- पितृभक्तिः, पतिव्रत्यम्, भ्रातृप्रेम, क्षमाशीलता, त्यागादिकञ्च। पातिव्रत्यं वर्ण्यते यथा-

अनुचरति शशाङ्कं राहुदोषेऽपि तारा,
पतति न वनवृक्षे याति भूमिं लता च।
त्यजति न च करेणुः पङ्कलग्नं गजेन्द्रं
व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः।। (प्रतिमा 1/25)

भासस्य नाटकानां लोकप्रियतायाः कारणं वर्तते -सरसता, सरलता, रम्यता च ।

# कालिदासः

कविकुलगुरुः कविताकामिनीकान्तः महाकविः कालिदासः कस्य हृदयं नाकर्षयति। अयं संस्कृत-वाङ्मयमहाकाशे मणिरिव भासते। अस्य महाकवेः काव्यमाधुरी तथा प्रसिद्धा यथा नार्हति आमुखम्। कालिदासः स्वकाव्ये वस्तुवर्णनावसरे रसस्य माधुर्यप्रकटनं तथा मनोरमरीत्या विधत्ते। तस्य सूक्तयः सुधासिक्ता मञ्जर्य इव चेतोहराः सन्ति। तद्यथा-

'निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसान्द्रासु मञ्रीषिविव जायते।।

**जीवनवृत्तम्** - कालिदासः स्वकृतिषु क्वचिदपि स्ववृत्तं न वर्णनं कृतवान् । अत एव असौ- ''कं कालं कं च देशं'' स्वजन्मना अलंकृतवान्''- इति- न अद्य अवधिः निर्निवादं सुनिश्चितम् । साहित्यसमालोचकाः तद्विषये समधिकतरम् अनुमानमेव कुर्वन्ति। कालिदासः प्रायशः स्वरचनासु उज्जयिनीनगर्याः तत्रस्थस्य महाकालस्य च वर्णने शिप्रानद्याश्च रमणीयचित्रणे विशिष्टामभिरुचिं अदर्शयत्। एतेन यत् अवन्तिका एव कालिदासस्य जन्मभूमिः। विश्वप्रसिद्धाकथाभिः कालिदासस्य नाम शकाब्द प्रवर्तकेण उज्जयिन्यधिपतिना विक्रमादित्येन सह सम्बद्धम्। कालिदासः विक्रमादित्यवर्णने स्व काव्यकलाम् अप्रदर्शयत्। अनेन ज्ञातं यत् विक्रमनृपतिः कालिदासमाश्रयम् अददत्। कालिदासश्च तस्य सभारत्नत्वेन अलंकृतवान्। ज्योतिर्विदाभरणस्य-

धन्वन्तरिक्षपण कामरसिंहशंकु-वेंतालभट्ट-घटकर्पर-कालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य।।

पद्यमपि इदमेव साधयति । उपर्युक्तैः प्रमाणैः इतिहासविदः सुधयः कालिदासकालम् ईशवीय शताब्दीतः पूर्व प्रथमां शताब्दीं निर्णयमकरोत्।

**कृतित्वम्**

महाकविकालिदासस्य संस्कृतवाङ्मये सप्त कृतयः निधिरूपेण विद्यन्ते। तास्तु यथा

(क) रघुवंशम्, कुमारसंभवम् - इति महाकाव्यद्वयम्।

(ख) मेघदूतम्, ऋतुसंहारम् - इति गीतिकाव्यद्वयम्।

(ग) अभिज्ञानशाकुन्तलम् , विक्रमोर्वशीयम्, मालविकाग्निमित्रं च इति त्रीणि नाटकानि। सर्वासु अपि कृतिषु कालिदासस्य रचनापाटवम् अपूर्वम्।

**काव्यकौशलम्** - कालिदासस्य रचनाकला अद्वितीया। यादृशी सरसता यादृशी च कोमलकान्तपदावलिः कालिदासकाव्ये वरीवर्ति तादृशी न अन्यत्र दृष्टिपथम् आयाति। रचनाशोभाधायकानि सर्वाणि एव तत्त्वानि कालिदासस्य रचनायां सुष्ठु समाहितानि। शृंगारादिरसाः कालिदासकाव्यं रसाप्लावितं कुर्वन्ति। माधुर्यौजादिगुणाः कालिदासकवितां गरिमान्वितां कुर्वन्ति। उपमाद्यलंकाराः कालिदासकाव्यं महिमाण्डितां कुर्वन्ति। वैदर्भ्यादयश्च सर्वा रीतयः कालिदासरचनां कमनीयतामापादयन्ति। कालिदासः खलु रसव्यंजनायां, शब्दरचनायां, कमनीयकथावर्णनायां भव्यभावाभिव्यंजनपटुतायां च सर्वानेव कवीनतिशेते। वास्तविकतया कालिदासवाङ्मयं काव्यकलायाः साकाररुपमेव।

**रघुवंशमहाकाव्यम्** - महाकाव्येऽस्न्ि एकोनविंशतिः सर्गाः (19) एकोनसप्ततिः अधिकपञ्चदशशतश्लोकाश्च सन्ति (1569)। अस्मिन् सूर्यवंशस्य राज्ञः दिलीपादारभ्य अग्निवर्णपर्यन्तम्

एकत्रिंशत् राज्ञां वर्णनं विद्यते।

काव्ये कविना रघूणां प्रशंसां कुर्वन् राज्ञः आदर्शः प्रस्तुतः कृतः । राजादिलीपेन पुत्र प्राप्त्यै नन्दिन्याः सेवा कृता। एकविंशतिः दिनात्मकसेवया नन्दिनी प्रसन्ना भूत्वा राज्ञः मनोरथं सिद्धयति।

**कुमारसम्भवम्** :- इदं कवेः अत्युत्तमं काव्यम् अस्ति सप्तदश सर्गात्मकम् महात्यमिदम्। नायकः शिवः नायिका च पार्वती वर्तेते। अस्मिन् शिवपार्वत्योः परिणयः, कुमारकार्तिकेयस्य उत्पत्तिः, तारकासुरवधवर्णनम् च कृतम्। शृंगाररसप्रधानः ग्रन्थोऽयम् वर्तते।

**मेघदूतम्**- खण्डकाव्येऽस्मिन् नायकः किंकरयक्षः नायिका च यक्षिणी। काव्यस्य उपजीव्यं रामायणम् अस्ति। इदं काव्यं संस्कृतसाहित्यस्य परमोज्ज्वलरत्नमस्ति। अस्मिन् विरहीयक्षस्य मार्मिक मनोव्यथानां विरहकथा वर्णिता अस्ति। विप्रलम्भ- शृंगाररस-प्रसादगुण-वैदर्भीरीति-मन्दाक्रान्तायुतम् इदं खण्डकाव्यम्। कवि चातुर्येण यक्षसंदेशं मेघेन प्रापयति अत्र। काव्यम् इदं द्वेखण्डे विभक्तम् अस्ति। पूर्वमेघः उत्तरमेघश्च।

पूर्वमेघे - रामगिरितः अलकापुरीपर्यन्तम् मार्गस्य वर्णनम् अस्ति।

उत्तरमेघे -यक्षेण प्रियायै संदेशप्रेषणम् कृतम्। एतस्य साहित्यवैशिष्ट्यं प्रदर्शयन् केनापि उक्तञ्च ''मेघे माघे वयं गतः''

**ऋतुसंहारम्** - षड्सर्गात्मकम् इदं खण्डकाव्यं, अत्र ग्रीष्मऋतुतः वसन्तऋतुः पर्यन्तम् शृंगारमयं वर्णनम् अस्ति।

ग्रन्थस्य आरम्भः ग्रीष्मऋतोः चण्डतायाः वर्णनात्, समापनं च वसन्त ऋतोः मादकसौन्दर्यस्य चित्रणेन भवति। अस्मिन् गीतिकाव्ये चत्वारिंशत् अधिकैकशतम् श्लोकाः सन्ति।

**अभिज्ञानशाकुन्तलम्**- अभिज्ञानशाकुन्तलम् संस्कृतसाहित्यस्य न, अपितु विश्व-साहित्यस्य इदं सर्वोत्कृष्टं नाटकम् अस्ति।

नायकः धीरोदात्तदुष्यन्तः नायिका च मुग्धाशकुन्तला। अस्मिन् दुष्यन्तशकुन्तलयोः प्रेमवियोगपुनर्मिलनस्य वर्णनं वर्तते। अस्य कथावस्तु महाभारतस्य पद्मपुराणतः च संगृहीता अस्ति। माधुर्यगुण अंगीरस-शृंगार-वैदर्भीरीतियुतं, सप्ताङ्कत्मकम् इदं नाटकम्।

अतः केनाऽपि प्रशंसकेन उक्तम् यत् ''कालिदासस्य सर्वस्वम् अभिज्ञानशाकुन्तलम्'' इति।

**विक्रमोर्वशीयम्** - त्रोटकेऽस्मिन् - नायकः पुरुरवा (विक्रमः) नायिका च उर्वशी वर्तेते। एतयोः प्रेम्णः वर्णनं कृतम्। अस्मिन् पञ्चाङ्का, षडसप्ततिः च श्लोकाः सन्तिः। शृंगाररस-प्रसादगुण-वैदर्भीरीति-उपमालंकारयुतं लालित्यपूर्ण त्रोटकमिदम्। अस्मिन् प्रयुक्तपात्राणाम् उत्कृष्टचरित्रचित्रणस्य दर्शनं भवति।

**मालिवकाग्निमित्रम्** - नाटकेऽस्मिन् धीरललितः अग्निमित्रः नायकः विदर्भराजकुमारी मालिविका नायिका च। पञ्चाङ्कात्मकम् ऐतिहासिकम् इदं नाटकम्।

## शूद्रकः

**व्यक्तित्वपरिचयः** - संस्कृतसाहित्ये शूद्रकस्य यशः सर्वत्र प्रसृतं प्राप्यते। भारतीयाः विद्वांसः शूद्रकस्य जीवनकालंः प्रथमशताब्द्यां मन्यन्ते। अयं हस्तिशास्त्रेषु प्रवीणः आसीत्। एषः शिवस्य

अनुग्रहेण ज्ञानं प्राप्य विधिपूर्वकं अश्वमेधयज्ञं कृतवान्। सोमदेवस्य कथासरित्सागरे, दण्डिनो दशकुमारचरिते,बाणस्य राजतरंगिण्यां, स्कन्दपुराणे च, मेधाविनोऽस्य वेद-विदांवरस्य सिंहोरुसत्वस्य नाम सादरं कीर्त्यते। शूद्रकस्य शैली तु सरला प्रसाद गुणगुम्फिता च अस्ति।

**कृतित्वं** :- शूद्रकः मृच्छकटिकं नामकं प्रकरणम् अरचयत्। मृच्छकटिके प्रकरणे तत्कालीनसमाजस्य प्रतिबिम्बं विद्यते। अस्मिन् प्रकरणे तत्कालीनम् उज्जयिन्याः समाजचरितं विशेषतः प्रदर्शितम् । एतस्मिन् प्रकरणे प्रकृत्याः रमणीयं वर्णनं प्राप्यते। मृच्छकटिकप्रकरणे शूद्रकस्य नाट्यकला सफलीभूता दृश्यते। अस्य प्रकरणस्य भाषा सरला सौष्ठवयुक्ता च अस्ति। अस्मिन् प्रकरणे दश अङ्काः सन्ति।

## भट्टनारायणः

भट्टनाराणस्य जीवनवृत्तं अन्धकारमयं वर्तते। कविः वेणीसंहारस्य प्रस्तावनायाम् आत्मानं

'मृगराजलक्ष्मा' कवेर्मृगराजलक्ष्मणो भट्टनारायणस्यः कथयति। अनेन ज्ञायते यदयं 'कवीन्द्रेण' 'कविमृगेन्द्रेण' वा प्रसिद्धः आसीत्। जनश्रुत्या कान्यकुब्जीयः ब्राह्मणोऽयं सेनवंशप्रर्वतकेण आदिसूरेण वैदिकधर्म प्रचारार्थमाहूतेषु पञ्चब्राह्मण-परिवारेषु एकः आसीत्। अस्य कालः 650 ई.तः 675 ई. मध्यैव सिद्धयति।

भाव-भाषा-रसास्वाद-त्रिवेणी-संहृतौ रतः।
वेणीसंहारमास्थाय, भट्टनारायणो बमौ।। (कविलस्य)

**भट्टनारायणस्य कृतित्वम्**- भट्टनारायणस्य केवलम् एकमेव ग्रन्थः 'वेणीसंहारम्' नाटकं प्राप्यते। शास्त्रीय दृष्ट्या रत्नावल्याः पश्चात् अस्यैवाधिकं महत्त्वमस्ति। वेणीसंहारस्य अध्ययनेन ज्ञायते यदयं विविधानां विषयाणां विशेषज्ञः आसीत्। स नाट्यशास्त्रस्य, नीतिशास्त्रस्य, व्याकरणस्य, काव्यशास्त्रस्य, धर्मशास्त्रस्य, दर्शनस्य, महाभारतस्य च ज्ञाता आसीत्।

**वेणीसंहारनाटकम्** - नाटकेऽस्मिन् षडङ्कानि। अस्मिन् भीमेन द्रौपद्याः वेणीसंहारस्य (वेणीबन्धनं) वर्णनं विद्यते। अस्मात् कारणात् अस्य नाटकस्य नामकरणं वेणीसंहारमिति जातम्।

**भट्टनारायणस्य नाट्यकला शैली च**- नाटककारेषु भट्टनारायणस्य अद्वितीयं स्थानं अस्ति। अनेन नाट्यशास्त्रीय-नियमानां साफल्येन प्रयोगः कृतः। अर्थप्रकृतयः, अवस्थाः सन्धयः नाटके आवश्यकाः। अस्य कथा संयोजन-सौष्ठवं विशिष्टम्। घटनासंयोजनेऽपि अयं दक्षः।' संचूर्णयामि गदया न सुयोधनोरू. (अंक- 1-15) भट्टनारायणस्य प्रत्येकं वर्णनं सार्थकम् अस्ति। वर्णनेषु स्वाभाविकता अस्ति। द्वितीयाङ्के प्रभात-वर्णनं, तृतीये चतुर्थे च युद्धवर्णनं, सर्वाणि पात्राणि स्थित्यानुकूलं भाषयाः प्रयोगं कुर्वन्ति।

**शैली** :- भट्टनारायणः प्रमुखतः गौडीरीतेः कविः अस्ति। वेणीसंहारे वीररसः मुख्यः रसः , अतः अस्मिन् ओजगुणः गौडी शैली च प्राधान्येन स्तः। वेणीसंहारे ओजगुणेन सह प्रसादगुणः मणि-काञ्चनसंयोगं प्रस्तौति । एकत्र कर्णस्य प्रसादगुणः युक्ता ओजोक्तिः-

सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्।। (वेणी. 3-37)

## विशाखदत्तः

मुद्राराक्षसस्य प्रस्तावनया एव विशाखदत्तस्य जीवनविषयकं प्रमाणं प्राप्यते। नान्यत्र कुत्राऽपि यथा-

''अद्य सामन्त वटेश्वर दत्त पौत्रस्य महाराजपदभाक् पृथुसूनोः कवेविशाखदत्तस्य कृतिः मुद्राराक्षसं नाम नाटकं नाटयितव्यम्।''

अनेन ज्ञातं भवति यत् विशाखदत्तस्य पितामह सामन्त वटेश्वदत्तः आसीत् पिता च महाराजः पृथुः क्वचित् संस्करणेषु पितुः नाम महाराज भास्करदत्तः प्राप्यते। सामंत-महाराज-शब्दाभ्यां ज्ञायते यत् एतस्य पूर्वजाः कस्यचन राज्ञः अधीनस्थाः आसन्। संभवतः विशाखदत्तस्य बाल्यकालादेव राजनीतौ रुचिः आसीत् तस्यैव परिपाकः मुद्राराक्षसमस्ति।

**विविधकला ज्ञानम्** - मुद्राराक्षसस्य अध्ययनेन ज्ञातं भवति यत् कविश्रेष्ठः सर्वशास्त्रनिष्णातः नाटकेऽस्मिन् राजनीतिः, अर्थशास्त्रम्, गणितम्,नाट्यशास्त्रम्, ज्योतिषम्, दर्शनशास्त्रम् विशेषतया न्यायशास्त्रम्, बौद्ध-जैन दर्शनं, व्याकरणशास्त्रम्, ज्योतिषशास्त्राणां पारिभाषिकशब्दानां प्रयोगः अस्ति।

**कृतित्वम्** - कविश्रेष्ठस्य विशाखदत्तस्य प्रमुखा कृतिः 'मुद्राराक्षसम्' अस्ति। इदं नाटकं पञ्चाङ्कात्मकमस्ति। एतदाधारेणैव तस्य गौरवाक्षुण्णमस्ति । विशाखदत्तस्य नाम्ना द्वे अपररचनयोः अपि उल्लेखः प्राप्यते।

1. देवीचंद्रगुप्तम्, अस्यां रचनायां रामगुप्तस्य, चन्द्रगुप्तस्य ध्रुवस्वामिन्यादीनाम् ऐतिहासिक घटना वर्णिता अस्ति। यत् चंद्रगुप्तः अन्ते ध्रुवस्वामिन्या सह पाणिग्रहणं करोति। इदं प्रेमाख्यानं नाटकं वर्तते। इदमपूर्णं प्राप्यते।
2. अभिसारिका। अस्यां रचनायां उदयन-वासवदत्ता-पद्मावतीनां प्रणय-कथा वर्तते। इयं रचना अप्राप्या अस्ति अनयोः द्वयोः प्रामाणिकता अनिर्णीता अस्ति।

**समयः** :- विशाखदत्तस्य समयस्य विषये मतैक्यं नास्ति। केचन सुधयः तं चंद्रगुप्त द्वितीयस्य (375 ई.तः 413 ई.) समकालीनकविः मन्यन्ते केचन अवन्तिवर्मणः (582 ई.) समकालीनश्च केचन (प्रो. याकोबी आदि) मुद्राराक्षसे चन्द्रग्रहणस्य तिथ्याधारेण 860 ई. समतुल्यं (सदृशं) मन्यन्ते। विशाखदत्तस्य समयस्य निर्णयः तस्य भरत-वाक्ये आश्रितं वर्तते-यथा-

वाराहीमात्मयोनेस्तनुमतनुबलामास्थितस्यानुरूपां
यस्य प्राम्दन्तकोटिं प्रणपरिगता शिश्रिये भूतधात्री।
म्लेच्छैरुद्देज्यमाना भुजयुगमधुना संश्रिता राजमूर्तेः
स श्रीमद्बंधुभृत्यश्चिरभवतु महीं पार्थिवश्चन्द्रगुप्तः॥ (मुद्रा. 7-19)

केषुचित् संस्करणेषु 'पार्थिवश्चन्द्रगुप्त' इत्यस्य स्थाने 'पार्थिवोऽवन्तिवर्मा' 'पार्थिवोदन्तिवर्मा' 'पार्थिवोरन्तिवर्मा' 'पार्थिवो रन्तवर्मा' पाठः प्राप्यते।

अन्तिम द्वौ रन्तिवर्मा रन्तवर्मा इतिहासे अनुपलब्धौ वर्तेते। दन्तिवर्मा (720 ई. प्रायः) पल्लव राजा आसीत्। एतस्य समये दक्षिणे यवनस्याक्रमणं नाभूत्। ये शैव राजानः आसन् एवञ्च भरत-वाक्ये राज्ञः विष्णोः सदृशं तुलना कृता। अतः ये त्रयः पाठाः असंगताः सन्ति।

मालविकाग्निमित्रे भरत-वाक्ये-राज्ञः अग्निमित्रस्य उल्लेखः - ''आशास्पमीतिविगमप्रभृति प्रजानां

संपत्स्यते न खलु गोप्तरि नाग्निमित्रे (मा. 5-20) मुद्राराक्षसनाटकेऽपि मूलतः चन्द्रगुप्तमौर्य एव अर्थोस्ति। डॉ. काशीप्रसाद जायसवाल महोदयेन सर्वप्रथमं विशाखदत्तस्य सम्बन्धः चंद्रगुप्तद्वितीयतः स्थापितः प्रो. हिलेब्राँ (HILLEBRANDT), स्पेयर (SPEYER), टॉनी (TOWNEY), आर.एस. पंडित, सी.आर. देवधर प्रभृतयः एतम् मतम् स्वीकृत्य विशाखदत्तस्य समयं 400 ई. प्रायः मन्यन्ते।

विशाखदत्त चंद्रगुप्तद्वितीयस्य समकालीनः

कानिचन उदाहरणानि विशाखदत्तं चंद्रगुप्त द्वितीयस्य समकालीनतां सिद्धयन्ति । यथा-

(1) भरतवाक्ये ''पार्थिवश्चन्द्रगुप्तः'' इत्यस्य श्लेषेन चन्द्रगुप्तमौर्य चन्द्रगुप्तद्वितीयश्च अर्थः।

(2) मुद्राराक्षस नाटकेऽस्मिन् 'आ शैलेन्द्रात्. ( 3-19) हिमालयात् दक्षिणसमुद्रपर्यतं साम्राज्यस्य कामनाकृताः 'तीर्त्वा सप्तमुखानि येन समरे सिन्धोर्जिता वाल्हिका यस्याद्याप्यधिवास्यते जलनिधिर्वीर्यानिलैर्दक्षिणः' (श्लोक-1)

(3) भरतवाक्ये प्रयुक्तः ''अधुना'' (अब) शब्दः प्रासंगिकः चंद्रगुप्तमौर्यस्य वर्तमान चन्द्रगुप्त द्वितीयेन सह संगतः भवति।

(4) विशाखदत्त-रचितस्य ''देवी-चन्द्रगुप्त'' नाटकस्य कथावस्तु एतयोः सम्बन्धं स्थापयति।

**शैली :-**

एक एव सः नाटककारः येन नाटकस्य वास्तविकं नाट्यरसं ज्ञात्वा नाटकरचनां कृतवान्। तथा च काव्यात्मकदोषेण रक्षां कृतवान्।

अतएव एतस्मिन् प्रसाद-माधुर्योज-गुणानां प्राचुर्य विद्यते। एतस्य कृतिषु वीररसस्य प्राधान्यमस्ति तथापि शृंगार-करुणादि-रसानां प्रभावोत्पादकः समावेशः कृतः, एतेन-उपमा-रूपक-श्लेषादि-अलंकाराणामपि मनोहारिप्रयोगेण पाण्डित्यं प्रदर्शितम्।

एतेन स्वकृतिषु शार्दूलविक्रीडितम्, शिखरणी, स्रग्धरादि विविध छन्दासां हृदयवर्जकः प्रयोगः प्राचुर्येण कृतः।

प्रसाद-माधुर्यनीतिनाम् एकत्र समन्वयं कुर्वन् कवि कथयति। यथा-

अप्राज्ञेन च कातरेण च गुणः स्याद् भक्तियुक्तेन कः
प्रज्ञाविक्रमशालिनोऽपि हि भवेत् किं भक्तिहीनात् फलम्।
प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये
ते भृत्या नृपतेः कलत्रमितरे संपत्सु चापत्सु च ।। (मुद्रा. 1-15)

चाणक्यस्य क्रोधपूर्ण उक्तौ ओज-गुणस्य समावेशं दर्शनीयमस्ति । यथा-

आस्वादितद्विरदशोणित-शोणशोभां
सन्ध्यारुणामिव कलां शशलाञ्छनस्य।
जृम्भाविदारितमुखस्य मुखात् स्फुरन्तीं
को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम्।।

प्रकृति चित्रणम् । यथा

आकाशं काशपुष्पच्छविभि भवता भस्मना शुक्लयन्ती
शीतांशोरंशुजलैर्जलधरमलिनां क्लिन्दती कृत्तिमैभीम्।
कापालीमुद्वहन्ती स्रजमिव धवलां कौमुदीमित्यपूर्वा
हासश्रीराजहंसा हरतु तनुषि क्लेशमैशी शरद् वः।। (मुद्रा. 3-20)

अथ च -

विषर्यस्तं सौधं कुलमिव महारम्भरचनं
सरः शुष्कं साधोर्ह्रदयमिव नाशेन सुहृदः।
फलैर्हीना वृक्षा विगुणविधियोगदिव नया
स्तृणैश्छन्ना भूमिर्मतिरिव कुनीत्या ह्यविदुषः।।

चाणक्यस्य कथने वीर रसस्य रमणीया अभिव्यक्तिः । यथा

आरुह्यारूढकोपस्फरणविषमिता ग्राङ्गुलीमुक्तचूडी
लोकप्रत्यक्षमुक्तां सकलरिपुकुलोच्छेदीदीर्घा प्रतिज्ञाम्।
केनान्येनावलिप्ता नवनवति शतद्रव्य कोटीश्वरास्ते
नन्दाः पर्यायभूताः पशव इव हताः पश्यतो राक्षसस्य।।

उपर्युक्त विवेचनेन ज्ञायते। यत् विशाखदत्तः सर्वतोमुखी प्रतिभायाः पुञ्जः वर्तते। सः असाधारण कवित्वशक्तेः स्वामी अस्ति। एतस्य कृतिषु रसालंकारछन्दसां प्रसादादि गुणानां गौड्यादिरीतिनां रचना चातुर्यं विलोक्य सुहृद-साहित्य-रसास्वादुनां चेतः हठात् आवर्जयति। एतदनुभूय वक्तुं शक्यते। यत् विशाखादत्तः नाट्यलेखनकलायां कृत्भूमिपरिश्रमः कविश्रेष्ठः वर्तते।

## भवभूतिः

संस्कृतरूपकपरम्परायां महाकवेः भवभूतेः स्थानं विशिष्टं वर्तते। भवभूतिः दक्षिण भारतस्थः

पद्पुरग्रामवासीयः आसीत्। काश्यपगोत्रीयः अयं कविः कृष्णयजुर्वेदस्य तैत्तिरीयशाखाध्यायी आसीत्। अस्य प्रसिद्धः नाम उदुम्बरः आसीत्, अस्य पितुर्नाम नीलकण्ठः मातुः नाम च जतुकर्णी (जातुकर्णी) आसीत्। भवभूतेः गुरोः नाम ज्ञाननिधिः आसीत्। भवभूति 'श्रीकण्ठपदलाञ्छन'-उपाधिना विभूषितः एष कविः 'पदवाक्यप्रमाणज्ञ' अर्थात् न्यायव्याकरण - मीमांसाशास्त्राणां ज्ञाता आसीत्। अनेन महाकविना रूपकत्रयं विरिचतम् प्राप्तप्रमाणैः एतस्य समयः अष्टमी शताब्दी आसीत्।

**कृतित्वम्** :- महाकविभवभूतिना रूपकत्रयं विरचितम् तद्यथा - (1) मालतीमाधावम् (2) महावीरचरित् (3) उत्तररामचरितञ्चेति।

**मालतीमाधव्**- दशाङ्कात्मकम् इदं प्रकरणम् एतस्मिन् मालतीमाधवयोः तथा मदयन्तिका मकरन्दयोः प्रणय परिणियोः वर्णनम् अस्ति।

**महावीरचरितम्** :- एतस्मिन् नाटके रामविवाहादारभ्य राज्याभिषेकं यावत् वर्णनम् अस्ति। सप्ताङ्कात्मकम् इदं नाटकम्।

**उत्तररामचरितम्** :- एतस्मिन्नाटके सप्ताङ्केषु रामायणस्य उत्तरकाण्डस्य कथा वर्णिता अस्ति। एतस्मिन् सीतायाः परित्यागः, राम-विलापः, लव-कुशप्राप्तिः, दोषरहितसीतायाः रामेण स्वीकृतेति वर्णनं

विद्यते।

**भवभूतेः नाट्यकला** – संस्कृत-साहित्ये कालिदासस्य अनन्तरम् भवभूतेः नाम उत्कृष्ट-नाटककारेषु अस्ति। एतस्य मालतीमाधवम्-महावीरचरितम्-उत्तररामचरितञ्च त्रिषु नाटकेषु उत्तररामचरितं सर्वश्रेष्ठं नाटकम् अस्ति।

अस्मिन् भवभूतिः आत्मानम् 'परिणत-प्रज्ञः' कथयति।

'कारुण्यं भवभूतिरेव तनुते' – संस्कृतवाङ्मये करूणरसवर्णने भवभूतेस्तदेवस्थानं यत् श्रृंगाररसवर्णने कालिदासस्य। नाटककृद्रूपेण द्वयोरेव प्रतिस्पर्धित्वम्। भवभूतौ बर्हिर्दृष्ट्यैव साकं सूक्ष्माऽन्तर्दृष्टिरपि लक्ष्यते। मानवीयमनोभावानाम् अतः स्थितेश्च यादृक् सूक्ष्मं मनोवैज्ञानिकं विश्लेषणं भवभूतिना प्रस्तूयते, तदन्यत्र सुदुर्लभम्।

भवभूतौ भावानां कोमलता, हृदयस्पर्शिता, तादात्म्यानुभूतिः, संवेदनशीलत्वं च वरीवर्ति, अतएव 'कारुण्यं भवभूतिरेव तनुते' इति तस्य यशो जेगीयते। दिङ्मात्रमिह केचन मार्मिका भावोदबोधकाः प्रसङ्गा प्रस्तूयन्ते।

**भवभूतेः शैली** :- भवभूतिः गौड़ी-रीतेः सर्वश्रेष्ठः कविः अस्ति। एतेन मालतीमाधवम् -महावीरचरितयोः गौड़ी रीतेः प्रयोगः कृतः। उत्तररामचरितं करुण-रसप्रधान नाटकम् अस्ति। अतः एतस्मिन् करुणरसस्य वर्णनेषु वैदर्भी रीतिः अस्ति। एको रसः करुणः एव इति अत्र स्थापितम्।

## अभ्यासकार्यम्

### भासः

**प्रश्न 1. अधोलिखितान् प्रश्नान् एकपदेन उत्तरत-**

क. महाकवि भासः कति नाटकानि अरचयत् ?

ख. भासस्य नाटकानां संकलनकर्ता कः अस्ति ?

ग. कथास्रोतदृष्ट्या भासनाटकानि कतिधा विभक्तानि ?

घ. उदयनकथा मूलकानि नाटकानि कति ?

ङ. प्रतिज्ञायौगन्धरायणनाटके कति अङ्काः ?

**प्रश्न 2 - उचितं विकल्पं चित्वा लिखत -**

क. 'कर्णभारम्' इत्यस्य नाटकस्य रचनाकारः अस्ति।

अ. भारविः ब. भवभूतिः

स. भासः द. कालिदासः

ख. 'दूतघटोत्कच' नाटकस्य नायकः कः अस्ति ।

अ. रामः ब. भीमः

स. श्रीकृष्णः द. घटोत्कचः

ग. 'स्वप्नवासवदत्तम्' इत्यस्मिन् नाटके कति अङ्काः ।

अ. पञ्च ब. अष्ट

स. षट् द. नव

घ. 'पद्मावत्या:' विवाह: केन सह भवति ।

अ. चारुदत्तेन सह — ब. यौगन्धरायेण सह

स. उदयनेन सह — द. भासेन सह

ङ. रामायणी कथा आधारितं नाटकमस्ति ।

अ. बालचरितम् — ब. प्रतिमानाटकम्

स. चारूदत्तम् — द. पञ्चरात्रम्

**प्रश्न 3 - अधोलिखितान् प्रश्नान् एकवाक्येन उत्तरत-**

क. भीमसेन: गदायुद्धे कस्य उरुं भञ्जयति ?

ख. महाभारतमूलकानि कति भासनाटकानि ?

ग. कर्णस्य कवचकुण्डलयो: याचक: क: ?

घ. अविमारकस्य विवाह: कया सह भवति ?

**प्रश्न: 4 - युग्मं मेलयत -**

| | | | |
|---|---|---|---|
| क. | उदयन: | अ. | श्रीराम: |
| ख. | दूतवाक्यम् | ब. | वसन्तसेना |
| ग. | चारुदत्त: | स. | वासवदत्ता |
| घ. | उरुभङ्गम् | द. | श्रीकृष्ण: |
| ङ. | अभिषेकनाटकम् | इ. | भीमसेन: |

**प्रश्न 5 - शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत-**

क. महाकविभासेन चतुर्दश नाटकानि लिखितानि ?

ख. प्रतिज्ञायौगन्धरायणे उदयनवासवदत्तयो: विवाहवर्णनं विद्यते ?

ग. बालचरित नाटके श्रीकृष्णस्य बालवर्णनम् अस्ति ?

घ. कुरङ्गी राजा कुन्ती भोजस्य पुत्री आसीत् ?

ङ. घटोत्कच: श्रीकृष्णस्य प्रेरणया दौत्यं स्वीकरोति ?

**प्रश्न: 6 - अधोलिखितेषु शब्देषु प्रकृति-प्रत्ययं पृथक् कुरुत ।**

| **शब्द:** | | **प्रकृति:** | **प्रत्यय:** |
|---|---|---|---|
| क | दृष्ट्वा | .................. | .................. |
| ख | त्यक्तुम् | .................. | .................. |
| ग | कृत्रिमता | .................. | .................. |
| घ | लब्धम् | .................. | .................. |
| ङ | नवत्वम् | .................. | .................. |

**प्रश्नः 7 – अधोलिखितानां पदानां यथोचितं सन्धिं सन्धिविच्छेदं वा कृत्वा सन्धेः नाम लिखत।**

| शब्दः | संधिः/संधि विच्छेदः | सन्धेः नाम |
|---|---|---|
| कोऽपि | .............................. | .............................. |
| तज्जीवनम् | .............................. | .............................. |
| नाटकेऽस्मिन् | .............................. | .............................. |
| | दुर्योधनः + उरुः | |
| – | माधुर्य + ओजः | |

**प्रश्नः 8 – महाकविभासस्य नाट्यकलायाः वैशिष्ट्यं लिखत ।**

**प्रश्नः 9 – योग्यता विस्तारः ।**

- नाटके अभिनेयतायाः चर्चा करणीया।
- शिक्षकैः सह देश काल –वातावरणं च अवगन्तव्यम्।
- भास–नाटकस्य एकस्य मिलित्वा सज्जता करणीया।

## अभ्यासकार्यम्

### कालिदासः

**प्रश्न 1 – एकपदेन उत्तरं लिखत –**

क. महाकवि कालिदासः कस्य सभारत्नम् आसीत् ?

ख. कविकुलगुरुः कः ?

ग. कालिदासस्य विश्वप्रसिद्धं नाटकम् किं ?

घ. मेघदूते प्रयुक्तं छन्दः किम् ?

ङ. रघुवंश महाकाव्ये कस्य वंशस्य वर्णनम् ?

**प्रश्न 2 – एकवाक्येन उत्तरं लिखत –**

क. महाकवि कालिदासस्य विरचितानि नाटकानि कानि ?

ख. कालिदासस्य के द्वे खण्डकाव्ये ?

ग. रघुवंशमहाकाव्ये कति सर्गाः ?

घ. पूर्वमेघे कस्य वर्णनम् ?

ङ. तारकवधवर्णनं कस्मिन् काव्ये अस्ति ?

**प्रश्न 3 – प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(सर्वस्वम्, घटकर्पर, कालिदासस्य, अम्बरमणिरिव, वयं)

क. निर्गतासु न वा कस्य .............. सूक्तिषु ।

ख. कालिदासस्य ............ अभिज्ञानशाकुन्तलम् ।

ग. वेतालभट्ट ............. कालिदासाः ।

घ. मेघे माघे ................. गतः ।

ङ. संस्कृत वाङमयमहाकाशे ............ भासते।

**प्रश्न 4 - उचितमेलनं कुरुत -**

| | | | |
|---|---|---|---|
| क. | महाकविः | (i) | रघुवंश महाकाव्ये |
| ख. | सप्तदश सर्गाः | (ii) | अभिज्ञानशाकुन्तलम् |
| ग. | एकत्रिंशत् राज्ञां वर्णनं विद्यते | (iii) | कुमारसंभवम् |
| घ. | सप्ताङ्कात्मकम् नाटकम् | (iv) | ऋतुसंहारम् |
| ङ. | खण्डकाव्यम् | (v) | कालिदासः |

**प्रश्न 5 - सत्यम् असत्यं लिखत -**

क. मालिविकाग्निमित्रम् नाम नाटकं कालिदासेन विरचितम्।

ख. रघुवंश महाकाव्ये अष्टादश सर्गाः सन्ति।

ग. अभिज्ञानशाकुन्तलस्य कथावस्तु महाभारत पद्मपुराणतः च संग्रहीता अस्ति।

घ. ''कुमारसंभवम्'' नाटकम् अस्ति।

ङ. उपमा प्रयोगे कालिदासः प्रसिद्धः अस्ति।

**प्रश्न 6 - अधोलिखित शब्दानां धातुं लकारं पुरुषं वचनं च लिखत-**

क. सन्ति।

ख. जायते।

ग. अकरोत्।

घ. अददत्।

ङ. कुर्वन्ति।

**प्रश्न 7 - नाम निर्देशपूर्वकं सन्धि विच्छेदं कुरुत -**

क. नाकर्षयति।

ख. चेतो हराः।

ग. माधुर्यौजादिगुणाः ।

घ. परमोज्ज्वलरत्नमस्ति।

ङ. त्रोटकेऽस्मिन्।

**प्रश्न 8 - अधोलिखित शब्दानां विभक्ति वचनञ्च लिखत-**

क. अनुग्रहेण।

ख. विश्वसाहित्यस्य।

ग. शब्दरचनायां।

घ. मनोव्यथा।

ङ. वर्णनात् ।

**प्रश्न 9 - लघूत्तरीय प्रश्नाः -**

क. महाकवि कालिदासस्य रचनानां नामानि लिखत।

ख. महाराज विक्रमादित्यस्य नव सभारत्नानां नामानि लिखत।

ग. महाकविना ऋतुसंहारस्य आरंभः समापनञ्च कयोः ऋत्वोः कृतम्।

**प्रश्न 10 - दीर्घोत्तरीय प्रश्नाः -**

क. महाकवि कालिदासस्य संक्षेपेण परिचयं लिखत-

## अभ्यासकार्यम्

### शूद्रकः

**प्रश्न 1 - एकपदेन उत्तरं लिखत।**

क. शूद्रकस्य यशः कुत्र प्राप्यते ?

ख. शूद्रकस्य समय कः ?

ग. शूद्रकः कस्मिन् शास्त्रे प्रवीणः आसीत् ?

घ. मृच्छकटिकं रचयिता कः ?

ङ. मृच्छकटिकं प्रकरणे कति अङ्काः ?

**प्रश्न 2 - एकवाक्येन उत्तरं लिखत।**

क. शूद्रकः केन अनुग्रहेण अश्वमेघयज्ञं कृतवान् ?

ख. शूद्रकस्य शैली कथम् अस्ति ?

ग. मृच्छकटिकप्रकरणे कस्य प्रतिबिम्बं दृश्यते ?

**प्रश्न 3. युग्म मेलनं कुरुत -**

| | अ | आ |
|---|---|---|
| 1. | सोमदेवस्य | दशकुमारचरितम् |
| 2. | दण्डिनः | कथासरित्सागरः |
| 3. | वाणस्य | स्कन्दपुराणम् |
| 4. | भासस्य | मृच्छकटिकम् |
| 5. | शूद्रकस्य | राजतरिङ्गण्याम् |

**प्रश्न 4 - शुद्ध वाक्यानां समक्षं ''आम्'' अशुद्ध वाक्यानां समक्षं ''न'' इति लिखत।**

क. मृच्छकटिकप्रकरणे दश अङ्काः सन्ति।

ख. शूद्रकः विधिपूर्वकं अश्वमेधयज्ञं कृतवान्।

ग. मृच्छकटिकं प्रकरणं नास्ति।

घ. शूद्रक शैली ओजगुणयुक्ता अस्ति।

ङ. मृच्छकटिक प्रकरणे उज्जयिन्यां समाजचरितवर्णनम् अस्ति।

**प्रश्न 5 - उचितैः पदैः रिक्त स्थानानि पूरयत।**

(शूद्रकस्य, प्रवीणः, शिवस्य, सौष्ठवयुक्ता, प्रकरणम्)

1. शूद्रकः मृच्छकटिकं नामकं ............... अरचयत्।
2. .............यशः सर्वत्र प्रसृतं प्राप्यते।
3. अयं हस्तिशास्त्रेषु ............आसीत्।
4. एषः .................... अनुग्रहेण ज्ञानं प्राप्तवान्।
5. अस्य प्रकरणस्य भाषा सरला ................. च अस्ति।

**प्रश्न 6 - अधोलिखितानां पदानां सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत।**

| | **शब्दः** | **संधिः/संधि विच्छेदः** | **सन्धेः नाम** |
|---|---|---|---|
| 1. | मेधाविनोऽस्य | ............................ | ............................ |
| 2. | सिंहोरूसत्वस्य | ............................ | ............................ |
| 3. | नास्ति | ............................ | ............................ |
| 4. | विदांवरस्य | ............................ | ............................ |

**प्रश्न 7 - अधोलिखितेषु शब्देषु प्रकृति प्रत्ययं पृथक् कुरूत -**

| | **शब्दः** | **प्रकृति** | **प्रत्ययः** |
|---|---|---|---|
| 1. | सर्वत्र | ............................ | ............................ |
| 2. | कृतवान् | ............................ | ............................ |
| 3. | प्रकृत्याः | ............................ | ............................ |
| 4. | दृश्यते | ............................ | ............................ |

**प्रश्न 8 - शूद्रकस्य नाट्यकलायाः वैशिष्ट्यं लिखत।**

## अभ्यासकार्यम्

### भट्टनारायणः

**प्रश्न 1 - एकपदेन उत्तरत-**

क. वेणीसंहार नाटकस्य प्रणेता कः ?

ख. भट्टनारायणस्य शैली का ?

ग. वेणी संहार नाटके प्रमुखः गुणः कः ?

घ. भट्टनारायणस्य कालः कः ?

**प्रश्न 2 - एकवाक्येन उत्तरत-**

क. कविः वेणीसंहारस्य प्रस्तावनायाम् आत्मानं किं कथयति ?

ख. सेनवंशप्रवर्तकः कः ?

ग. भट्टनारायणः आदिसूरेण किमर्थम् आहूतः ?

घ. वेणीसंहारनाटके कति अङ्काः ?

**प्रश्न 3 - त्रिचतुर्भिवाक्यै संस्कृत-भाषया उत्तरत -**

क. वेणीसंहारस्य कः अर्थः ?

ख. नाटके आवश्यकानि तत्त्वानि लिखत ?

**प्रश्न 4 - आम्/ न लिखत -**

क. कविमृगेन्द्रेण भट्टनारायणः प्रसिद्धः आसीत्।

ख. भट्टनारायणः कान्यकुब्जीयः ब्राह्मणः आसीत्।

ग. वेणीसंहारनाटके पञ्चाङ्कानि सन्ति।

घ. संचूर्णयामि गदया न सुयोधनोरु अर्जुनः कथयति ?

**प्रश्नः 5 - युग्मं मेलयत -**

| **अ** | **आ** |
|---|---|
| द्वितीयाङ्कः | वीररसः |
| तृतीयाङ्कः | रीतिः |
| मणिकाञ्चनसंयोगः | युद्धवर्णनम् |
| गौड़ी | प्रभातवर्णनम् |
| अङ्गीरसः | ओजप्रसादौ |

**प्रश्नः 6 - अधोलिखितानां पदानां यथोचितं सन्धिं सन्धिविच्छेदं वा कृत्वा सन्धेः नाम लिखत।**

| | **शब्दः** | **संधिः/संधि विच्छेदः** | **सन्धेः नाम** |
|---|---|---|---|
| अ. | ब्राह्मणोऽयम् | .......................... | .......................... |
| ब. | महत्त्वमस्ति | .......................... | .......................... |
| स. | अस्यैवाधिकम् | .......................... | .......................... |
| द. | नाटके + अस्मिन् | .......................... | .......................... |
| इ. | ओज+उक्तिः | .......................... | .......................... |
| ई. | स्थित्यनुकूलम् | .......................... | .......................... |
| उ. | भवाम्यहम् | .......................... | .......................... |
| ऊ. | कवेर्मृगः | .......................... | .......................... |

**प्रश्नः 7 - प्रकृति-प्रत्ययं पृथक् कुरुत ।**

| **शब्दः/पदम्** | **प्रकृतिः/धातुः** | **प्रत्ययः** |
|---|---|---|
| कृतः | .......................... | .......................... |
| युक्ता | .......................... | .......................... |
| कर्तुम् | .......................... | .......................... |
| ज्ञात्वा | .......................... | .......................... |
| बुद्धिमान् | .......................... | .......................... |

**प्रश्नः 8 - वेणीसंहारनाटकस्य नामकरणस्य सार्थकतां सिद्धयतु।**

- भट्टनारायणस्य रचना शैल्याः वैशिष्ट्यं प्रतिपादयतु।

**प्रश्नः 9 - योग्यता विस्तारः -**

- वेणीसंहारनाटकात् भीमस्य संवादान् पठन्तु।
- अन्येषु नाटकेषु भीमस्य चरितं पठनीयम्।

## अभ्यासकार्यम्

### विशाखदत्तः

**प्रश्न 1 - एकपदेन उत्तरं लिखत -**

क. विशाखदत्तस्य पितुः नाम किम् ?

ख. विशाखदत्तस्य जीवनविषयकं प्रमाणं कुत्र प्राप्यते ?

ग. ''मुद्राराक्षसम्'' नाम नाटकस्य रचनाकारः कः ?

घ. विशाखदत्तस्य प्रमुखा कृतिः का अस्ति ?

**प्रश्न 2 - एकवाक्येन उत्तरं लिखत -**

क. विशाखदत्तस्य कृतीनां नामानि लिखत ?

ख. विशाखदत्तस्य बाल्यकालात् कस्यां रूचिः आसीत् ?

ग. ''मुद्राराक्षसम्'' नाटके कति अङ्का सन्ति ?

घ. मुद्राराक्षसनाटके कति पात्राणां वर्णनम् ?

**प्रश्न 3 - प्रदत्तशब्दैः रिक्त स्थानानि पूरयत -**

(पितामह, परिपाकः, साम्राज्यस्य, सम्बन्धं, वीर)

क. तस्यैव ............ मुद्राराक्षसमस्ति।

ख. विशाखदत्तस्य ..............सामन्तः वटेश्वरदत्तः आसीत्।

ग. नाटकस्य कथावस्तु एतयोः ...............स्थापयति।

घ. हिमालयात् दक्षिण समुद्र पर्यन्तं ..............कामनाकृताः।

ङ. चाणक्यस्य कथने .............. रसस्य अभिव्यक्तिः भवति।

**प्रश्न 4 - सत्यम् असत्यं लिखत -**

क. मुद्राराक्षस नाटकं विशाखदत्तेन विरचितम् ।

ख. विशाखदत्तस्य तिस्रः रचनाः सन्ति।

ग. ''अभिज्ञानशाकुन्तलम्'' कालिदासस्य कृतिः नास्ति ।

घ. मुद्राराक्षसनाटकं पञ्चाङ्कात्मकम् अस्ति।

ङ. महाकवि भासः नाटककारः नास्ति ।

**प्रश्न 6 - उचित मेलयत -**

क- विशाखदत्तस्य कृतिः (i) वटेश्वरदत्तः

| | | | |
|---|---|---|---|
| ख- | देवीचन्द्रगुप्तम् | (ii) | विशाखदत्तः |
| ग- | विशाखदत्तस्य पितामहः | (iii) | नाटकम् |
| घ- | कविश्रेष्ठः | (iv) | पञ्चाङ्कात्मकम् |
| ङ- | मुद्राराक्षस नाटकम् | (v) | मुद्राराक्षसम् |

**प्रश्न 6 - अधोलिखित शब्दानां सन्धिविच्छेदं कृत्वा संधि नाम लिखत -**

क. तस्यैव

ख. बाल्यकालादेव

ग. गौरवाक्षुण्णमस्ति

घ. मनोहारि

ङ. नाटकेऽस्मिन्

**प्रश्न 7 - लघूत्तरीय प्रश्नाः -**

क. देवीचन्द्रगुप्तनाटके केषां वर्णनम् अस्ति ?

ख. विशाखदत्तस्य केषु विषयेषु दक्षता आसीत् ?

**प्रश्न 8 - दीर्घोत्तरीय प्रश्नः -**

क. उदाहरणैः विशाखदत्तस्य कालनिर्धारणं कुरुत ।

ख. विशाखदत्तस्य परिचयं लिखत ।

## अभ्यासकार्यम्

### भवभूतिः

**वस्तुनिष्ठ प्रश्नाः -**

**प्रश्न 1 - उचित विकल्प लिखत-**

क. भवभूतेः पितुः नाम किम्-

अ. श्रीकण्ठः    ब. नीलकण्ठः

स. रक्तकण्ठः    द. आकण्ठः

ख. मालतीमाधवम् अस्ति -

अ. नाटकम्    ब. एकांकी

स. प्रकरणम्    द. त्रोटकम्

ग. महावीरचरिते अङ्काः सन्ति -

अ. सप्त    ब. अष्ट

स. पञ्च    द. नव

घ. भवभूतेः कति रुपकाणि -

अ. चत्वारि    ब. द्वे

स. पञ्च    द. त्रीणि

ङ. भवभूतेः गुरोः नाम अस्ति -

अ. ज्ञाननिधिः ब. गुणनिधिः

स. शीलनिधिः द. धर्मनिधिः

**प्रश्न 2 - एकपदेन उत्तरं लिखत -**

क. भवभूतेः नाम किम् ?

ख. भवभूतेः ग्रामस्य नाम किम् ?

ग. उत्तररामचरिते कति अङ्का सन्ति ?

घ. भवभूतेः करुणरसः प्रधाननाटकं किमस्ति ?

**प्रश्न 3 - एकपदेन उत्तरं लिखत -**

क. भवभूतिः केन उपाधिना विभूषितः आसीत् ?

ख. भवभूतिः का शाखाध्यायी आसीत् ?

ग. भवभूतिः कः गोत्रीयः आसीत् ?

घ. मालतीमाधवं कति अङ्कात्मकं नाटकमस्ति ?

प्रश्न 4 - प्रदत्त शब्दैः रिक्त स्थानानि पूरयत -

(पुञ्जः, सर्वश्रेष्ठं, नाटकम्, रूपकत्रयम्, उदुम्बरः)

क. उत्तररामचरितं करुण रस प्रधानं .........अस्ति।

ख. अस्य प्रसिद्धः नाम ..........आसीत्।

ग. विशाखदत्तः सर्वतोमुखी प्रतिभायाः .......वर्तते ।

घ. नाटकेषु उत्तररामचरितं ........... नाटकमस्ति ।

ङ. महाकविना .............. विरचितम् ।

**प्रश्न 5 - सत्यमसत्यं लिखत -**

क. मालतीमाधवं प्रकरणम् अस्ति ?

ख. भवभूतेः समयः अष्टमी शताब्दी आसीत् ?

ग. महावीरचरितनाटके दशाङ्काः सन्तिः ?

घ. भवभूतिः महाकाव्यकर्ता अस्ति ?

ङ. भवभूतिः गौड़ी-रीते सर्वश्रेष्ठः कविः अस्ति ।

**प्रश्न 6 - उचित मेलनं कुरुत-**

| | | | |
|---|---|---|---|
| क. | भवभूतिः | (i) | अष्टमी शताब्दी |
| ख. | समयः | (ii) | नाटकम् |
| ग. | माता | (iii) | महावीरचरितम् |
| घ. | उत्तररामचरितम् | (iv) | जतुकर्णी |
| ङ. | सप्ताङ्कात्मकं नाटकम् | (v) | श्रीकण्ठपदलाञ्छनः |

**प्रश्न 7 - अधोलिखित शब्दानां धातुं लकारं पुरुषं वचनञ्च लिखत -**

क. वर्तते।

ख. आसीत्।

ग. विद्यते।

घ. कथयति ।

ङ. प्रस्तूयन्ते।

**प्रश्न 8 - अधोलिखित शब्दानां विभक्तिं वचनञ्च लिखत -**

क. उदुम्बरः

ख. प्रमाणैः

ग. करुणरसस्य

घ. संस्कृतवाङ्मये

ङ. सीतायाः

च. आत्मानम्

**प्रश्न 9 - लघूत्तरीय प्रश्नः -**

क. भवभूतेः रचनानां संक्षिप्तपरिचयं लिखत।

**प्रश्न 10 - दीर्घोत्तरीय प्रश्नः -**

क. भवभूतेः संक्षिप्तं जीवनपरिचयं लिखत।

❖ ❖ ★ ❖ ❖

# नवमः अध्यायः
# निबन्धः

## आदर्शसंस्कृतविद्यालयः

विद्यायाः आलयः विद्यालयो भवति। सर्वेऽपि विद्यालयाः समानाः एव भवन्ति। सर्वेषां विद्यालयानां स्थितिः समाना भवति, आवश्यकताः समानाः भवन्ति, भवनं, प्रांगणं, पुस्तकालयः, शिक्षिकाः, वातावरणं सर्वेषु विद्याकेन्द्रेषु समानमेव अपेक्षितम्, तर्हि आदर्शविद्यालयस्य संस्कृतस्य किं वैशिष्ट्यम् इति विचारणीयम्-

आदर्शः इत्युक्ते अनुकरणीयः, उदात्तः, प्रशस्यः इति। संस्कृतस्य विद्यालयः संस्कृतविद्यालयः। संस्कृतशब्दस्य अर्थः एव शुद्धः, परिनिष्ठितः सम्यक् कृतः इति। वस्तुतः सामान्यस्य विद्यालयस्य अपेक्षया संस्कृत विद्यालयस्य स्वरूपं भिन्नं, प्रकृतिः भिन्ना, वातावरणं भिन्नं, परिवेषः अपि भिन्नं भवति। एकस्य आदर्शसंस्कृतविद्यालस्य स्वरूपं एवं निर्धारयितुं शम्यते-

1. आवश्यकतानुगुणं सज्जितं प्राकृतिकं भवनम्।
2. प्रकोष्ठाः सज्जिताः स्युः।
3. भित्तिकासु संस्कृतस्य सूक्तयः स्युः।
4. पुस्तकालये संस्कृतस्य सर्वेषां विषयाणां उत्तमाः ग्रन्थाः स्युः।
5. भवनं परितः वृक्षाः स्युः।
6. वातावरणं प्राचीनं गुरुकुलम् इव स्यात् ।
7. छात्राणां अध्यापकानां गणवेशः परम्परानुसारं स्यात्।
8. कक्षासु, बहिश्च सर्वदा संस्कृतेन सम्भाषणम्।
9. संस्कृतमाध्यमेनैव अध्यापनम्।
10. प्राच्यसंस्कृतविषयाणां शास्त्राणां योग्याः प्रशिक्षिताः आचार्याः।
11. आधुनिकशिक्षणपद्यत्या प्रत्यक्षशिक्षणविधिना अध्यापनम्।
12. क्रीडांगणम्, क्रीडनव्यवस्था।
13. समये-समये शास्त्रार्थविधिः परीक्षण विधिः, प्रयोगविधिः प्राच्यपरम्परानुसारं भवेत्।

एवं प्रकारेण आदर्शसंस्कृतविद्यालयस्य स्वरूपं कल्पयितुं शक्यते। प्राच्य-अर्वाच्ययोः संगमः संस्कृतविद्यालये भवेत्।

# संस्कृतिः संस्कृताश्रिता

(संस्कृतं भारतीयसंस्कृतिश्च)

संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।

वेदतत्त्वार्थसंजुष्टं लोकात् लोककरं शिवम्।। (कपिलस्य)

संस्कृतेऽर्थः - का नाम संस्कृतिः ? शुद्धं, परिष्कृतं, संस्कारितं, शमितमोहं, दुर्भावनाशकं च संस्कृतिरिति। ननु संस्कृतिः जीवनोन्नायिका, सद्गुणग्राहिणी, ज्ञानज्योतिप्रदायिनी च । संस्कृत्या एव सद्गुणानां संग्रहः सम्भाव्यते।

संस्कृतमाश्रयति संस्कृतिः- वेदेषु, पुराणेषु, धर्मग्रंथेषु, दर्शनेषु च पुरुषार्थचतुष्टयस्य, कर्त्तव्याकर्त्तव्यस्य विस्तृतं वर्णनं प्राप्यते। सत्य-अहिंसा-अस्तेय ब्रह्मचर्य-अपरिग्रहादीनां आवश्यककर्त्तव्यत्वेन वेदेषु निर्देशाः प्राप्यन्ते। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः । (बृहदारण्यकः 5.5.15)

ईश्वरास्तित्वम्, अनास्तिक्यं, धर्मबुद्धिः च संस्कृताश्रिता संस्कृतेः वैशिष्ट्यम्। अतः यजुर्वेदे कथितम् - 'ईशावास्यमिदं सर्वम्' ( यजु. 40.1) यदि ईश्वरसाक्षात्कारः अस्मिन् जीवने न कृतम् तर्हि जीवनस्य असारत्वमेव। ब्रह्मज्ञानेनैव जीवनस्य सार्थक्यम्।

इह चेदवेदीदथ सत्यमस्ति, न चेदिहावेदीन्महती विनष्टिः। भूतेषु-भूतेषु विचिन्त्य धीराः, प्रेत्यास्माल्लोकादमृता भवन्ति।। (केनोपनिषद् 2.5)

भारतीयेषु संस्कृतधर्मग्रन्थेषु मानवानां कृते स्पष्टः निर्देशः विद्यते, यत् मानवः संस्कारैः कथं स्वयोग्यतां वर्धयेत। सर्वेषु क्षेत्रेषु विकासः कथं स्वयोग्यतां वर्धयेत। सर्वेषु क्षेत्रेषु विकासः कथं कुर्यात् व्यापारे, न्यायालये, रणक्षेत्रे, स्वकुटुम्बे, समाजे च कथं व्यवहरेत् एतादृशानां विषयापां समावेशः अस्ति।

स्वाभ्युदयाय याः सांस्कृतिकाः व्यवस्थाः परिकल्पिताः ताः सर्वत्र सर्वजनोपकाराय भवेयुः इति भारताः प्रयातन्त।

समाजस्य, राष्ट्रस्य च सर्वविधसमुन्नत्यै मतैक्यं, वैचारिकं समाञ्जस्यंमावश्यकम्।

समानी व आकृतिः समाना हृदयानि वः।

समानमस्तु वो मनो यथा वः सुसहासति।। (ऋग्वेदः 10.191.8)

संसारे जागरूकतया प्रत्युत्पन्नमतेः प्रबुद्धबुद्ध्या कीर्तिलाभः विभवलाभश्च, श्रमेण सौभाग्यप्राप्तिः भवति।

भूत्यै जागरणम् अभूत्यै स्वप्नम् । (यजु. 30.16)

भारतीयसंस्कृते प्रायः सर्वेषु क्षेत्रेषु भूमिः विलसिता। विशालेऽस्मिन् भारते बहुविधानां जातीनां वर्गाणां च एकसूत्रेण निबन्धनं भारतीयसंस्कृतेः वैशिष्ट्यं सम्यक् साधितं लोके विषयरागः मानवविनाशस्य कारकः अतएव विषयानुरागः त्याज्यः।

न जातु कामः कामानामुपभोगेन शाम्यति।

हविषा कृष्णवर्त्तमेव भूयः एवाभिवर्धते। (मनु. 2.94)

# जननीजन्मभूमिश्च स्वार्गादपि गरीयसी

**मातुः महत्त्वम्ः** - अस्मिन् संसारे माता एव सा शक्तिः या विनयशीला, ममतामयी, क्षमायुक्ता, स्नेहानुरक्ता, अनुरागयुक्ता, सौम्यगुणसम्पृक्ता, अपूर्वा दिव्या च । माता सकलगुणानाम् आगारम्, ममतायाः सागरम्, क्षमायाः खनिः । माता स्व विशिष्टैः गुणैः स्थैर्येण भूधरं, धौर्येण सागरं, माधुर्येण अमृतम्, क्षमया पृथिवीयम्, तेजसा सूर्यम् चातिशेते।

वेदेषु धर्म शास्त्रेषु च मातुः गौरवं बाहुल्येन प्रतिपादितम्।

'आपो अस्मान् मातरः शुन्धयन्तु' । (यजु. 4.2)

'मातृदेवो भव', पितृदेवो भव' (तैत्तः 1.11.2)

**मनुनाऽपि मातुः महत्त्वं निर्दिश्यते-**

'सहस्रं तु पितृन् माता गौरवेणातिरिच्यते।। (मनु. 2.145)

'महाभारतेऽपि व्यासेन निर्दिश्यते - 'नास्ति मातृसमो गुरुरिति'।

एवमेव यन्त्राऽपि मातुः महत्त्वं श्रूयते-

'माता परं दैवतम्'

'माता गुरुतरा भूमेः'

शिशोः विविधकार्यकरणाय माता-अम्बा-जननी-धात्री-शक्तिरिति शब्दैः स्तूयते।

जन्मभूमेः महत्त्वम् - अर्थववेदस्य भूमिसूक्ते मातृभूमेः वैशिष्ट्यस्य 63 मन्त्रेषु विशद वर्णनं प्राप्यते। मातृभूमिः मानव-रक्षण-सरण-ज्ञान-ज्योतिं च ज्वालयति। प्राचीनकालादेव नरः स्वमातृभूमिं, स्वदेशं च प्राणेभ्योऽपि अधिकं मन्यते।

माताभूमिः पुत्रोऽहं पृथिव्याः (अथर्व. 12.1.12) भारतभूमिरस्माकं जननी तत् पुत्रत्वेन मातुः रक्षणम् अस्माकं परमं कर्त्तव्यम्। अतएव कथितम् 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।' वयं तुभ्यं बलिहृतः स्याम (अथर्व. 12.1.62) मातृभूमिक्रोड-लालितस्य जनस्य स्वजन्म भूमिं प्रति तथा विधोऽनुरागः जायते यत् स आजीवनं मातृभूमिं स्मरत्येव। लोके यः कोऽपि मानवः स्यात्, तस्य स्वमातृभूमिं प्रति गुरुतमा भक्तिः प्रीतिरनुरक्तिश्च। बालाः युवानः वृद्धाः वा मातृभूमिं सस्नेहम् आश्रित्यैव आत्मसमर्पणमपि विधित्सति।

मातृभूमैः गौरवं यद् वीरा धीरा युवानः युवत्यः संन्यासिनः उत्साहपूर्वक मातृभमेः रक्षणार्थ परतंत्रजालं विच्छेदार्थ च स्व जीवनं समर्पयन्ति। देशभक्ति-भावनैव दिव्यशक्तिरूपेण मुमूर्षौ मृतप्राये च प्राणसंचारं विदधति।

**जन्मभूमेः गौरवकीर्तनायैव प्रोक्तम्-**

वन्दे मातरम्!

सुजलां सुफलां मलयजशीतलाम्।

शस्यश्यामलां मातरम्, वन्दे मातरम्।।

## संस्कृतभाषायाः महत्त्वम्

संस्कृत- शब्दस्यार्थः - यः शुद्धः परिष्कृतः व्याकरणदिदोषरहितः सः 'संस्कृतम्'।

प्राचीनैः ऋषिभिर्मुनिभिश्च अपशब्द दोषनिवारणाय य परिष्कृता भाषा व्यवहृतिमानीता सैव संस्कृत भाषा -नाम्ना सम्बोधयते । आर्याणां अतिप्राचीना सेयं संस्कृत भाषा । अस्यां भाषायां भारतीयानां धर्मग्रन्थाः सन्ति। पुरा संस्कृतमेवराष्ट्रभाषा आसीत्। विदेशेष्वपि संस्कृतस्य प्रचारः अभवत्। विश्वस्य प्राचीनतमं साहित्यं अत्र उपलभ्यते। ऋगवेदः विश्वस्य प्राचीनतमं पुस्तकम् अत्रैवास्ति । विश्वसंस्कृतेः आधारशिला संस्कृत-वाङ्मये एव प्राप्यते। संस्कृते ज्ञान-विज्ञान-कला-संस्कृति-धर्म-दर्शन-अर्थशास्त्र-व्याकरण-काव्यशास्त्र- आयुर्वेदीय -विषयेषु यत् प्राचीनं विस्तृतं साहित्यम् उपलभ्यते तत् अन्यत्र नास्ति 'मैकडानलमतानुसार' समग्रसभ्यतायाः मूलं संस्कृतवाङ्मये एव निहितम्। भास-कालिदास-अश्वघोष-भवभूति-दण्डि-सुबंधु-बाण-प्रभृतयः महाकवयोः-नाटकाश्च संस्कृतभाषायाः सन्ति ।

उपमाकालिदासस्य भारवेः अर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयोगुणाः।।

उपमा - अर्थगौरवं पदलालित्यं त्रयाणां गुणानां वैशिष्ट्य संस्कृत साहित्ये एव परिलक्षितम्।

अधुना सङ्गणकस्य कृते संस्कृतभाषा अति उपयुक्ता अस्ति। प्राचीनभारतीयसाहित्यानुशीलेन ज्ञायते यत् संस्कृतं केवलं विद्वद्जनानां भाषा नासीत् अपितु लौकिकानां व्यावहारिकी भाषापि आसीत्। रामायण महाभारतकालीने समये संस्कृतं लौकिकभाषापि आसीत् इति सर्वेः पाश्चात्यैः अभिमतमा । बौद्धकविरश्वेघोषः प्राकृतभाषां परित्यज्य बुद्धचरित-सौन्दरानन्द काव्यद्वयं संस्कृत भाषायामेव अलिखत्। द्वितीयशताब्दी - ईसवीयादारभ्य एकोनविंशतितमशताब्दीं यावत् सर्वेऽपि शिलालेखाः प्रायेण संस्कृतभाषाश्रया एवासन्। विश्वप्रेम-विश्वबन्धुत्व-विश्वसंस्कृत्यादीनाम् आधारतत्वज्ञानार्थ संस्कृतस्यानुशीलनमनिवार्यम्। एषा एव अस्माकं पूर्वजानाम् आर्याणां सुलभा शोभना गरिमामयी च वाणी। एषा प्राणभूता भाषा अस्ति राष्ट्रस्य ऐक्यं च साधयति। भारतीयगौरवस्य रक्षणाय एतस्याः प्रसारः सर्वैरेव कर्त्तव्यः। देववाणी, सुरभारती, गीर्वाणी त्रिदशाभाषा इत्यादीनि सुविख्यातानि नामानि संस्कृत भाषयाः।

संस्कृतभाषायाः साहित्यं योगशास्त्रादारभ्य मोक्षपर्यन्तं शोभते। महाभारते वेदव्यासेनोक्तम्-

धर्मे अर्थे च कामे च मोक्षे च भरतर्षभ।

यदिहाऽस्ति तदन्यत्र यन्नेहाऽस्ति न तत् क्वचित्।। महाभारत अर्थात् महाभारते संस्कृतसाहित्ये च यत् अस्ति तदैव सर्वत्र यत् अत्र नास्ति स क्वचित् नास्ति।

## छात्रजीवनम्

विद्यार्थिजीवनमेव मानवजीवनस्य प्रभातवेला आधारशिला च वर्तते। समस्तजीवनसय विकासस्य

ह्रासस्य वा कारणम् एतत् जीवनम् एव अस्ति। वस्तुतः छात्रजीवनं साधनामयं जीवनम्। अध्ययनं परमं तप उच्यते।

छात्रजीवने परिश्रमस्य महती आवश्यकता वर्तते। यो छात्रः आलस्यं त्यक्त्वा परिश्रमेण

विद्याध्ययनं करोति स एव साफल्यं लभते। अतएव छात्रैः प्रातः काले ब्रह्ममुहूर्ते एव उत्तिष्ठन्ति। कस्मैचित् कालाय भ्रमणमपि अनिवार्यम्। ततः नित्यक्रियादि निर्वृत्त सन्ध्योपासनादिकं विधाय अध्ययनं

कर्त्तव्यम्। तदनन्तरं च लघु सात्विकं अल्पाहारं दुग्धं च गृहीत्वा विद्यालयं गन्तव्यम्। तत्र सर्वे छात्राः सहैव सरस्वती प्रार्थनां कृत्वा गुरुन् नत्वा अध्ययनं कुर्वन्ति। छात्रजीवने असत्यभाषणं कदापि न करणीयम्। छात्रजीवनं पूर्णतः अनुशासनबद्धं भवति। अनुशासनेन युक्तः छात्रः अत्युत्तमः भवति। अतः छात्रैः स्वजीवने अनुशासनस्य पालनं परम कर्त्तव्यम् अस्ति। अतः छात्राणां शारीरिकं चारित्रिकं च विकासं अत्यन्तानिवार्यम्। विद्यार्थिजीवनमेव सम्पूर्णागामिजीवनस्य आधारशिला। अतः तेषां सम्यक् रक्षणं पोषणम् च कर्त्तव्यम्।

## दीपावलिः

जीवनसङ्ग्रामे रतानां जनानां खेदनिवारणाय देशे-देशे उत्सवाः भवन्ति। उत्सवानाम् अभावे

जनजीवनं नीरसं जायते। भारतवर्षे अपि बहवः उत्सवाः भवन्ति। तेषु उत्सवेषु मुख्याः दीपावलिः रक्षाबन्धनम् नवरात्रं विजयादशमी होलिका च सन्ति। एतेषु दीपावलिः इति प्रधानः उत्सवः कार्तिकमासे कृष्णपक्षे अमावस्यायां तिथौ भवति। महर्षि वाल्मीकिकृत रामायण कथानुसारं भगवतः रामस्य अयोध्यागमने अयोध्यायां प्रथमं दीपावलिः आयोजिता इति जनश्रुतिः। मनुष्याः गृहाणि सुधया अङ्गणं च गोमयेन लिम्पन्ति। जनाः रात्रौ तैलैः वर्तिकाभिः च पूर्णान् दीपान् प्रज्ज्वालयन्ति। दीपैः नगरं प्रकाशितं भवति। एषः पञ्चदिवसीयः उत्सवः। अस्य पञ्चसु अपि दिवसेषु सर्वत्र दीपानाम् आवलिः दृश्यते। प्रथमदिवसे त्रयोदश्यां जनाः आभूषणानि गृहपात्राणि स्वर्णं रजतं वा क्रीणन्ति। धन्वन्तरीति वैद्यराजः अद्य एव पूज्यते। द्वितीय दिवसस्य चतुर्दश्याः विशेषता अस्ति सूर्योदयात् प्राक् अभ्यङ्गस्नानम्। तृतीयदिवसे अमावस्यायां जनां धनदेव्याः लक्ष्म्याः पूजनं कुर्वन्ति। व्यापारिणः व्यापारपुस्तकानाम् पूजनं कुर्वन्ति। बालाः बहुप्रकारकैः स्फोटकैः मनोविनोदयन्ति। विद्युद्दीपकानां प्रकाशः आपणेषु नितरां शोभते। चतुर्थेदिवसे कार्तिकप्रतिपदि शुक्लपक्षे व्यापारिणां नूतनः संवत्सरः प्रारभते। कृषकाः पशुपालकाः च गोवर्धनं पूजयन्ति गोधनं च अलङ्कुर्वन्ति। अन्तिमदिवसे द्वितीयायां भ्रातृभगिन्यौ मिलतः परस्परं सत्कारयतः दीर्घजीवनं सुखसमृद्धिं च कामयतः।

अस्मिन् समये सर्वत्र आनन्दः प्रवर्तते। कृषकाणां गृहेषु नूतनान्नं नवधान्यं समागच्छति । नदीजलं

स्वच्छम् आकाशः निरभ्रः दृश्यते। आपणाः द्रव्यैः ग्राहकैः च परिपूर्णाः भवन्ति। गृहेषु मिष्टान्नस्य सेवनं भवति। लाजाः देवेभ्यः अतिथिभ्यः च समर्पिताः भवन्ति। गृहाणां पुरतः अल्पनारेखनं दृश्यते। ''तमसो मा ज्योतिर्गमय'' इति दीपावलिसन्देशः सर्वे जनाः परस्परं मिलन्ति अभिनन्दन्ति च । ते अभिनन्दनपत्राणि प्रेषयन्ति प्रार्थयन्ति च शुभं करोतु कल्याणं, आरोग्यं सुखसम्पदाम्। शत्रुबुद्धिविनाशाय, दीपज्योतिर्निर्नमोऽस्तुते।।

❖ ❖ ★ ❖ ❖